# Appendix I:
# Completing The Reading Curriculum:
# Darśhanas, Upaveda, Āyurveda, Brāhmaṇas, and Prātiśhākhyas

## Table of Contents of Appendix


| | |
|---|---|
| Darśhanas | 664 |
| Upaveda | 686 |
| Āyurveda | 742 |
| Brāhmaṇas Loop | 758 |
| Prātiśhākhyas | 1012 |

## Branch 7: Nyāya Darśhanam

Structure: 5 Chapters with 2 divisions each.
Beginning:

न्याय दर्शनम् प्रथमोऽध्यायः प्रथम आह्निकः

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः १ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः २ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ३ इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ४ अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च ५ प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् ६ आप्तोपदेशः शब्दः ७ स द्विविधो दृष्टादृष्टार्थत्वात् ८ आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ९ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् १० चेष्टेन्द्रियार्थाश्रयः शरीरम् ११ घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः १२ पृथिव्यापस्तेजो वायुराकाशमिति भूतानि १३ गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः १४ बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् १५ युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् १६ प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः १७ प्रवर्तनालक्षणा दोषाः १८ पुनरुत्पत्तिः प्रेत्यभावः १९ प्रवृत्तिदोषजनितोऽर्थः फलम् २० बाधनालक्षणं दुःखम् २१ तदत्यन्तविमोक्षोऽपवर्गः २२ समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः २३ यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् २४ लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः २५ तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः २६ स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् २७ सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः २८ समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः २९ यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ३० अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ३१ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ३२ साध्यनिर्देशः प्रतिज्ञा ३३ उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ३४ तथा वैधर्म्यात् ३५ साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ३६ तद्विपर्ययाद्वा विपरीतम् ३७

Branch 7: Nyāya Darśhanam continued

Ending:

प्रतिषेधेऽपि समानो दोषः ४८ सर्वत्रैवम् ३९ प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ४० प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानो दोषः ४१ इति प्रथम आह्निकः

पञ्चमोऽध्यायः द्वितीय आह्निकः

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि १ प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः २ प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ३ प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ४ पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ५ अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ६ प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ७ वर्णक्रमनिर्देशवन्निरर्थकम् ८ परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ९ पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् १० अवयवविपर्यासवचनमप्राप्तकालम् ११ हीनमन्यतमेनाप्यवयवेन न्यूनम् १२ हेतूदाहरणाधिकमधिकम् १३ शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् १४ अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् १५ विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् १६ अविज्ञातं चाज्ञानम् १७ उत्तरस्याप्रतिपत्तिरप्रतिभा १८ कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः १९ स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषप्रसङ्गो मतानुज्ञा २० निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् २१ अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः २२ सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः २३ हेत्वाभासाश्च यथोक्ताः २४

इति द्वितीय आह्निकः इति पञ्चमोऽध्यायः इति न्यायदर्शनम्

Reference: Vidyābhuṣana, Mahāmahopādhyāya Satiśa Chandra, tr., *The Nyāya Sutras of Gotama*, (New Delhi: Munshiram Manoharlal, 1975) [First published in 1913 by Panini Office, Allahabad.]

## Branch 8: Vaiśheṣhika Darśhanam--short *Sūtra* recension

Structure: 10 chapters with two divisions each.
Beginning:

वैशेषिकदर्शनम् प्रथमोऽध्यायः प्रथम आह्निकः

अथातो धर्मं व्याख्यास्यामः १ यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः २ तद्वचनादाम्नायस्य प्रामाण्यम् ३ धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ४ पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ५ रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः ६ उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ७ सदनित्यं द्रव्यवत्कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः ८ द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम् ९ द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम् १० कर्म कर्मसाध्यं न विद्यते ११ न द्रव्यं कार्यं कारणं च बधति १२ उभयथा गुणाः १३ कार्यविरोधि कर्म १४ क्रियागुणवत्समवायिकारणमिति द्रव्यलक्षणम् १५ द्रव्याश्रय्यगुणवान्संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् १६ एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्म लक्षणम् १७ द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् १८ तथा गुणः १९ संयोगविभागवेगानां कर्म समानम् २० न द्रव्याणां कर्म २१ व्यतिरेकात् २२ द्रव्याणां द्रव्यं कार्यं सामान्यम् २३ गुणवैधर्म्यान्न कर्मणां कर्म २४ द्वित्वप्रभृतयः संख्याः पृथक्त्वसंयोगविभागाश्च २५ असमवायात्सामान्यकार्यं कर्म न विद्यते २६ संयोगानां द्रव्यम् २७ रूपाणां रूपम् २८ गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् २९ संयोगविभागाश्च कर्मणाम् ३० कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् ३१ इति प्रथम आह्निकः

प्रथमोऽध्यायः द्वितीय आह्निकः

कारणाभावात्कार्याभावः १ न तु कार्याभावात्कारणाभावः २ सामान्य विशेष इति बुद्ध्यपेक्षम् ३ भावोऽनुवृत्तेरेव हेतुत्वात्सामान्यमेव ४ द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च ५ अन्यत्रान्त्येभ्यो विशेषेभ्यः ६ सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ७ द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ८

Branch 8: Vaiśheṣhika Darśhanam--short Sūtra recension continued

Ending:

असमाहितान्तःकरणा उपसंहृतसमाधयस्तेषाञ्च १३ तत्समवायात्कर्मगुणेषु १४ आत्मसमवायादात्मगुणेषु १५ इति प्रथम आह्निकः

नवमोऽध्यायः द्वितीय आह्निकः

अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम् १ अस्येदं कार्यकारणसम्बन्धश्चावयवाद्भवति २ एतेन शाब्दं व्याख्यातम् ३ हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् ४ अस्येदं बुद्ध्यपेक्षितत्वात् ५ आत्ममनसोः संयोगविशेषात्संस्काराच्च स्मृतिः ६ तथा स्वप्नः ७ स्वप्नान्तिकम् ८ धर्माच्च ९ इन्द्रियदोषात्संस्कारदोषाच्चाविद्या १० तद्दुष्टज्ञानम् ११ अदुष्टं विद्या १२ आर्षं सिद्धदर्शनं च धर्मेभ्यः १३

इति द्वितीय आह्निकः इति नवमोऽध्यायः

दशमोऽध्यायः प्रथम आह्निकः

इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः १ संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः २ तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्याम् ३ अभूदित्यपि ४ सति च कार्यादर्शनात् ५ एकार्थसमवायिकारणान्तरेषु दृष्टत्वात् ६ एकदेशे इत्येकस्मिञ्शिरः पृष्ठमुदरं मर्माणि तद्विशेषस्तद्विशेषेभ्यः ७ इति प्रथम आह्निकः

दशमोऽध्यायः द्वितीय आह्निकः

कारणमिति द्रव्ये कार्यसमवायात् १ संयोगाद्वा २ कारणे समवायात्कर्माणि ३ तथा रूपे कारणैकार्थसमवायाच्च ४ कारणसमवायात्संयोगः पटस्य ५ कारणकारणसमवायाच्च ६ संयुक्तसमवायादग्नेर्वैशेषिकम् ७ दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय ८ तद्वचनादाम्नायस्य प्रामाण्यमिति ९ इति द्वितीय आह्निकः

इति दशमोऽध्यायः इति वैशेषिकदर्शनम्

Discussion: Śhaṅkara-Miśhra Sūtrapāṭha, characterized by very concise *Sūtras*.

Reference: Gough, Archibald Edward, *The Vaiśeshika aphorisms of Kanāda*, (New Delhi: Oriental Books Reprint Corp., 1975).[Originally published in 1873 by E.J. Lazarus & Co., Benares.]

## Branch 8: Vaiśheṣhika Darśhanam--long *Sūtra* recension.

Structure: 7 chapters with 2 divisions each and 3 chapters (8 - 10) with no divisions.

Beginning:

वैशेषिकसूत्रम्   प्रथमस्याध्यायस्य प्रथममाह्निकम्

अथातो धर्मं व्याख्यास्यामः १ यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः २ तद्वचनादाम्नायप्रामाण्यम् ३ पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ४ रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयो-गविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गुणाः ५ उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ६ सदनित्यं द्रव्य-वत्कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः ७ द्रव्याणि द्रव्यान्तरमारभन्ते ८ गुणाश्च गुणान्तरम् ९ कर्म कर्मसाध्यं न विद्यते १० कार्याविरोधि द्रव्यं कारणाविरोधि च ११ उभयथा गुणः १२ कार्यविरोधि कर्म १३ क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणम् १४ द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् १५ एकद्रव्य-मगुणं संयोगविभागेष्वनपेक्षं कारणमिति कर्मलक्षणम् १६ द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् १७ तथा गुणः १८ संयोगविभागानां कर्म १९ न द्रव्याणां व्यतिरेकात् २० गुणवैधर्म्यान्न कर्मणाम् २१ द्रव्याणां द्रव्यं कार्यं सामान्यम् २२ द्वित्वप्रभृतयश्च सङ्ख्याः पृथक्त्वं संयोगविभागाश्च २३ अस-मवायात्सामान्यं कर्म कार्यं न विद्यते २४ संयोगानां द्रव्यम् २५ रूपाणां रूपम् २६ गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् २७ संयोगविभागाः कर्मणाम् २८ कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तमिति २९

प्रथमस्याध्यायस्याद्यमाह्निकम् ।

प्रथमस्याध्यायस्य द्वितीयमाह्निकम्

कारणाभावात्कार्याभावः १ न तु कार्याभावात्कारणाभावः २ सामान्यं विशेष इति बुद्ध्यपेक्षम् ३ भावः सामान्यमेव ४ द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्च ५ अन्यत्रान्त्येभ्यो विशेषेभ्यः ६ सदिति यतो द्रव्यगुणकर्मसु ७ द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ८ एकद्रव्यवत्त्वान्न द्रव्यम् ९ गुणकर्मसु च भावान्न कर्म न गुणः १० सामान्यविशेषाभावाच्च ११

Branch 8: Vaiśheṣhika Darśhanam--long *Sūtra* recension continued

Ending:

नास्ति घटो गेह इति सतो घटस्य गेहसंयोगप्रतिषेधः १० नास्त्यन्यश्चन्द्रमा इति सामान्याच्चन्द्रमसः प्रतिषेधः ११ सदसतोर्वैधर्म्यात्कार्ये सदसत्ता न १२ आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम् १३ तथा द्रव्यान्तरेषु १४ आत्मेन्द्रियमनोर्थसन्निकर्षाच्च १५ तत्समवायात्कर्मगुणेषु १६ आत्मसमवायादात्मगुणेषु १७ अस्येदं कार्यं कारणं सम्बन्धि एकार्थसमवायि विरोधि चेति लैङ्गिकम् १८ एतेन शाब्दं व्याख्यातम् १९ हेतुरपदेशो लिङ्गं निमित्तं प्रमाणं कारणमित्यनर्थान्तरम् २० अस्येदमिति बुद्ध्यपेक्षत्वात् २१ आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृति २२ तथा स्वप्नः स्वप्नान्तिकं च २३ धर्माच्च २४ इन्द्रियदोषात् संस्काराच्चाविद्या २५ तद्दुष्टं ज्ञानम् २६ अदुष्टं विद्या २७ आर्षं सिद्धदर्शनं च धर्मेभ्यः २८ इति नवमोऽध्यायः

दशमोऽध्यायः

आत्मसमवायः सुखदुःखयोः पञ्चभ्योऽर्थान्तरत्वे हेतुस्तदाश्रयिभ्यश्च गुणेभ्यः १ इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः २ संशयनिर्णययोरर्थान्तरभावश्च ज्ञानान्तरत्वे हेतुः ३ तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां ज्ञानाभ्यां व्याख्याता ४ भूतमिति प्रत्यक्षं व्याख्यातम् ५ भविष्यतीति कार्यान्तरे दृष्टत्वात् ६ तथा भवतीति सापेक्षेभ्योऽनपेक्षेभ्यश्च ७ अभूदित्यभूतात् ८ सति च कार्यासमवायात् ९ एकार्थसमवायिषु कारणान्तरेषु दर्शनादेकदेश इत्येकस्मिन् १० शिरः पृष्टमुदरं पाणिरिति तद्विशेषेभ्यः ११ कारणमिति द्रव्ये कार्यसमवायात् १२ संयोगाद्वा १३ कारणसमवायात्कर्मणि १४ तथा रूपे कारणकारणसमवायाच्च १५ कारणसमवायात्संयोगे १६ तथा कारणाकारणसमवायाच्च १७ संयुक्तसमवायादग्नेर्वैशेषिकम् १८ लैङ्गिकं प्रमाणं व्याख्यातम् १९ दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय २० तद्वचनादाम्नायप्रामाण्यमिति २१

इति वैशेषिकसूत्रवृत्तिः समाप्ता

Discussion: Chandrānanda Sūtrapāṭha, characterized by longer *Sūtras*.

Reference: Jambuvijayaji, Muni Śrī, *Vaiśeshikasūtra of Kanāda with the Commentary of Candrānanda*, (Baroda: Oriental Institute, 1982).[Originally published in 1873 by E.J. Lazarus & Co., Benares.]

## Branch 9: Sāṃkhya Darśhanam

Structure: 6 Chapters

Beginning:

सांख्य दर्शनम्   प्रथमोऽध्यायः

अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः १ न दृष्टात्तत्सिद्धिर्निवृत्तेरप्यनुवृत्तिदर्शनात् २ प्रात्यहिकक्षुत्प्रतीकारवत्तत्प्रतीकारचेष्टनात्पुरुषार्थत्वम् ३ सर्वासम्भवात्सम्भवेऽपि सत्त्वासम्भवाद्धेयः प्रमाणकुशलैः ४ उत्कर्षादपि मोक्षस्य सर्वोत्कर्षश्रुतेः ५ अविशेषश्चोभयोः ६ न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः ७ स्वभावस्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यम् ८ नाशक्योपदेशविधिरुपदिष्टेऽप्यनुपदेशः ९ शुक्लपटवद्बीजवच्चेत् १० शक्त्युद्भवानुद्भवाभ्यां नाशक्योपदेशः ११ न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात् १२ न देशयोगतोऽप्यस्मात् १३ नावस्थातो देहधर्मत्वात्तस्याः १४ असङ्गोऽयं पुरुष इति १५ न कर्मणान्यधर्मत्वादतिप्रसक्तेश्च १६ विचित्रभोगानुपपत्तिरन्यधर्मत्वे १७ प्रकृतिनिबन्धनाच्चेन्न तस्या अपि पारतन्त्र्यम् १८ न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते १९ नाविद्यातोऽप्यवस्तुना बन्धायोगात् २० वस्तुत्वे सिद्धान्तहानिः २१ विजातीयद्वैतापत्तिश्च २२ विरुद्धोभयरूपा चेत् २३ न तादृक्पदार्थाप्रतीतेः २४ न वयं षट्पदार्थवादिनो वैशेषिकादिवत् २५ अनयितत्वेऽपि नायौक्तिकस्य संग्रहोऽन्यथा बालोन्मत्तादिसमत्वम् २६ नानादिविषयोपरागनिमित्तकोऽप्यस्य २७ न बाह्याभ्यन्तरयोरुपरज्योपरञ्जकभावोऽपि देशव्यवधानाच्छ्रुघ्नस्थपाटलिपुत्रस्थयोरिव २८ द्वयोरेकदेशलब्धोपरागान्न व्यवस्था २९ अदृष्टवशाच्चेत् ३० न द्वयोरेककालायोगादुपकार्योपकारकभावः ३१ पुत्रकर्मवदिति चेत् ३२ नास्ति हि तत्र स्थिर एकात्मा यो गर्भाधानादिना संस्क्रियेत ३३ स्थिरकार्यासिद्धेः क्षणिकत्वम् ३४ न प्रत्यभिज्ञाबाधात् ३५ श्रुतिन्यायविरोधाच्च ३६ दृष्टान्तासिद्धेश्च ३७ युगपज्जायमानयोर्न कार्यकारणभावः ३८ पूर्वापाय उत्तरायोगात् ३९ तद्भावे तदयोगादुभयव्यभिचारादपि न ४० पूर्वभावमात्रे न नियमः ४१ न विज्ञानमात्रं बाह्यप्रतीतेः ४२ तदभावे तदभावाच्छून्यं तर्हि ४३ शून्यं तत्त्वं भावो विनश्यति वस्तुधर्मत्वाद्विनाशस्य ४४ अपवादमात्रमबुद्धानाम् ४५

Branch 9: Sāṃkhya Darśhanam continued

Ending:

प्रकृतेराद्योपादानतान्येषां कार्यत्वश्रुतेः ३२ नित्यत्वेऽपि नात्मनो योग्यत्वाभावात् ३३ श्रुतिविरोधान्न कुतर्कापसदस्यात्मलाभः ३४ पारम्पर्येऽपि प्रधानानुवृत्तिरणुवत् ३५ सर्वत्र कार्यदर्शनाद्विभुत्वम् ३६ गतियोगेऽप्याद्यकारणताहानिरणुवत् ३७ प्रसिद्धाधिक्यं प्रधानस्य न नियमः ३८ सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात् ३९ अनुपभोगेऽपि पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुन्नमवहनवत् ४० कर्मवैचित्र्यात्सृष्टिवैचित्र्यम् ४१ साम्य-वैषम्याभ्यां कार्यद्वयम् ४२ विमुक्तबोधान्न सृष्टिः प्रधानस्य लोकवत् ४३ नान्योपसर्पणेऽपि मुक्तोपभोगो निमित्ताभावात् ४४ पुरुषबहुत्वं व्यवस्थातः ४५ उपाधिश्चेत्तत्सिद्धौ पुनर्द्वैतम् ४६ द्वाभ्यामपि प्रमाणविरोधः ४७ द्वा-भ्यामप्यविरोधान्न पूर्वमुत्तरं च साधकाभावात् ४८ प्रकाशतस्तत्सिद्धौ कर्म-कर्तृविरोधः ४९ जडव्यावृत्तो जडं प्रकाशयति चिद्रूपः ५० न श्रुतिविरोधो रागिणां वैराग्याय तत्सिद्धेः ५१ जगत्सत्यत्वमदुष्टकारणजन्यत्वाद्बाधका-भावात् ५२ प्रकारान्तरासम्भवात्सदुत्पत्तिः ५३ अहंकारः कर्ता न पुरुषः ५४ चिदवसाना भुक्तिस्तत्कर्मार्जितत्वात् ५५ चन्द्रादिलोकेऽप्यावृत्ति-र्निमित्तसद्भावात् ५६ लोकस्य नोपदेशात्सिद्धिः पूर्ववत् ५७ पारम्पर्येण तत्सिद्धौ विमुक्तिश्रुतिः ५८ गतिश्रुतेश्च व्यापकत्वेऽप्युपाधियोगाद्भोगदेश-काललाभो व्योमवत् ५९ अनधिष्ठितस्य पूतिभावप्रसङ्गान्न तत्सिद्धिः ६० अदृष्टद्वारा चेदसम्बद्धस्य तदसम्भवाज्जलादिवदङ्कुरे ६१ निर्गुणत्वात्तदसम्भ-वादहंकारधर्मा ह्येते ६२ विशिष्टस्य जीवत्वमन्वयव्यतिरेकात् ६३ अहंकारकर्त्रधीना कार्यसिद्धिर्नेश्वराधीना प्रमाणाभावात् ६४ अदृष्टोद्भूतिवत्समानत्वम् ६५ महतोऽन्यत् ६६ कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोऽप्यनादिर्बीजाङ्कुरवत् ६७ अविवेकनिमित्तो वा पञ्चशिखः ६८ लिङ्गशरीरनिमित्तक इति सनन्दनाचार्यः ६९ यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः ७० इति षष्ठोऽध्यायः इति सांख्यदर्शनम्

Reference: Sinha, 1. Nandalal, *The Samkhya Philosophy*, New Delhi: Oriental Books Reprint Corp., 1979). [Originally published in 1915 by Panini Office, Allahabad.]
2. Ballantyne, J.R., *The Sāṃkhya aphorisms of Kapila*, (Delhi: Parimal Publications, 1995).

## Branch 10A: Yoga: Maharṣhi Patañjali Praṇītaṃ Yoga Darśhanam
Structure: 4 Chapters.

Beginning:

महर्षि पतञ्जलि प्रणीतं योगदर्शनम् प्रथमः पादः

अथ योगानुशासनम् १ योगश्चित्तवृत्तिनिरोधः २ तदा द्रष्टुः स्वरूपेऽवस्थानम् ३ वृत्तिसारूप्यमितरत्र ४ वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ५ प्रमाण-विपर्ययविकल्पनिद्रास्मृतयः ६ प्रत्यक्षानुमानागमाः प्रमाणानि ७ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ८ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ९ अभावप्रत्ययालम्बना वृत्तिर्निद्रा १० अनुभूतविषयासम्प्रमोषः स्मृतिः ११ अभ्यासवैराग्याभ्यां तन्निरोधः १२ तत्र स्थितौ यत्नोऽभ्यासः १३ स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः १४ दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् १५ तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् १६ वितर्कविचारानन्दास्मितारूपानुगमात्सम्प्रज्ञातः १७ विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः १८ भवप्रत्ययो विदेहप्रकृतिलयानाम् १९ श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् २० तीव्रसंवेगानामासन्नः २१ मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः २२ ईश्वरप्रणिधानाद्वा २३ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः २४ तत्र निरतिशयं सर्वज्ञबीजम् २५ स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् २६ तस्य वाचकः प्रणवः २७ तज्जपस्तदर्थभावनम् २८ ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च २९ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ३० दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ३१ तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ३२ मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ३३ प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ३४ विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ३५ विशोका वा ज्योतिष्मती ३६ वीतरागविषयं वा चित्तम् ३७ स्वप्ननिद्राज्ञानालम्बनं वा ३८ यथाभिमतध्यानाद्वा ३९ परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ४०

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ४१ तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ४२

Maharṣhi Patañjali Praṇītaṃ Yoga Darśhanam continued

Ending:

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ५५ इति तृतीयः पादः

चतुर्थः पादः

२ निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ३ निर्माणचित्ता-
न्यस्मितामात्रात् ४ प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ५ तत्र ध्यान-
जमनाशयम् ६ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ७ ततस्त-
द्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ८ जातिदेशकालव्यवहिता-
नामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ९ तासामनादित्वं चाशिषो नि-
त्यत्वात् १० हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ११
अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् १२ ते व्यक्तसूक्ष्मा गुणात्मानः
१३ परिणामैकत्वाद्वस्तुतत्त्वम् १४ वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः
१५ न चैकचित्ततन्त्रं चेद्वस्तु तत्प्रमाणकं तदा किं स्यात् १६ तदुपरा-
गापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् १७ सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः
पुरुषस्यापरिणामात् १८ न तत्स्वाभासं दृश्यत्वात् १९ एकसमये चोभया-
नवधारणम् २० चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च २१
चित्तेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् २२ द्रष्टृदृश्योपरक्तं
चित्तं सर्वार्थम् २३ तदसंख्येयवासनाभिश्चित्तमपि परार्थं संहत्यकारित्वात्
२४ विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः २५ तदा विवेकनिम्नं कैव-
ल्यप्राग्भारं चित्तम् २६ तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः २७ हानमेषां
क्लेशवदुक्तम् २८ प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः
समाधिः २९ ततः क्लेशकर्मनिवृत्तिः ३० तदा सर्वावरणमलापेतस्य
ज्ञानस्यानन्त्याज्ज्ञेयमल्पम् ३१ ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्
३२ क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ३३ पुरुषार्थशून्यानां
गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ३४

इति चतुर्थः पादः इति महर्षि पतञ्जलि प्रणीतं योगदर्शनम्

Reference: Nader, Tony, *Human Physiology: Expression of Veda and the Vedic Literature: Modern Science and Ancient Vedic Science Discover the Fabrics of Immortality in the Human Physiology*, Fourth Edition, (Vlodrop: Maharishi Vedic University, July, 2000), pp. 158-172.

## Branch 10B: Yoga: Śhiva Sūtras
Structure: 3 Chapters.

Beginning:

चैतन्यमात्मा १ ज्ञानं बन्धः २ योनिवर्गः कलाशरीरम् ३ ज्ञानाधिष्ठानं मातृका ४ उद्यमो भैरवः ५ शक्तिचक्रसंधाने विश्वसंहारः ६ जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभवः ७ ज्ञानं जाग्रत् ८ स्वप्नो विकल्पाः ९ अविवेका मायासौषुप्तम् १० त्रितयभोक्ता वीरेशः ११ विस्मयो योगभूमिकाः १२ इच्छा शक्तिरुमा कुमारी १३ दृश्यं शरीरम् १४ हृदये चित्तसंघट्टाद्दृश्यस्वापदर्शनम् १५ शुद्धतत्त्वसंधानाद्वाऽपशुशक्तिः १६ वितर्क आत्मज्ञानम् १७ लोकानन्दः समाधिसुखम् १८ शक्तिसन्धाने शरीरोत्पत्तिः १९ भूतसंधानभूतपृथक्त्वविश्वसंघट्टाः २० शुद्धविद्योदया-च्चक्रेशत्वसिद्धिः २१ महाह्रदानुसंधानान्मन्त्रवीर्यानुभवः २२ इति प्रथम उन्मेषः

चित्तं मन्त्रः १ प्रयत्नः साधकः २ विद्याशरीरसत्ता मन्त्ररहस्यम् ३ गर्भे चित्तविकासोऽविशिष्टविद्यास्वप्नः ४ विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था ५ गुरुरुपायः ६ मातृकाचक्रसम्बोधः ७ शरीरं हविः ८ ज्ञानमन्नम् ९ विद्यासंहारे तदुत्थस्वप्नदर्शनम् १० इति द्वितीय उन्मेषः

आत्मा चित्तम् १ ज्ञानं बन्धः २ कलादीनां तत्त्वानामविवेको माया ३ शरीरे संहारः कलानाम् ४ नाडीसंहारभूतजयभूतकैवल्यभूतपृथक्त्वानि ५ मोहावरणात्सिद्धिः ६ मोहजयादनन्ताभोगात्सहजविद्याजयः ७ जाग्रद्द्वितीयकरः ८ नर्तक आत्मा ९ रङ्गोऽन्तरात्मा १० प्रेक्षकाणीन्द्रियाणि ११ धीवशात्सत्त्वसिद्धिः १२ सिद्धः स्वतन्त्रभावः १३ यथा तत्र तथान्यत्र १४ बीजावधानम् १५ आसनस्थः सुखं ह्रदे निमज्जति १६ स्वमात्रानिर्माणमापादयति १७ विद्याऽविनाशे जन्मविनाशः १८ कवर्गादिषु माहेश्वर्याद्याः पशुमातरः १९ त्रिषु चतुर्थं तैलवदासेच्यम् २० मग्नः स्वचित्तेन प्रविशेत् २१ प्राणसमाचारे समदर्शनम् २२ मध्येऽवरप्रसवः २३ मात्रास्वप्रत्ययसंधाने नष्टस्य पुनरुत्थानम् २४

Branch 10B: Yoga Śhiva Sūtras

Continued:

शिवतुल्यो जायते २५ शरीरवृत्तिर्व्रतम् २६ कथा जपः २७ दान-मात्मज्ञानम् २८ योऽविपस्थो ज्ञाहेतुश्च २९ स्वशक्तिप्रचयोऽस्य विश्वम् ३० स्थितिलयौ ३१ तत्प्रवृत्तावप्यनिरासः संवेत्तृभावात् ३२ सुखदुःखयो-र्बहिर्मननम् ३३ तद्विमुक्तस्तु केवली ३४ मोहप्रतिसंहतस्तु कर्मात्मा ३५ भेदतिरस्कारे सर्गान्तरकर्मत्वम् ३६ करणशक्तिः स्वतोऽनुभवात् ३७ त्रिपदाद्यनुप्राणनम् ३८ चित्तस्थितिवच्छरीरकरणबाह्येषु ३९ अभिलाषा-द्बहिर्गतिः संवाह्यस्य ४० तदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः ४१ भूतक-ञ्चुकी तदा विमुक्तो भूयः पतिसमः परः ४२ नैसर्गिकः प्राणसंबन्धः ४३ नासिकान्तर्मध्यसंयमात्किमत्र सव्यापसव्यसौषुम्नेषु ४४ भूयः स्यात्प्रति-मीलनम् ४५ इति तृतीय उन्मेषः

Reference:
Singh, Jaideva, *Śiva Sūtras: The Yoga of Supreme Identity*, (Delhi: Motilal Banarsidass, 1991).

## Branch 10C: Yoga: Śhiva Saṃhitā

Structure: 517 verses, distributed among five chapters.

Beginning:

एकं ज्ञानं नित्यमाद्यन्तशून्यं नान्यत्किञ्चिद्वर्त्तते ते वस्तु सत्यम्
यद्भेदोस्मिन्निन्द्रियोपाधिना वै ज्ञानस्यायं भासते नान्यथैव १
अथ भक्तानुरक्तोऽहं वक्ति योगानुशासनम्
ईश्वरः सर्वभूतानामात्ममुक्तिप्रदायकः २
त्यक्त्वा विवादशीलानां मतं दुर्ज्ञानहेतुकम्
आत्मज्ञानाय भूतानामनन्यगतिचेतसाम् ३
सत्यं केचित्प्रशंसन्ति तपः शौचं तथापरे
क्षमां केचित्प्रशंसंति तथैव सममार्जवम् ४
केचिद्दानं प्रशंसन्ति पितृकर्म तथापरे
कचित्कर्म प्रशंसन्ति केचिद्वैराग्यमुत्तमम् ५
केचिद्गृहस्थकर्माणि प्रशंसन्ति विचक्षणाः
अग्निहोत्रादिकं कर्म तथा केचित्परं विदुः ६
मन्त्रयोगं प्रशंसन्ति केचित्तीर्थानुसेवनम्
एवं बहूनुपायांस्तु प्रवदन्ति हि मुक्तये ७
एवं व्यवसिता लोके कृत्याकृत्यविदो जनाः
व्यामोहमेव गच्छंति विमुक्ताः पापकर्मभिः ८
एतन्मतावलम्बी यो लब्ध्वा दुरितपयके
भ्रमतीत् अवशः सोऽत्र जन्ममृत्युपरम्पराम् ९
अन्यैर्मतिमतां श्रेष्ठैर्गुप्तालोकनतत्परैः
आत्मानो बहवः प्रोक्ता नित्याः सर्वगतास्तथा १०
यद्यत्प्रत्यक्षविषयं तदन्यन्नास्ति चक्षते
कुतः स्वर्गादयः सन्तीत्यन्ये निश्चितमानसाः ११
शानप्रवाह इत्यन्ये शून्यं केचित्परं विदुः
द्वावेव तत्त्वं मन्यन्तेऽपरे प्रकृतिपूरुषौ १२
अत्यन्तभिन्नमतयः परमार्थपराङ्मुखाः
एवमन्ये तु संचिन्त्य यथामति यथाश्रुतम् १३

Branch 10C: Yoga: Śhiva Saṃhitā continued

Ending:

साधकस्तु भवेद्योगी त्रैलोक्ये सोऽतिदुर्लभः २०४
त्रिपुरे त्रिपुरन्त्वेकं शिवं परमकारणम्
अक्षयं तत्पदं शान्तमप्रमेयमनामयम् ॥
लभतेऽसौ न सन्देहो धीमान्सर्वमभीप्सितम् २०५
शिवविद्या महाविद्या गुप्ता चाग्रे महेश्वरी
मद्भाषितमिदं शास्त्रं गोपनीयमतो बुधैः २०६
हठविद्या परंगोप्या योगिना सिद्धिमिच्छता
भवेद्वीर्यवती गुप्ता निर्वीर्या च प्रकाशिता २०७
य इदं पठते नित्यमाद्योपान्तं विचक्षणः
योगसिद्धिर्भवेत्तस्य क्रमेणैव न संशयः ॥
समोक्षं लभते धीमान्य इदं नित्यमर्चयेत् २०८
मोक्षार्थिभ्यश्च सर्वेभ्यः साधुभ्यः श्रावयेदपि
क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथम्भवेत् २०९
तस्मात्क्रियाविधानेन कर्तव्या योगिपुंगवैः
यदृच्छालाभसन्तुष्टः सन्त्यक्त्वान्तरसंज्ञकः ॥
गृहस्थश्चाप्यनासक्तः स मुक्तो योगसाधनात् २१०
गृहस्थानां भवेत्सिद्धिरीश्वराणां जपेन वै ।
योगक्रियाभियुक्तानां तस्मात्संयतते गृही २११
गेहे स्थित्वा पुत्रदारादिपूर्णः
सङ्गं त्यक्त्वा चान्तरे योगमार्गे ।
सिद्धेश्चिह्नं वीक्ष्य पश्चाद् गृहस्थः
क्रीडेत्सो वै मम्मतं साधयित्वा २१२
इति श्रीशिवसंहितायां हरगौरीसंवादे योगशास्त्रे पंचमः पटलः समाप्तः ५
शुभम्

Reference:

Vasu, Rai Bahadur Srisa Chandra, tr., *The Śiva Saṃhitā*, (New Delhi: Oriental Books Reprint Corp., 1979).

## Branch 10D: Yoga: Vjñānabhairava

Structure: 163 verses.

Beginning:

श्रीदेव्युवाच
श्रुतं देव मया सर्वं रुद्रयामलसम्भवम्
त्रिकभेदमशेषेण सारात्सारविभागशः १
अद्यापि न निवृत्तो मे संशयः परमेश्वर
किं रूपं तत्त्वतो देव शब्दराशिकलामयम् २
किं वा नवात्मभेदेन भैरवे भैरवाकृतौ
त्रिशिरोभेदभिन्नं वा किं वा शक्तित्रयात्मकम् ३
नादबिन्दुमयं वापि किं चन्द्रार्धनिरोधिकाः
चक्रारूढमनच्कं वा किं वा शक्तिस्वरूपकम् ४
परापरायाः सकलमपरायाश्च वा पुनः
पराया यदि तद्वत्स्यात् परत्वं तद्विरुध्यते ५
नहि वर्णविभेदेन देहभेदेन वा भवेत्
परत्वं निष्कलत्वेन सकलत्वे न तद्भवेत् ६
प्रसादं कुरु मे नाथ निःशेषं छिन्धि संशयम्
भैरव उवाच
साधु साधु त्वया पृष्टं तन्त्रसारमिदं प्रिये ७
गूहनीयतमं भद्रे तथापि कथयामि ते
यत्किञ्चित्सकलं रूपं भैरवस्य प्रकीर्तितम् ८
तदसारतया देवि विज्ञेयं शक्रजालवत्
मायास्वप्नोपमं चैव गन्धर्वनगरभ्रमम् ९
ध्यानार्थं भ्रान्तबुद्धीनां क्रियाडम्बरवर्तिनाम्
केवलं वर्णितं पुंसां विकल्पनिहतात्मनाम् १०
तत्त्वतो न नवात्मासौ शब्दराशिर्न भैरवः
न चासौ त्रिशिरा देवो न च शक्तित्रयात्मकः ११
नादबिन्दुमयो वापि न चन्द्रार्धनिरोधिकाः
न चक्रक्रमसंभिन्नो न च शक्तिस्वरूपकः १२

Branch 10D: Yoga: Vijñānabhairava

Ending:

यैरेव पूज्यते द्रव्यैस्तर्प्यते वा परापरः
यश्चैव पूजकः सर्वः स एवैकः क्व पूजनम् १५३
व्रजेत्प्राणो विशेज्जीव इच्छया कुटिलाकृतिः
दीर्घात्मा सा महादेवी परक्षेत्रं परापरा १५४
अस्यामनुचरन् तिष्ठन् महानन्दमयेऽध्वरे
तया देव्या समाविष्टः परं भैरवमाप्नुयात् १५५
सकारेण बहिर्याति हकारेण विशेत् पुनः
हंसहंसेत्यमुं मंत्रं जीवो जपति नित्यशः १५५
षट्शतानि दिवा रात्रौ सहस्रयेकविंशतिः
जपो देव्याः समुद्दिष्टः सुलभो दुर्लभैः १५६
इत्येतत्कथितं देवि परमामृतमुत्तमम्
एतच्च नैव कस्यापि प्रकाश्यं तु कदाचन १५७
परशिष्ये खले क्रूरे अभक्ते गुरुपादयोः
निर्विकल्पमतीनां तु वीराणामुन्नतात्मनाम् १५८
भक्तानां गुरुवर्गस्य दातव्यं निर्विशङ्कया
ग्रामो राज्यं पुरं देशः पुत्रदारकुटुम्बकम् १५९
सर्वमेतत्परित्यज्य ग्राह्यमेतन्मृगेक्षणे
किमेभिरस्थिरैर्देवि स्थिरं परमिदं धनम् १६०
प्राणा अपि प्रदातव्या न देयं परमामृतम्
श्रीदेवी उवाच
देवदेव महादेव परितृप्तास्मि शङ्कर १६१
रुद्रयामलतन्त्रस्य सारमद्यावधारितम् ।
सर्वशक्तिप्रभेदानां हृदयं ज्ञातमद्य च १६२
इत्युक्त्वानन्दिता देवी कण्ठे लग्ना शिवस्य तु १६३

Reference: Singh, Jaideva, *Vijñānabhairava or Divine Consciousness, A Treasury of 112 Types of Yoga*, (Delhi: Motilal Banarsidass, 1993).

## Branch 11A: Karma Mīmāṃsā: Karma Kāṇḍa

Structure: 12 chapters, with a total of 60 sections.

Beginning:

महर्षि जैमिनि प्रणीतं कर्म मीमांसा दर्शनम् प्रथमोऽध्यायः प्रथमः पादः
अथातो धर्मजिज्ञासा १ चोदनालक्षणोऽर्थो धर्मः २ तस्य निमित्तपरीष्टिः ३ सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ४ औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ५ कर्मैके तत्र दर्शनात् ६ अस्थानात् ७ करोति शब्दात् ८ सत्त्वान्तरे यौगपद्यात् ९ प्रकृतिविकृत्योश्च १० वृद्धिश्च कर्तृभूम्नास्य ११ समं तु तत्र दर्शनम् १२ सतः परमदर्शनं विषयानागमात् १३ प्रयोगस्य परम् १४ आदित्यवद्यौगपद्यम् १५ वर्णान्तरमविकारः १६ नादवृद्धिपरा १७ नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् १८ सर्वत्र यौगपद्यात् १९ संख्याभावात् २० अनपेक्षत्वात् २१ प्रख्याभावाच्च योगस्य २२ लिङ्गदर्शनाच्च २३ उत्पत्तौ वावचनाः स्युरर्थस्यातन्निमित्तत्वात् २४ तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् २५ लोके संनियमात्प्रयोगसंनिकर्षः स्यात् २६ वेदांश्चैके संनिकर्षं पुरुषाख्याः २७ अनित्यदर्शनाच्च २८ उक्तन्तु शब्दपूर्वत्वम् २९ आख्या प्रवचनात् ३० परन्तु श्रुतिसामान्यमात्रम् ३१ कृते वा विनियोगः स्यात्कर्मणः सम्बन्धात् ३२ इति प्रथमः पादः

द्वितीयः पादः

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते १ शास्त्रदृष्टविरोधाच्च २ तथाफलाभावात् ३ अन्यानर्थक्यात् ४ अभागिप्रतिषेधाच्च ५ अनित्यसंयोगात् ६ विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः ७ तुल्यं च साम्प्रदायिकम् ८ अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधस्स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत ९ गुणवादस्तु १० रूपात्प्रायात् ११ दूरभूयस्त्वात् १२ स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनम् १३ आकालिकेप्सा १४ विद्याप्रशंसा १५ सर्वत्वमाधिकारिकम् १६ फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यात् १७ अन्त्ययोर्यथोक्तम् १८ विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् १९ लोकवदिति चेत् २० न पूर्वत्वात् २१

Branch 11A: Karma Mīmāṃsā: Karma Kāṇḍa

Ending:

संस्कारे च तत्प्रधानत्वात् ८ संख्यासु तु विकल्पः स्याच्छ्रुतिप्रतिषेधात् ९ द्रव्यविकारात्तु पूर्ववदर्थकर्म स्यात्तया विकल्पेन नियमप्रधानत्वात् १० द्रव्यत्वेऽपि समुच्चयो द्रव्यस्य कर्मनिष्पत्तेः प्रतिपशुकर्मभेदादेवं सति यथाप्रकृति ११ कपालेऽपि तथेति चेत् १२ न कर्मणः परार्थत्वात् १३ प्रतिपत्तिस्तु शेषत्वात् १४ शृतेऽपि पूर्ववत्स्यात् १५ विकल्पोऽन्वर्थकर्म-नियमप्रधानत्वाच्छेषे च कर्मकार्यसमवायात्तस्मात्तेनार्थकर्म स्यात् १६ उखायां काम्यनित्यसमुच्चयो नियोगे कामदर्शनात् १७ असति चासंस्कृतेषु कर्म स्यात् १८ तस्य च देवतार्थत्वात् १९ विकारो वा नित्यस्याग्नेः काम्येन तदुक्तहेतुः २० वचनादसंस्कृतेषु कर्म स्यात् २१ संसर्गे चापि दोषः स्यात् २२ वचनादिति चेदथेतरस्मिन्नुत्सर्गापरिग्रहः कर्मणः कृतत्वात् २३ स आहवनीयः स्यादाहुतिसंयोगात् २४ अन्यो वोद्धृत्याहरणात्तस्मिन्तु संस्कार-कर्म शिष्टत्वात् २५ स्थानात्तु परिलुप्येरन् २६ नित्यधारणे विकल्पो न ह्यकस्मात्प्रतिषेधः स्यात् २७ नित्यधारणाद्वा प्रतिषेधो गतश्रियः २८ परार्थान्येकः प्रतियन्तिवत्सत्राहीनयो यजमानगणेऽनियमोऽविशेषात् २९ मुख्यो वाविप्रतिषेधात् ३० सत्रे गृहपतिरसंयोगाद्धौत्रवदाम्नायवचनाच्च ३१ सर्वैः वा तदर्थत्वात् ३२ गृहपतिरिति च समाख्या सामान्यात् ३३ विप्रतिषेधे परम् ३४ हौत्रे परार्थत्वात् ३५ वचनं परम् ३६ प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात् ३७ स्मृतेर्वा स्याद्ब्राह्मणानाम् ३८ फलचमसविधानाच्चेतरेषाम् ३९ सांनाय्येऽप्येवं प्रतिषेधः सौमपीथहेतुत्वात् ४० चतुर्धाकरणे च निर्देशात् ४१ अन्वाहार्ये च दर्शनात् ४२

इति चतुर्थः पादः इति द्वादशोऽध्यायः

References:

Sandal, Mohan Lal, *Introduction to the Mimamsa Sutras of Jaimini*, (Allahabad: Panini Office, 1925).

P. Gaṇeśaśāstrī Jośī, *Śrīmajjaiminipraṇīte Mīmāṃsādarśane*, 6 vol. (Ānandāśrama-saṃskṛtagranthāvaliḥ, 1981).

K.P. Bahadur, *Wisdom of Meemaansaa*, (New Delhi: Sterling Publishers, 1983).

Branch 11B: Karma Mīmāṃsā: Saṃkarṣha Kāṇḍa
Structure: 4 chapters, with a total of 16 sections.
Beginning:

अथ श्रीजैमिनिमुनिप्रणीतः सङ्कर्षकाण्डः प्रथमाध्याये प्रथमः पादः अनुयजतीत्यनुवषट्कारश्चोद्यते १ स द्रोणकलशात् इज्येत सर्वार्थत्वात् यथाऽऽज्यार्था ध्रुवायाः २ विभक्तानि हवींषि तथा कर्माणि कर्मसंयोगात्पुनरिज्या ३ लिङ्गदर्शनाच्च ४ तन्त्रं प्रदानमेकदेवतत्वाद्यथा दर्शपूर्णमासयोः ५ एककालं तु न भवत्येवेदं कालपृथक्त्वात् ६ सवनभेदाच्च ७ अनुशब्दार्थवत्त्वाच्च ८ आवृत्तिं च दर्शयति ९ एतेन भक्षाश्च व्याख्याताः १० शामित्रं तीर्त्वोत्सृजेदिति कार्ष्णाजिनिः तन्त्रमध्रिगुः पर्यग्निकृतानिति चोद्यते ११ अनन्तरं वा पर्यग्निकरणात् किं प्रत्यक्षां श्रुतिमतिक्रामेद्यथा न प्रयाजा इज्यन्त इति नैकदेशप्रतिषेधः १२ अग्निं चित्वा सौत्रामण्या यजेतेति तत्संयोगेन चोदनात् १३ चयनाङ्गं वा तत्संयोगेन चोदनात् १४ क्रत्वङ्गं वा चित्वेत्यङ्गे नोपपद्यते यथैता एव निर्वपेदीजान इति १५ सा तदपवर्गे क्रियेत यथा संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति १६ अग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यात् इत्येतेन व्याख्यातम् १७ चयनाङ्गं वाऽविप्रतिषेधात् अङ्गदक्षिणा च रथन्तरे वरं ददाति इति १८ अर्थवादसामर्थ्याच्च १९ योऽग्निं चिनुयात् तं दक्षिणाभी राधयेदित्येतेन व्याख्यानम् २० क्रत्वङ्गं वा प्रयोगश्रुतिसंयोगात् २१ गुणचोदना वा प्रीत्याचिख्यासा २२ उल्मुकहरणे रक्षोपहननं श्रूयते तत्प्राजापत्येष्वावर्तेत तत्कालपृथक्त्वात् २३ श्रपणार्थं तु हरणं प्रातस्सवने पुनस्साधारणं कर्म कृतम् २४ एतेने वपाया अग्रतःप्रत्याहरणं व्याख्यातं अविप्रतिषिद्धो हि तस्मिन् श्रपणार्थः २५ अभितो वपां जुहोतीति देशवादो यथा अभितो वृक्षं निधेहीति २६ कर्मवादो वा प्रकरणात् २७ लिङ्गदर्शनाच्च २८ अभितः पुरोडाशमाहुती जुहोतीत्येतेन व्याख्यातम् २९ हविष्कृदेहीत्यध्वर्युरुच्यते प्रकरणात् ३० वाग्वा श्रुतिसंयोगात् ३१ पत्नी वा विधानात् ३२ यःकश्चिद्वा निर्वचनात् ३३ एतेषां वा वाक्यसन्निधानात् ३४ सर्वकर्मणां दैवी हविष्कृदेहीति अविशेषेण श्रूयते ३५ अवहननार्थं वा यथा पत्नी तुल्या श्रूयते ३६ अर्थवादमात्रं वा वाचो हविष्कृत्त्वं यथाऽश्विनोर्बाहुभ्यां निर्वपामीति ३७

Branch 11B: Karma Mīmāṃsā: Saṃkarṣha Kāṇḍa

Ending:

इन्द्राय वैराजयानुब्रूहीति वैराजस्यर्चमनूच्य वैरूपस्यर्चा यजेत् इन्द्राय शाक्वरायानुब्रूहीति शक्वरीमनूच्य रैवत्या यजेत् इन्द्राय रैवतायानुब्रूहीति रैवतमनूच्य शक्वर्या यजेत् देवताभिर्व्यतिषजति व्यत्यासमन्वाहेति । सामान्येन विहिते पुरोडाशे इन्द्राय राथन्तरायानुब्रूहीति रथन्तरस्य ऋचमनूच्य बृहत ऋच यजेदित्युक्तम् । न बृहत्या वषट्कुर्यात् यदनुबृहत्या वषट्कुर्यात् छन्दांसि --- गमयेत् अनूवाक्ययोश्चत्वार्यक्षराणि याज्यामनूच्य यजति आ-नुष्टुभं च हवा एतत्संपादयति ६ अभि त्वाशूर नोनुमोऽदुग्धा इव धेनवः ईशानमस्य जगतः स्वर्दृशं ईशानमोमित्यनूच्य इन्द्र तस्थुपस्त्वामिद्धि हवामहे इति यजेत् । त्वमिद्धि हवामहे सातावाजस्य कारवः त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठामित्यनूच्य स्वर्वतोऽभित्वा शूर नोनुमोमिति यजेत् । एवमेतद्यथासमाम्नातस्याक्षरक्रमाद्यविरोधेनाक्षरक्रमाणामध्यूहनम् ७ द्वे याज्ये स्यातां तदर्थत्वात् ८ लिङ्गाच्च ९ उभे सप्रणवे स्यातां प्रकृत्युपबन्धात् १० गृहमेधीये देवतावाहनं न विद्यते सामिधेन्यानन्तर्यात् तत्पुनः प्रतिषिध्यते ११ विद्यते वाऽनन्तर्यात् अकारमानन्तर्यं यथा वास्तोष्पतीये १२ वाजिनामावाहनं विद्यते यथान्यासां देवतानाम् १३ हविरनियतत्वाद्वा न विद्यते यथा विष्णोरुरुक्रमस्य १४ एतादृगिति मन्यामहे पुरःप्रवृद्धानां परतन्त्रव्यपेतानां प्रतिषेधः तल्लिङ्गत्वाच्छब्दस्य १५ एकदेवतानां नानादेवतव्यपेतातां तन्त्रमावाहनं विभवात् १६ कालपृथक्त्वादभ्यावर्तेत १७ पशावुत्तमे प्रयाजे स्रुगादापनो न विद्यते संप्रेषितत्वात् १८ विद्यते वाऽन्यकालत्वाद्यथा याज्यासम्प्रैषो यथा याज्यासम्प्रैषः १९

इति सङ्कर्षकाण्डे चतुर्थस्याध्यायस्य चतुर्थः पादः

समाप्तं चेदं सङ्कर्षकाण्डम् इति कर्ममीमांसादर्शनम्

Discussion: The Saṃkarṣha Kāṇḍa of Karma Mīmāṃsā was cited by Śhaṅkara as authentic and authoritative in his *Brahma Sūtra Bhāṣhya*.

Reference: S. Subrahmanya Shastri, ed., *Sankarṣhakāṇḍa: Maharṣhi Jaiminimunina praṇītam Devaswāmiviracitabhāṣhyamanvalitam*, (Madras: University of Madras, 1965).

Sarma, K.V., *Sañkarṣa Kāṇḍa Sūtras of Jaimini*, (Hoshiarpur, Vishveshvaranand Vedic Research Institute, 1963).

## Branch 12: Vedānta Darśhanam

Structure: 4 chapters, with a total of 16 sections.

Beginning:

वेदान्तदर्शनम् प्रथमोऽध्यायः प्रथमः पादः

१ (१) अथातो ब्रह्मजिज्ञासा १

२ (२) जन्माद्यस्य यतः २

३ (३) शास्त्रयोनित्वात् ३

४ (४) तत्तु समन्वयात् ४

५ (५) ईक्षतेर्नाशब्दम् ५ गौणश्चेन्नात्मशब्दात् ६ तन्निष्ठस्य मोक्षोपदेशात् ७ हेयत्वावचनाच्च ८ स्वाप्ययात् ९ गतिसामान्यात् १० श्रुतत्वाच्च ११

६ (६) आनन्दमयोऽभ्यासात् १२ विकारशब्दान्नेति चेन्न प्राचुर्यात् १३ तद्धेतुव्यपदेशाच्च १४ मान्त्रवर्णिकमेव च गीयते १५ नेतरोऽनुपपत्तेः १६ भेदव्यपदेशाच्च १७ कामाच्च नानुमानापेक्षा १८ अस्मिन्नस्य च तद्योगं शास्ति १९

७ (७) अन्तस्तद्धर्मोपदेशात् २० भेदव्यपदेशाच्चान्यः २१

८ (८) आकाशस्तल्लिङ्गात् २२

९ (९) अत एव प्राणः २३

१० (१०) ज्योतिश्चरणाभिधानात् २४ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् २५ भूतादिपादव्यपदेशोपपत्तेश्चैवम् २६ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् २७

११ (११) प्राणस्तथानुगमात् २८ न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् २९ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ३० जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ३१

इति प्रथमः पादः

द्वितीयः पादः

१ (१२) सर्वत्र प्रसिद्धोपदेशात् १ विवक्षितगुणोपपत्तेश्च २

Branch 12: Vedānta Darśhanam

Ending:

५ (१८५) कार्यं बादरिरस्य गत्युपपत्तेः ७ विशेषितत्वाच्च ८
सामीप्यात्तु तद्व्यपदेशः ९ कार्यात्यये तदध्यक्षेण सहातः
परमभिधानात् १० स्मृतेश्च ११ परं जैमिनिर्मुख्यत्वात् १२
दर्शनाच्च १३ न च कार्ये प्रतिपत्त्यभिसंधिः १४

६ (१८६) अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषात्तत्क्रतुश्च
१५ विशेषं च दर्शयति १६ इति तृतीयः पादः

चतुर्थः पादः

१,२ (१८७) सम्पद्याविर्भावः स्वेनशब्दात् १ मुक्तः प्रतिज्ञानात् २
आत्मा प्रकरणात् ३ अविभागेन दृष्टत्वात् ४

३ (१८८) ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ५ चिति तन्मात्रेण
तदात्मकत्वादित्यौडुलोमिः ६ एवमप्युपन्यासात्पूर्वभावा-
दविरोधं बादरायणः ७

४ (१८९) संकल्पादेव तु तच्छ्रुतेः ८ अत एव चानन्याधिपतिः ९

५ (१९०) अभावं बादरिराह ह्येवम् १० भावं जैमिनिर्विकल्पामननात्
११ द्वादशाहवदुभयविधं बादरायणोऽतः १२ तन्वभावे
संध्यवदुपपत्तेः १३ भावे जाग्रद्वत् १४

६ (१९१) प्रदीपवदावेशस्तथा हि दर्शयति १५ स्वाप्ययसम्पत्त्योरन्य-
तरापेक्षमाविष्कृतं हि १६

७ (१९२) जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च १७ प्रत्यक्षोप-
देशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः १८ विकारावर्ति
च तथा हि स्थितिमाह १९ दर्शयतश्चैवं प्रत्यक्षानुमाने २०
भोगमात्रसाम्यलिङ्गाच्च २१ अनावृत्तिः शब्दादनावृत्तिः
शब्दात् २२ इति चतुर्थः पादः इति चतुर्थोऽध्यायः

इति वेदान्तदर्शनम्

Reference:
Swami Gambhirananda, *Brahma-Sūtra-Bhāṣya of Śrī Śaṅkarācārya*, (Calcutta: Advaita Ashrama, 1983).

## Branch 13A: Gandharva Veda Nāṭya Śhāstra

Structure: 37 Chapters.

Beginning:

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् १
समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम् ।
अनध्याये कदाचित्तु भरतं नाट्यकोविदम् २
मुनयः पर्युपास्यैनमात्रेयप्रमुदाः पुरा ।
पप्रच्छुस्ते महात्मानो नियतेन्द्रियबुद्धयः ३
योऽयं भगवता सम्यग्ग्रथितो वेदसम्मितः ।
नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते ४
कत्यङ्गः किंप्रमाणश्च प्रयोगश्चात्म कीदृशः ।
सर्वमेतद्यथातत्त्वं भगवन्वक्तुमर्हसि ५
तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच ततो वाक्यं नाट्ययवेदकथां प्रति ६
भवद्भिः शुचिभिर्भूत्वा तथाऽवहितमानसैः ।
भूयतां नाट्यवेदस्य सम्भवो ब्रह्मनिर्मितः ७
पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवेऽन्तरे
त्रेतायुगेऽथ सम्प्राप्ते मनोर्वैवस्वतस्य तु ८
ग्राम्यधर्मप्रवृत्ते तु कामलोभवशं गते
ईर्ष्याक्रोधादिसंमढे लोके सुखितदुःखिते ९
देवदानवगन्धर्वयक्षरक्षोमहोरगैः
जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते १०
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः
क्रनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत् ११
न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु
तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम् १२
एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च
सस्मार चतुरो वेदान् योगमास्थाय तत्त्ववित् १३

Branch 13A: Gandharva Veda Nāṭya Śhāstra

Ending:

ब्रह्मणा समनुज्ञाताः प्राप्ताः स्वर्गं पुनः सुताः २२
एवमुर्वीतले नाट्यं शिष्यैः समवतारितम्
भरतानां च वंशोऽयं भविष्यं च प्रवर्तितः २३
कोहलादिभिरेवं तु वत्सल्यिधूर्तितैः
मर्त्यधर्मक्रियायुक्तैः कश्चित्कालमवस्थितैः २४
एतच्छास्त्रं प्रणीतं हि नाराणां बुद्धिवर्धनम्
त्रैलोक्यस्य क्रियोपेतं सर्वशास्त्रनिदर्शनम्
मङ्गल्यं ललितं चैव ब्रह्मणो वदनोद्भवम् २५
य इदं श्रृणुयान् नित्यं प्रोक्तं चेदं स्वयम्भुवा
कुर्यात् प्रयोगं यश्चैवमथवाऽधीतवान् नरः २६
या गतिर्वेदविदुषां या गतिर्यज्ञकारिणाम्
या गतिर्दानशीलानां तां गतिं प्राप्नुयाद्धि सः २७
दानधर्मेषु सर्वेषु कीर्त्यते तु महत् फलम्
प्रेक्षणीयप्रदानं हि सर्वदानेषु शस्यते २८
न तथा गन्धमाल्येन देवास्तुष्यन्ति पूजिताः
यथा नाट्प्रयोगस्थैर्नित्यं तुष्यन्ति मङ्गलैः २९
गान्धर्वं चेह नाट्यं च यः सम्यक् परिपालयेत् ।
स ईश्वरगणेशानां लभते सद्गतिं पराम् ३०
एवं नाट्यप्रयोगे बहुविधिविहितं कर्मशास्त्रं प्रणीतं ।
नोक्तं यच्चात्र लोकादनुकृतिकरणात् । संविभाव्यं तु तज्ज्ञैः ॥
किं चान्यत् सम्प्रपूर्णा भवतु वसुमती नष्टदुर्भिक्षरोगा ।
शान्तिर्गोब्राह्मणानां भवतु नरपतिः पातु पृथ्वीं समग्राम् ३१
इति भरतीये नाट्यशास्त्रे गुह्यतत्त्वकथनाध्यायः सप्तत्रिंशः ।
नाट्यशास्त्रम् संपूर्णम् ।

Reference: Joshi, K.L., ed., *Natyasastra of Bharatamuni with the commentary Abhinavabharati by Abhinavaguptacharya*, 4 vols., (Delhi: Parimal Publications, 1989).

## Branch 13B: Gandharva Veda Saṃgītaratnākara

Structure: 7 Chapters

Beginning:

संगीतरत्नाकर । प्रथमः स्वरगताध्यायः ।

ब्रह्मग्रन्थिजमारुतानुगतिना चित्तेन हृत्पङ्कजे
सूरीणामनु रञ्जकः श्रुतिपदं योऽयं स्वयं राजते ।
यस्माद् ग्रामविभागवर्णरचनाऽलङ्कारजातिक्रमो
वन्दे नादतनुं तमुद्धुरजगद्गीतं मुदे शङ्करम् १
अस्ति स्वस्तिगृहं वंशः श्रीमत्काश्मीरसंभवः ।
ऋषेर्वृषगणाज्जातः कीर्त्तिक्षालितदिङ्मुखः २
यज्वभिर्धर्मधीधुर्यैर्वेदसागरपारगैः ।
यो द्विजेन्द्रैरलञ्चक्रे ब्रह्मभिर्भृगतैरिव ३
तत्राभूद्भास्करप्रख्यो भास्करस्तेजसां निधिः ।
अलङ्कर्तुं दक्षिणाशां यश्चक्रे दक्षिणाऽयनम् ४
तस्याभूत्तनयः प्रभूतविनयः श्रीसोढलः प्रौढधी-
र्येन श्रीकरणप्रवृद्धविभवं भूवल्लभं भिल्लमम् ।
आराध्याखिललोकशोकशमनीकीर्त्तिः समासादिता
जैत्रे जैत्रपदं न्यधायि महती श्रीसिङ्घणे श्रीरपि ५
एकः क्ष्मावलये क्षितीश्वरमिलन्मौलीन्द्रनीलावलि-
प्रोदञ्चद्द्युतिचित्रिताङ्घ्रिनखरश्रेणिर्नृपालाग्रणीः ।
श्रीमत्सिङ्घणदेव एव विजयी यस्य प्रतापानलो
विश्वव्याप्यपि दन्दहीति हृदयान्येव द्विषामुद्धुरः ६
तं प्रसाद्य सुधीधुर्यो गुणिनं गुणरागिणम् ।
गुणग्रामेण यो विप्रानुपकारैरतीतृपत् ७
ददौ न किं न किं जज्ञौ न दधौ कां च सम्पदम् ।
कं धर्मं विदधौ नैष न बभौ कैर्गुणैरयम् ८
तस्माद्दुग्धाम्बुधेर्जातः शार्ङ्गदेवः सुधाकरः ।
उपर्युपरि सर्वान्यः सुदौदार्यस्फुरत्करः ९
कृतगुरुपदसेवः प्रीणिताशेषदेवः

Branch 13B: Gandharva Veda Saṃgītaratnākara

Ending:

इत्युक्तास्त्रिविधा भावाः स्थापिनो व्यभिचारिणः
सात्त्विकाश्च रसेषु स्युः सर्वे सर्वेषु सात्त्विकाः १६८१
एकः कार्यो रसः स्थायीं रसानां नाटके सदा
रसास्तदनुयायित्वादन्ये तु व्यभिचारिणः १६८२
विरोधिनो रसास्तेषु संदर्भ्यः पृथगाश्रयः
गुम्भश्चित्रो रसानां स्यान्नाट्ये कुसुमगुम्फवत्
स्थायी तु सूत्रस्थानीयो रसो रसविदां मतः १६८३
सूरिश्रीशार्ङ्गदेवेन नाट्यवेदाम्बुधेरिदम्
समस्तमुद्धतं सारं धीरैरातृप्ति सेव्यताम् १६८४
ग्रन्थे मदीये यदि कश्चिदस्ति गुणस्ततस्तस्य परिग्रहाय
माभ्यर्थये वः सुधियः परेषां गुणोऽणुरप्यद्रिसमो भवत्सु १६८५
सावद्यता वा निरवद्यताऽस्तु ग्रन्थे मयाऽत्र ग्रथिते तया किम्
आराधने वः प्रवणा मतिर्मे सन्तो गुणः कं ननु नातिशेते १६८६
युष्मत्प्रोदक्षमं वस्तु कियत्रास्ति जगत्त्रये
किं तु मत्प्रेमतः सन्तः पुरस्कुरुत मे कृतिम् १६८७
यद्वा पुराणं पन्थानं मुनीनामहमन्वगाम्
स्निह्यन्ति च निसर्गेण सन्तः सन्मार्गगामिनि १६८८
आरिराधयिषोः साधून्किं प्रज्ञाविभवेन मे
राममानन्दयन्ति स्म तिर्यञ्चोऽपि कपीश्वराः १६८९
न विद्यादर्पतो ग्रन्थप्रवृत्तिर्मम किं त्विदम्
विद्वन्मानसवासाय गन्तुं पाथेयमास्थितम् १६९०
इति श्रीमदनवद्यविद्याविनोदश्रीकरणाधिपतिश्रीसोढलदेवनन्दननिः-
शङ्कश्रीशार्ङ्गदेवविरचिते संगीतरत्नाकरे सप्तमो नर्तनाध्यायः समाप्तः ७
समाप्तिमगमदयं कलानिधिसमेतः संगीतरत्नाकरः ।

Reference:
*Saṅgīta Ratnākaraḥ,* 2 vols., (Ānandāśramasaṃskṛtagranthāvaliḥ, 1985).

## Branch 14A: Dhanur Veda Vasiṣhṭha Dhanur Veda

Structure: 4 Main Chapters, approximately 265 verses.
Beginning:

महर्षि वसिष्ठ विरचिता धनुर्वेदसंहिता

अथैकदा विजिगीषुर्विश्वामित्रो राजर्षिर्गुरुवसिष्ठमभ्युपेत्य प्रणम्योवाच ।
ब्रूहि भगवन् धनुर्विद्यां श्रोत्रियाय दृढचेतसे शिष्याय दुष्टशत्रुविनाशाय च ।
तमुवाच महर्षिब्रह्मर्षिप्रवरो वसिष्ठः शृणु भो राजन् विश्वामित्र यां सरहस्य-
धनुर्विद्यां भगवान् सदाशिवः परशुरामायोवाच तामेव सरहस्यां वच्मि ते
हिताय गोब्राह्मणसाधुवेदसंरक्षणाय च यजुर्वेदाथर्व सम्मितां संहिताम्
अथोवाच महादेवो भार्गवाय च धीमते
तत्तेऽहं संप्रवक्ष्यामि यथातथ्येन संशृणु १
तत्र चतुष्टयपादात्मको धनुर्वेदः । यस्य प्रथमे पादे दीक्षाप्रकारः ।
द्वितीये संग्रहः तृतीये सिद्धप्रयोगाः चतुर्थे प्रयोगविधयः २
अथ कस्य धनुर्वेदाधिकार इत्यपेक्षायामाह
धनुर्वेदे गुरुर्विप्रः प्रोक्तो वर्णद्वयस्य च
युद्धाधिकारः शूद्रस्य स्वयं व्यापादि शिक्षया ३
चतुर्विधमायुधम् । मुक्तममुक्तंमुक्तामुक्तंयन्त्रमुक्तञ्चेति ४
दुष्टदस्युचोरादिभ्य साधुसंरक्षणं धर्म्मतः
प्रजापालनं धनुर्वेदस्य प्रयोजनम् ५
एकापि यत्र नगरे प्रसिद्धः स्याद्धनुर्द्धरः
ततो यान्त्यरयो दूरान्मृगाः सिंहगृहादिव ६
आचार्य्येण धनुर्देयं ब्राह्मणे सुपरीक्षिते
लुब्धे धूर्त्ते कृतघ्ने च मन्दबुद्धौ न दापयेत् ७
ब्राह्मणाय धनुर्देयं खड्गं वै क्षत्रियाय च
वैश्याय दापयेत् कुन्तं गदां शूद्राय दापयेत् ८
धनुश्चक्रञ्च कुन्तञ्च खड्गञ्च क्षुरिका गदा
सप्तमं बाहुयुद्धं स्यादेवं युद्धानि सप्तधा ९
अथाचार्य्यलक्षणम्
आचार्य्यः सप्तयुद्धः स्याच्चतुर्भिर्भार्गवः स्मृतः

Branch 14A: Dhanur Veda Vasiṣhṭha Dhanur Veda

Ending:

तदनु हि अच वर्णा आदिकाः सर्व्वलेख्याः
उपरिगतभवस्तान् स्थाप्य सर्वान् क्रमेण
भवति च युवयस्या युद्धयतां सा प्रसेना ५६

रथक्रमः

रथाश्वसाधनन्तु समादिस्थले विधेयम्
अथ सेनापति करणविधिं वक्ष्यामः
शृणु भो राजर्षे विश्वामित्र आकारविद्याबलयुक्तं क्षत्रियसेनापतिं विद्ध्यात् ।
तस्यैते नियमाः समस्तवाहिनीं एकदृष्ट्यावलोकयेत् ।
अन्यत् सर्व्वान् पदातीन् परिश्रमसदृशमधिकारं दद्यात् ।
व्यूहरचनायामति निपुणाश्च भवेत् स एव सेनानीर्विधेयः । इति

अथ शिक्षा

तत्रादौ षठनपाठनविधिं ब्रूमा । आदौ
क्षात्रकोशव्याकरण सूत्राण्यध्येतव्यानि द्वावध्यायौ
सप्तमाष्टमौमनोर्मिताक्षराव्यवहाराध्यायश्च जयार्णव
विष्णुयामलविजयाख्यस्वरशास्त्राण्यपराणि च
पटितव्यानि ततः सरहस्यं धनुर्व्वेदमापठेत्

हन्तव्याहन्तव्योपदेशः

सुप्तं प्रसुप्तमुन्मन्तं ह्यकच्छं शस्त्रवर्जितम्
बालं स्त्रियं दीनवाक्यं धावन्तं नैवद्यातयेत् ६४
धर्म्मार्थं यः त्यजेत् प्राणान् किं तीर्थे च जपे च किम्
मुक्तिभागी भवेत् सोऽपि निरयं नाधिगच्छति ६५
ब्राह्मणार्थे गवार्थे वा स्त्रीणां बालवधेषु च
प्राणत्यागपरो यस्तु सवै मोक्षमवाप्नुयात् ६६

इति श्रीमहर्षिवसिष्ठ प्रणीता धनुर्वेद संहिता

Reference:

Ray, Purnima, *Vasiṣhṭha's Dhanurveda Saṃhitā*, (Delhi, J.P. Publishing, 1991).

## Branch 14B: Dhanur Veda Śhiva Dhanur Veda

Structure: 227 Verses, 15 Divisions.
Beginning:

अथ धनुर्वेदः
ईश्वरोक्ताद्धनुर्वेदाद्व्यासस्यापि सुभाषितात्
पदान्याकृष्य रचितो ग्रन्थः संक्षेपतो मया १
विना शार्ङ्गधरं नान्यो धनुर्वेदार्थतत्त्ववित्
यतः स्वप्ने निशि प्राप्ता धनुर्वेदार्थतत्त्ववित्
यतः स्वप्ने निशि प्राप्ता शिवात्तत्त्वविचारणा २
अतः संदेहदोलायां रोपणीयं न मानसम्
ग्रन्थेस्मिंश्चापचतुरैर्वीरचिन्तामणौ क्वचित् ३
यस्याभ्यासप्रसादेन निष्पद्यन्ते धनुर्धराः
जेतारः परसैन्यानां तस्याभ्यासो विधीयताम् ४
एकोऽपि यत्र नगरे प्रसिद्धः स्याद्धनुर्धरः
ततो यान्त्यरयो दूरं मृगाः सिंहगृहादिव ५
अथ धनुर्धारणविधिः
आचार्येण धनुर्देयं ब्राह्मणे सुपरीक्षिते
लुब्धे धूर्ते कृतघ्ने च मन्दबुद्धौ न दीयते ६
ब्राह्मणाय धनुर्देयं खड्गं वै क्षत्रियाय च
वैश्याय दापयेत्कुन्तं गदां शूद्रस्य दापयेत् ७
धनुश्चक्रं च कुन्तं च खड्गं च च्छुरिका गदा
सप्तमं बाहुयुद्धं स्यादेवं युद्धानि सप्तधा ८
आचार्यः सप्तयुद्धः स्याच्चतुर्युद्धस्तु भार्गवः
द्वाभ्यां चैव भवेद्योध एकेन गणको भवेत् ९
हस्तः पुनर्वसुः पुष्यो रोहिणी चोत्तरात्रयम्
अनुराधाश्विनी चैव रेवती दशमी तथा १०
जन्मस्थे च तृतीये च षष्ठे वै सप्तमे तथा
दशमैकादशे चन्द्रेसर्वकर्माणि कारयेत् ११
तृतीया पञ्चमी चैव सप्तमी दशमी तथा

Branch 14B: Dhanur Veda Śhiva Dhanur Veda

Ending:

तं दीर्णमनु दीर्यन्ते योधाः शूरतमा अपि २१६
दुर्निवारतरा चैव प्रभग्ना महती चमूः
अपामिव महावेगत्रस्ता मृगगणा इव २१७
यस्तु भग्नेषु सनियेषु विद्रुतेषु निवर्तते
पदे पदेऽश्वमेधस्य लभते फलमक्षयम् २१८
द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः २१९
यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः
अक्षयं लभते लोकं यदि क्लीबं न भाषते २२०
मूर्छितं नैव विकलं नाशस्त्रं नान्ययोधिनम्
पलायमानं शरणं गतं चैव न हिंसयेत् २२१
भीरुः पलायमानोऽपि नान्वेष्टव्यो बलीयसा
कदाचिच्छूरतां याति मरणे कृतनिश्चयः २२२
संभृत्य महतीं सेनां चतुरङ्गां महीपतिः
व्यूहयित्वाग्रतः शूरान्स्थापयेज्जयलिप्सया २२३
अल्पायां वा महत्यां वा सेनायामिति निश्चयः
हर्षो योधगणस्यैको जयलक्षणमुच्यते २२४
अन्वेतं वायवो यान्ति पृष्ठे भानुर्वयांसि च
अनुप्लवन्ते मेघाश्च यस्य तस्य रणे जयः २२५
अपूर्णे नैव मर्तव्यं संपूर्णे नैव जीवति
तस्माद्धैर्यं विधातव्यं हन्तव्या परवाहिनी २२६
जिते लक्ष्मीर्मृते स्वर्गः कीर्तिश्च धरणीतले
तस्माद्धैर्यं विधातव्यं हन्तव्या परवाहिनी २२७
एतम् शिवधनुर्वेदस्य भगवतो व्यासस्य च

Reference: Śārṅgadhara, *Bṛihat Śārṅgadhara Paddhati*, verses 1714-1941.
1. http://www.atarn.org/india/Dhanurveda.pdf
2. Petersen, Peter, ed.., *The Paddhati of Śārṅgadhara, A Sanskrit Anthology,* Vol. I, (Bombay: Government Central Book Depot, 1888).

## Branch 14C: Dhanur Veda Nīti Prakāśhikā

Structure: 8 Chapters.
Beginning:

नीतिप्रकाशिका प्रथमोऽध्यायः
श्रीमद्गजाननं वाणीं नत्वा ब्रह्मादिसद्गुरून्
नीतिप्रकाशिका सेयं तन्यते ह्यादरान्मया १
श्रीमत्तक्षशिलायां तु सूपविष्टं वरासने
जनमेजयभूपालं द्रष्टुकामो महातपाः २
वैशंपायननामा तु महर्षिस्संशितव्रतः
अभ्यागात् सहितश्शिष्यैर्व्यासशिष्यो महामुनिः ३
तमायांतमृषिं श्रुत्वा जनमेजयभूपतिः
प्रत्युज्जगाम सहसा सह मंत्रिपुरोहितैः ४
पाद्यमर्घ्यं तथा गां च मधुपर्कं विधाय च
तस्मै प्रोवाच कुशलं प्रहृष्टेनान्तरात्मना ५
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मे दर्शनमागतः
तारिताः पितरस्सर्वे पालितोऽहं त्वया मुने
इत्युक्तवन्तं राजानं प्रयुयोजाशिषश्शुभाः
धर्मे ते रमतां बुद्धिरित्युक्त्वागात्समां ततः
उपविष्टे मुनौ तस्मिन् भद्रपीठे नृपोत्तमः
परिवृत्यासनाभ्याशे कृतांजलिरुपाविशत्
कथान्तरमथासाद्य जनमेजयभूपतिः
प्रणम्य तमृषिं भक्त्या कृतांजलिरभाषत ६
राजधर्माः कृतास्सर्वे भारतीयास्त्वयोदिताः
हृदि मे संशयः कश्चित् तं भवाञ्छेत्तुमर्हति १०
इतश्चानुदिनं धर्मस्सत्यं शौचं क्षमा दया
कालेन कलिना ब्रह्मन् क्षरत्यायुर्बलं स्मृतिः ११
वित्तमेव कलौ नृणां जन्माचारगुणोदयः
धर्मन्यायव्यवस्थायां कारणं बलमेव हि १२
दांपत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके

Branch 14C: Dhanur Veda Nīti Prakāśhikā

Ending:

धर्मशास्त्रपुराणानि ह्यपराह्णे समभ्यसेत्
संध्यां चोपास्य विधिवदग्निं हुत्वा समाहितः ९०
भुक्त्वा भागवतं शास्त्रं पठित्वा ध्यानसंयुतः
संविशेच्च यथाकालमुत्तिष्ठेद्विगतक्लमः ९१
एवंवृत्तस्य नृपतेर्नीतिमार्गानुसारिणः
धर्मार्थकाममोक्षाश्च सिध्येयुर्नात्र संशयः ९२
पृथुमेवं प्रशास्यैव ब्रह्मा लोकगुरुस्त्वयं
तत्रैवान्तर्दधे देवो दैवतैस्सहितस्तथा
वैन्योऽपि तत् तथा चक्रे ब्रह्मप्रोक्तं पुरातनं
भुक्त्वा ससागरामुर्वीमन्ते ब्रह्म जगाम हा ९४
पारीक्षित त्वमप्येवं कृत्वा सौख्यं भविष्यसि
ख्यातिं च लोके संस्थाप्य परां गतिमवाप्स्यसि ९५
यावत्कीर्तिर्मनुष्यस्य लोकेषु विचरिष्यति
तावद्वर्षसहस्राणि ब्रह्मलोके महीयते ९६
पठेच्च य इदं काव्यं शृणुयाद्वा समाहितः
ब्राह्मणः क्षत्रियो राजा विशेषेण नराधिपः ९७
वैश्यो वा शूद्रजातीयस्त्रियो राजपरिग्रहाः
ते कीर्तिमन्तो भूत्वेह परत्र गतिमाप्नुयुः ९८
नीतिशास्त्रमिदं प्रोक्तं मया ते जनमेजय
संक्षेपेण गमिष्यामि यत्र व्यासो गुरुर्मम ९९
वैशंपायन इत्युक्त्वा तत्रैव स जगाम ह
पारीक्षितोऽपि मुमुदे सुनीत्या पालयन् प्रजाः १००
इति श्रीमन्नीतिशास्त्रे नीतिप्रकाशिकायां
राजव्यापारकथनं नामाष्टमोऽध्यायः

Discussion: Chapters 2 through 5 of the *Nītiprakāśhika* present a comprehensive examination of the principles and practice of Dhanurveda.

Reference: Oppert, Gustav, ed., *Nītiprakāśhika*, (New Delhi: Kumar Brothers, 1970).

## Branch 15A: Sthāpatya Veda Mānasāra Vāstu Shāstra

Structure: 70 Chapters.

Beginning:

मानसारम् संग्रहः

उत्पत्तिरक्षणलयान् जगतां प्रकुर्वन् भूवारिवह्निमरुतो गगनं च सूते
नानासुरेश्वरकिरीटविलोलमालाभृङ्गावलीढचरणाम्बुरुहं नमामि १
गङ्गाशिरःकमलभूकमलेक्षणेन्द्रगीर्वाणनारदमुखैरखिलैर्मुनीन्द्रैः
प्रोक्तं समस्ततरवस्त्वपि वास्तुशास्त्रं तन्मानसारऋषिणापि हि लक्ष्यते स्म २
मानोपकरणं चादौ शिल्पलक्षणपूर्वकम्
अथ वास्तुप्रकरणं भूपरीक्षाविधिं तथा ३
भूसंग्रहस्ततः प्रोक्तं शङ्कुस्थापनलक्षणम्
देवादीनां स्थापनाय पदविन्यासलक्षणम् ४
बलिकर्मविधिं चैव ग्रामादीनां च लक्षणम्
नगरीलक्षणं चैव भूमिलम्बविधानकम् ५
गर्भन्यासविधिं चैव चोपपीठस्य लक्षणम्
अधिष्ठानविधिं चैव पादमानस्य लक्षणम् ६
प्रस्तरस्य विधिं चैव सन्धिकर्मस्य लक्षणम्
विमानलक्षणं चैवमेकभूम्याश्च लक्षणम् ७
द्वितलस्य विधिं चैव त्रितलस्य विधानकम्
चतुस्तलविधिं चैव पञ्चभूम्याश्च लक्षणम् ८
षट्सप्तलकं चैवमष्टभूनवभूमिकम्
दशभूमिविधानं च रुद्रभूमिविधानकम् ९
तलं द्वादशकं चैव प्राकाराणां च लक्षणम्
परिवारलक्षणं चैव गोपुराणां च लक्षणम् १०
मण्डपस्य विधानं च शालानां चैव लक्षणम्
विन्यासश्च गृहस्याथ गृहप्रवेशलक्षणम् ११
द्वारस्थानविधिं चैव द्वारमानस्य लक्षणम्
राजहर्म्यविधिं चैव राज्याङ्गस्य तु लक्षणम् १२
भूपतिलक्षणं चैव यानादिरथलक्षणम्

Branch 15A: Sthāpatya Veda Mānasāra Vāstu Shāstra

Ending:

नृत्तगीतादिमुद्रैश्च दर्शयेच्छिल्पिवित्तमः
नयनोन्मीलनं प्रोक्तं पश्चाद् ग्रामप्रदक्षिणम् ४९
लक्षणोद्धारमेवोक्तमुक्तवद् रेखया लिखेत्
प्रतिमां लोहजं प्रोक्तं तथा रत्नं तु विन्यसेत् ५०
शिलालिङ्गं तु बिम्बानां यत्तत्कर्मावसानके
स्थापनात्पूर्वके रत्नं विन्यासं कारयेद् बुधः ५१
पीठं तस्य च मध्ये तु नवकोष्ठं प्रकल्पयेत्
पद्मरागं तु तन्मध्ये वज्रं चेन्द्रवद् न्यसेत् ५२
प्रवालं चाग्निकोष्ठे तु महानीलं यमे तथा
वैदूर्यं न्यसेन्नैर्ऋत्ये मरतकं पश्चिमे तथा ५३
वायव्ये पुष्परागं च मौक्तिकं तु कुबेरके
इन्द्रनीलं तु ईशे तु विन्यसेत् विधिवित्तमः ५४
स्थपतिः स्थापकश्चोभौ स्थापयेद् बिम्बलिङ्गकम्
एवं तु रत्नविन्यासं शेषमङ्गं यथोक्तवत् ५५
हृदयकमलमध्ये दीपवत्तत्परं स्यात्
कमलजहरिहरादिदेवतानां च सर्वम् ५६
विधिमिह सकलरूपं च चक्षुरुन्मीलनं च
कृतिमिति रखिलमुक्तं मानसारं पुराणैः ५७
पितामहेन्द्रप्रमुखैः समस्तैः
देवैरिदं शास्त्रवरं पुरोदितम्
तस्मात्समुद्धृत्य हि मानसारम्
शास्त्रं कृतम् लोकहितार्थमेतत् ५८

इति मानसारे वास्तुशास्त्रे नयनोन्मीलनलक्षणविधानं नाम
सप्ततितमोऽध्यायः मानसारं संपूर्णम्

Reference: Acharya, Prasanna Kumar, *Manasara on Architecture and Sculpture: Sanskrit text with critical notes*, (Delhi: Low Price Publications, 1995).

Branch 15B: Sthāpatya Veda Mayamatam Vāstu Shāstra
Structure: 36 Chapters plus a Pariśiṣṭa
Beginning:

मयमतम् प्रथमोऽध्यायः

प्रणम्य शिरसा देवं सर्वज्ञं जगदीश्वरम्
तं पृष्ट्वास्मादलं श्रुत्वा शास्ति शास्त्रं यथाक्रमम् १
तैतिलानां मनुष्याणां वस्त्वादीनां सुखोदयम्
प्राज्ञो मुनिर्मयः कर्ता सर्वेषां वस्तुलक्षणम् २
आदौ वस्तुप्रकारं च भूपरीक्षापरिग्रहम्
मानोपकरणं चैव शङ्कुस्थापनमार्गकम् ३
सपदं सुरविन्यासं बलिकर्मविधिं तथा
ग्रामादीनां च विन्यासं लक्षणं नगरादिषु ४
भूलम्बस्य विधानं च गर्भविन्यासलक्षणम्
उपपीठविधिं चैवाधिष्ठानानां तु लक्षणम् ५
स्तम्भानां लक्षणं चैव प्रस्तारस्य विधिक्रमम्
सन्धिकर्मविधानं च शिखराणां तु लक्षणम् ६
एकभूमिविधानं च द्वितलस्य तु लक्षणम्
त्रितलस्य विधानं च चतुर्भूम्यादिलक्षणम् ७
ससालं परिवाराणां गोपुराणां तु लक्षणम्
मण्डपादिविधिं चैव शालानां चैव लक्षणम् ८
गृहविन्यासमार्गं च गृहवेशनमेव च
राजवेश्मविधानं च द्वारविन्यासलक्षणम् ९
यानानां शयनानां च लक्षणं लिङ्गलक्षणम्
पीठस्य लक्षणं सम्यगनुकर्मविधिं तथा १०
प्रतिमालक्षणं देवदेवीनां मानलक्षणम्
चक्षुरुन्मीलनं चैव संक्षिप्याह यथाक्रमम् ११
पितामहाद्यैरमरैर्मुनीश्वरैर्यथा यथोक्तं सकलं मयेन तत्
तथा तथोक्तं सुधियां दिवौकसां नृणां च युक्त्याखिलवस्तुलक्षणम् १२

इति मयमते वस्तुशास्त्रे संग्रहाध्यायः प्रथमः

Branch 15B: Sthāpatya Veda Mayamatam Vāstu Shāstra

Ending:

तिथिविधिमाह नृसिंहः--
चित्रादर्शास्तथा रिक्ता वर्ज्याः शेषाः शुभावहाः
शकुनादिनिविष्टं च विशेषेण विवर्जयेत् ६
शुक्रज्ञजीवचन्द्राणां वाऽथ वर्गोदयाः शुभाः ७
नक्षत्रविधिमाह--
मूलाग्नेय मघाश्लेषा विशाखा भरणी तथा
अधोमुखास्त्रिपूर्वाख्याः कूपादिखनने शुभाः ८
रोहिण्यार्द्रा श्रविष्ठा च पुष्यवारुणवैष्णवाः
ऊर्ध्वाननाः प्रशस्ताः स्युरुत्तरत्रयमेव च ९
प्रशस्तानि तुलादीनि वृद्धिकार्यादिषु क्रमात्
वाजिभाच्चित्रभान्मूलात् पञ्चर्क्षन्तु विवृद्धिदम् १०
सेतुकुल्यादिकार्येषु प्रशस्तमिति केचन
आप्यानिलाग्निवरुणचतुष्कं चावरोहणम् ११
वापीकूपतटाकादिखनने शुभदं भवेत् १२
चन्द्रगुप्तः--
हस्तोत्तरा धनिष्ठा पित्र्यं वरुणेन्द्रमैत्ररोहिण्यः
हरिमूलसार्पिचित्राः तिष्यं खनने प्रशस्ताः स्युः १३
अथ कूपारम्भविधिरुच्यते--
पुष्टिं भूतिं पुत्रहानिं पुरन्ध्रीनाशं मृत्युं संपदं शस्त्रबाधाम्
किञ्चित्सौख्यं दीक्ष शर्वादि कुर्यात् कूपो मध्ये गेहमर्त्यक्षयं च १४
तथाह देवरातः--
मध्यमे द्रव्यनाशं स्यादैन्द्रे सुखकरं भवेत्
आग्नेय्यां पुत्रमरणं याम्ये सर्वविनाशनम् १५

इति परिशिष्टं समाप्तम्

Reference: Dagens, Bruno, *Mayamatam: Treatise of housing, architecture and iconography*, 2 vols., (Delhi: Motilal Banarsidass, 1994).

Branch 15C: Sthāpatya Veda Viśhvakarma Vāstu Shāstra
Structure: Part I: 18 Chapters.
Beginning:

श्री सरस्वत्यै नमः श्रीगणेशाय नमः श्रीविश्वकर्मणे नमः ।
श्री विश्वकर्माकृताया वास्तुशास्त्रे वास्तुविद्याम् । पूर्वार्ध ।
आयादिगणिताध्याय प्रथमोध्याय १ श्री विश्वकर्माउवाच--
अथातः संप्रवक्ष्यामि आयादिनां लक्षणे
प्रासादनिलयेपुरे वापिप्राकर मंडये १
वास्तु कर्मेमु सर्वेषु आयादिगणित योजयेत्
ईदानी कथियिष्यामि गणीतवास्तुकर्मके २
आयत्वं च पृथुत्वे न गुणयेदाकर्मणि
अष्टाभिर्हरैत्भाग यत्शेषंआयादिशु ३
ध्वजाधूमस्तथासिंह श्वानोवृषखरौगज
ध्वाक्षंचैव समं द्रष्ट्वा प्रार्व्यादिपुप्रदक्षिणे ४
ध्वजोसिंहो वृषोगजो शश्यतेश्रुभवेश्मशु
अधमानं खरोध्वांक्षो धूमश्वानःसुखावहा ५
प्रासाद प्रतिमालिङ्गे जगतीपीठमंडपे
वेदीकुंडेशुचि चैव पताकाछत्र ध्वजादेय ६
अग्निकर्मषुसर्वेषु होमशाला महानसे
थूमोऽग्निकुंडसंस्थाने होमकर्मगृहेऽपि च ७
आयुधेषुसमस्तेषु नृपाणां भबेनेषुच्च
नृपासने सिंहद्वारे सिंहतत्र निवेशयेत् ८
श्वानोभ्लेच्छंगृहे प्रोक्तो वेश्यागारेनटस्य च
नृत्यकारेषु सर्वेषु श्वानःश्वानोपजिविनाम् ९
वणिजकर्मषु सर्वेषु भोजनपात्रेषु मंडपे
वृषास्तुरङ्गशालानां गौशालागोकुलेषु च १०
तत् वितघ्नादिस्वरे वाजित्रे विविधे तथा
कुलाल रजाकादिका खरो गर्दभोपजिविनाम् ११
गजश्च गजशालायां सिंहयत्नेन वर्जयेत्

Branch 15C: Sthāpatya Veda Viśhvakarma Vāstu Shāstra

Ending:

चतुरश्री कृतेक्षेत्रे द्वांत्रिशद्विभाजिते
षट्पंचाशत्पदैर्युक्तान्येकादश शतानिय १०
मध्यस्थाने लिखेत पद्मंवेदगर्भ इतिस्मृतम्
ब्रह्मान्ते च भवेद्वीथी चत्वारिशत्पदैः क्रमात् ११
अर्यम्मोऽस्ते भवेद्वीथि शतं च द्वादशोत्तमम्
विथिकर्णे समस्तेवं पदमुक्तिः क्रमोदित १२
अष्टदंश मंडलेषु चाद्ये पद्मं निपातयेत्
तदनन्तरपंक्तौ च ब्रह्माषराण वतिपदः १३
तदन्ते विथीकाकार्या चत्वारिशत्पदान्विता
सशितिभिश्च चत्वारोऽर्थमाद्याश्च चतुर्दिशम् १४
चत्वारिंश पदैरथैरष्टौ स्युर्ब्रह्मकर्णात्
तदन्तविथीका कार्या शतं च द्वादशोत्तरम् १५
तदबाह्ये च भवे द्विथी द्वांत्रिशदधिकं शतम्
कौणे लोप्याश्च षट्पादाश्चतुर्षु चतुर्विंशतिः १६
इशाद्या रुद्रदासान्ता लता वीथ्यंन्तरेगता
एवंपदानि आयन्ते षट्त्रिंशदधिकं शतम् १७
बाह्य कर्णेतु चत्वारः प्रस्थाप्या नवभिः पदैः
सप्त सप्त तदाश्चिता योज्याअष्टाष्टाभिः पदैः १८
तन्मानानुक्रमाद्योज्या शेषा अष्टपदास्तथा
एवं सहस्त्रपदैर्युक्तं सर्वतोभद्रलक्षणं ॥ इति सहस्त्रपदंसर्वतोभद्र वास्तु १९
अधासणे वास्तु प्रपूज्यते यजमान से
वास्तुपूजा विनावास्तु प्रारंभे न भवेशने ॥ इति वास्तु
इति श्री विश्वकर्माकृतायां वास्तुशास्त्रे वास्तुविद्यायां वास्तुलक्षणाध्याय
क्रमांक अध्याय १८

Reference: Somapura, Prabhasankara Oghadabhai, *Sri Viśvakarmakrtāya śrI vāstuvidyāyām Vāstuśāstre*, 2 vols. (Somapura: Sri Balavantaraya Prabhasankara Somapura ane Bandhuo, 1970).

Branch 15D: Sthāpatya Veda Manuśhyālaya Chandrikā
Structure: 7 Chapters.
Beginning:

मनुष्यालयचन्द्रिक प्रथमोऽध्यायः भूपरीक्षापरिग्रहौ
नृसिंहयादवाकारतेजोद्वितयमद्वयम्
राजते नितरां राजराजमङ्गलधामनि १
श्रीमत्कुण्डपुरे विराजति परक्रोडे च तेजः परं
नावानाम्नि च धाम्नि यच्च नितरां मल्लीविहारालये
अश्वत्थाख्यनिके तनेऽपि च पुरे श्रीकेरलाधीश्वरे
संम्भूयैतदुरुप्रकाशविषये चित्ते ममोज्जृम्भताम् २
श्रीमङ्गलास्पदसदाश्रयनीलकण्ठ-
प्रेमप्रकर्षनिलयः सकलाभिवन्द्यः
श्रीमद्गिरीन्द्रतनयातनयोऽङ्घ्रिभाजां
कामप्रदो जयति मत्तमतङ्गजास्यः ३
तद्देवपादकमलैकसमाश्रयः को-
ऽप्युद्योतमानगुरुवर्यकृपाभियोगात्
विद्यापरिश्रमपरो बहुधात्मशुद्ध्या-
मुद्योगवान् भवति बालविबोधने च ४
येषां श्रुतिप्रणयिनी धिषणा यदीयसङ्कल्पकल्पिततनुः परमेश्वरोऽपि
तेषां महीसुमनसां महनीयभासामुत्तंसये परमुदारपदारविन्दम् ५
निसर्गसंसिद्धसमस्तशिल्पप्रावीण्यमाद्यं द्रुहिणं प्रणम्य
मया मनुष्यालयचन्द्रिकैषा विलिख्यते मन्दधियां हिताय ६
मयमतयुगलं प्रयोगमञ्जर्यपि च निबन्धनभास्करीययुग्मम्
मनुमतगुरुदेवपद्धतिश्रीहरियजनादिमहागमा जयन्ति ७
मार्कण्डेययुगं पराशरमुरारिप्रोक्तरत्नावली-
सारान् काश्यपविश्वकर्ममतयुग्माद्यां कुमारागमम्
सव्याख्यां हरिसंहितां विवरणाद्यं वास्तुविद्यादिकान्
दृष्ट्वा तन्त्रसमुच्चयोक्तमनुसृत्यैवात्र संक्षिप्यते ८
मर्त्यो विप्रादिवर्णेष्विह भवनविधानोत्सुको यः स पूर्वं

Branch 15D: Sthāpatya Veda Manuśhyālaya Chandrikā

Ending:

राज्ञां धामनि भूसुरस्य च गृहं नित्यार्चनायाङ्गणे
शर्वेन्द्राग्निजलेशदिक्षु कुलदैवार्चा प्रतिष्ठादि च
प्रासादादि विधानमीशसुरनाथाग्न्यन्तकाशागतं
केतूत्थं वृषजं करोतु च निर्ऋत्यादौ क्रमाच्छ्रेयसे ३१
सेवितकुलदैवतधामैशनिर्ऋत्यादिके तु वृषजं स्यात्
गृहपुरपत्तननगरग्रामादावभिमुखा भवन्ति तदा ३२
निरङ्गसाङ्गादिविभिन्नगाहप्रतिष्ठिता याः प्रतिमास्तु तासाम्
चलाचलत्वोभयभेदतस्तत्क्रियावशाच्चापि भवेद् विशेषः ३३
सौख्यार्थं धरणीभृतां मणिगृहं मित्रे विहारोऽनिले
व्यायामोऽर्गलके तथैव निर्ऋतौ स्नानादि पर्जन्यके
इन्द्रे तोयपतौ च भुक्तिनिलयं नृत्तादि गान्धर्वके
शस्त्राद्यं निर्ऋतौ गृहक्षतपदे प्राच्ये च शय्यागृहम् ३४
दण्डान्तं समतीत्य वप्रमुदितं मृद्भिः शिलाद्यैस्तथा
श्रेष्ठं तत्परिखा तु मध्यममते शाखावृतिश्चाधमम्
तत्पानादिषु कण्टकिद्रुमलता ग्राह्याश्च वेणवादयः
कुर्याद् द्रव्यवशादिहैकमुदितान् वृक्षांश्च दिक्षु क्रमात् ३५
एवं निर्माप्य गेहं प्रथममिह वृतस्तन्त्रिवर्यस्तदन्ते
तत्कर्तृन् शिल्पिनस्तान् वलयमणिलसत्कुण्डलाद्यैर्यथेष्टम्
सन्तोष्यापाद्य चैतत् स्वयमपि यजमानेन सम्यङ्मुहूर्ते
गत्वा तद्वास्तुपूजाद्यखिलशुभविधिं साधु कुर्वीत तस्मिन् ३६
कर्ता चाथ क्रियान्ते महितगुरुवरं भोजयित्वा यथेष्टं
गोभूम्याद्यैश्च दत्त्वा विधिवदवहितो दक्षिणां मुख्यरूपाम्
आज्ञामादाय तस्मान्निखिलमपि जनं प्रीणयन् भूरिदानैः
स्वीयैः सार्थं स्वगेहे सुचिरमधिवसेत्पूर्णकामः सुखेन ३७

Reference: Achyuthan, A., and Prabhu, Balagopal T.S., *Manuṣyālayacandrikābhāṣya: An engineering commentary on Manuṣyālayacandrika of Tirumangalat Nīlakaṇṭhan Mūsat*, Saraswatham, Kiliyanad, Calicut: Vāstuvidyāpratiṣṭhānam, 1998.

Branch 15E: Sthāpatya Veda Samārañgana Sūtradhāra
Structure: 83 Chapters.
Beginning:
महाराजाधिराजश्रीभोजदेवविरचितं समराङ्गणसूत्रधारापरनामधेयं
वास्तुशास्त्रम् महासमागमनो नाम प्रथमोऽध्यायः
देवः स पातु भुवनत्रयसूत्रधारस्त्वां बालचन्द्रकलिकाङ्कितजूटकोटिः ।
एतत्समग्रमपि कारणमन्तरेण कात्स्न्र्यादसूत्रितमसूत्र्यत येन विश्वम् १
सुखं धनानि ऋद्धिश्च सन्ततिः सर्वदा नृणाम्
प्रियाण्येषां तु संसिद्ध्यै सर्वं स्याच्छुभलक्षणम् २
यच्च निन्दितलक्ष्मा च ऋतदेतेषां विघातकृत्
अतः सर्वमुपादेयं यद्भवेच्छुभलक्षणम् ३
देशः पुरं निवासश्च सभा वेश्मासनानि च
यद्यदीदृशमन्यच्च तत्तच्छ्रेयस्करं मतम् ४
वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः
तस्माल्लोकस्य कृपया शात्रमेतदुदीर्यते ५
अथैकदा जगज्जन्महेतुमम्बुरुहासनम्
पृथ्वी पृथुभयभ्रान्ता चकिताक्षी समाययौ ६
प्रणम्य प्रणतिप्रह्वनिखिलत्रिदशेश्वरम्
सगद्गदमुवाचेति भूतधात्री पितामहम् ७
भगवन्नहमेतेन पृथुना पृथुतेजसा
उपद्रुता त्वां शरणं प्राप्ता त्रायस्व मां ततः ८
वदन्त्यामिति मेदिन्यामाविरासीदथो पृथुः
संरम्भमुक्तहृदयो ब्रह्माणं प्रणनाम च ९
जगादैनमथ स्निग्धध्वनिगम्भीरया गिरा
कुर्वंस्तद्यानहंसानां पयोदध्वनिशङ्कितम् १०
त्वयास्मि जगतां नाथ जगतोऽधिपतिः कृतः
स्थापितानि च भूतानि सर्वाण्यपि वशे मम ११
तेष्वियं मम विश्वेश कदाचिद्वशवर्तिनी
समीकरोमि पाषाणजालान्यस्याः किलाधुना १२

Branch 15E: Sthāpatya Veda Samarāṅgana Sūtradhāra

Ending:

पतकावेव निर्दिष्टौ पल्लवौ नामतः करौ इति पल्लवौ
उद्वेष्टितवर्तनया गत्या स्थितौ मूर्ध्नः
पार्श्वद्वितये पल्लवसंस्थने केशबन्धाख्यौ २४४ इति केशबन्धौ
अभिमुखमुभौ निविष्टौ भुविष्टिर्तवर्तनक्रमादसौ
पल्लवहस्तौ पार्श्वद्वितये स्यातां लतासंज्ञौ २४५ इति लताहस्तौ
व्यावर्तितकरणाभ्यां दक्षिणो लताहस्ता
उन्नतविलोलितः स्यात्त्रिषक्तको वामहस्तस्तु ४४६ इति करिहस्तः
उद्वेष्टितवर्तनया त्रिपताकावभिमुखौ यदा घटितौ
करिहस्तसन्निविष्टौ करौ तदा पक्षवञ्चितकौ २४७ इति पक्षवञ्चितकौ
तावेव त्रिपताकौ हस्तौ कटिशीर्षसन्निविष्टाग्रौ
विपरावृत्तिविधानात् पक्षप्रच्योतकौ नाम्ना २४८
त्रिप शाखौ हस्तावधोमुखा हि तद् विज्ञेयौ गरुडपक्षाख्यौ इति गरुडपक्षकौ
आवर्तितपरिवर्तितकरणकृतौ हंसपक्षकौ गम् १४९
पक्षातिरूपत्वमानान्तौ प्रसृतौ च यदा भवेत् उपक्षौ
व्यावर्तितपरिवर्तितयोगौ यदि मण्डलाकृती स्याताम् २५०
ऊर्ध्ववर्तितादघवदा स्मृतावूर्ध्वमण्डलिनौ
तथोर्ध्वमण्डलिसंज्ञौ वावर्तितं विधाया परिवर्तितकरणतारौ इति पार्श्वमण्डलिनौ
उद्वेष्टितौ यदैक एव भ्रमित उरसः स्थाने तौ द्वावपि स्याताम्
नियतमुरोमण्डलिनौ विज्ञातव्यौ तदा तज्ज्ञैः इत्युरोमण्डलिनौ
---पल्लवो हस्तस्तथारालाह्वा वापरा
व्यावर्तनाकृतश्चैकस्तयोरन्योपवेष्टनात्
उरोर्धयोगात्पार्श्वार्धयोगाच्च क्रमशः स्थितौ
एतौ विद्वान् विजानीयादुरः पार्श्वार्धमण्डलौ इत्युरःपार्श्वार्धमण्डलौ

Reference:

Kumar, Pushpendra, ed., *Samarāṅgana Sūtradhāra*, (Delhi: New Bharatiya Book Corporation, 1998).

## Branch 15F: Kāśhyapa Śhilpa Śhāstram

Beginning:
श्री गणेशाय नमः काश्यपशिल्पशास्त्रम् पूर्वभागः
अथ प्रथमः पटलः
महादेवं शशिधरं सर्वलोकैकनायकम्
महेन्द्रमध्यगं शान्तं पार्वती सहितं परम् १
देवदानवसिद्धाद्यैः सेवितं सुरपूजितम्
प्रणम्य देवचरणं एवं ब्रूयात्स काश्यपः २
शुचेत् सतः परमसद्भावं प्रसनोत् सृष्टिकारणात्
जगतामभिवृद्ध्यर्धं योगिनामुपकारकम् ३
देवानां च हितार्थाय शिवज्ञानं परं महत्
महार्थमल्पग्रंथं च कर्षिणाद्यर्चनान्तकम् ४
तं शुमते महातंत्रात् त्वयोक्तं हि पुरार्थकम्
तंत्रं तद्वददेवानां रुद्राणामयितारीणाम् ५
कल्पायुष्यादिधर्माणां नराणां त्वधिकारिणां
कनुग्रहार्थं त्वेतेषां संक्षेपाद्वदमे प्रभो ६
साधुसाधुमहाविप्रयकक्त्वया परिचोदितं
दुर्लभं तदहं वक्ष्ये शृणु चैकाग्रमानसः ७
पुष्यमासादिषण्मासा माघमासेतरे शुभाः
दक्षिणे चाश्वयुङ्मासः श्रावणः कार्तिकस्तथा ८
पूजिताः कर्षणादीनां शेषमासा विवर्जिताः
पौष्यादित्यमघास्वाती सावित्रत्वाष्टमैत्रकं ९
श्रवणे न प्रजेशश्च तिष्याश्विचकर्तृयुक्
सदने पूजितास्ताराः प्रतिपकषष्ठिस्तमि १०
तृतीया पञ्चमी चैव द्वितीया च त्रयोदशी
दशमी तिथयश्शस्ताः शुक्रपक्षे विशेषतः ११
प्रतिपत् पौर्णमासी च द्वितीया पञ्चमी तथा
तृतीया मध्यमाख्याता कृष्णपक्षे विशेषतः १२

Branch 7: Kāśhyapa Śhilpa Śhāstram continued

Ending:

शशिभद्रसमायुक्तं मध्ये वारणसंयुतम्
नानामसूरकस्थं भवेदिकाद्यैरलंकृतम्  १८६
सभाकारं शिरो वापि शालाकारमथापि वा
मुखे मुखे महानासी पार्श्वयोः द्विद्विनासिके १८७
कतेः पादोत्तरैर्युक्तं प्रस्तरे तु तलं प्रति
कतेसोपातसंयुक्तं मध्ये वारणसंयुतम्  १८८
एवं त्रिधा समुद्दिष्टं द्वारगोपुरमध्यमं
कळिंद्रांशं च कुडचं वा वृषभस्थलमेव वा  १८९
तुल्याद्यैः प्रसरं वाथ कळिंद्राद्धं यथोचितम्
शालाकारं सभाकारं मालीकाकारमेव च  १९०
यद्यदिष्टं तु यद्द्वारे तत्तत्रैव प्रकल्पयेत्
बाह्यऽबाह्येंघ्रपादाभ्यां मध्यकुडचयुतं तु वा १९१
गृहपिण्डी गर्भगेहं प्राञ्चि वैव प्रकल्पयेत्
तळिंद्रहारयोर्माने विवृतांघ्रिकमेव वा  १९२
प्रस्तरेदिष्टभूम्यत्वं गोपानादिसमन्वितम्
कूटकोष्ठाद्यलंकारमूर्ध्वस्तमत्प्रकल्पयेत्  १९३
भूमिभागमलंकारं गळात्वं परिकल्पयेत्
शीर्षं दण्डाभं शालाभं शालाकारं तदुच्यते  १९४
लुपारोपि तमायत्तं सभाकारकमुच्यते
प्रस्तरं प्रतिसंछाद्य मण्डपं यत्त्रिविष्टिना  १९५
मालिकाकृतिकं ख्यातं मण्डपे तु परस्परम्
गोपुरं ह्येवमाख्यातं परिवारविधं शृणु  १९६
इति काश्यपशिल्पे गोपुरलक्षणं नाम पञ्चचत्वारिंशः पटलः समाप्तः
इति पूर्वभागः समाप्तः

Reference:
Early twentieth century Grantha edition, lacking title page.

## Branch 15G: Sthāpatya Veda Vāstu Sūtra Upaniṣhad

Structure: 6 Prapāthakas
Beginning:

वास्तुसूत्र उपनिषद् प्रथमप्रपाठकस्य सूत्राणि

वास्तोष्पतिर्ज्ञेय इति १ षट्शिल्पाङ्गप्रयोगेण प्रजनयन्ति रूपाणि २ यूपमिदं ज्योतिः ३ वृत्तज्ञानं रेखाज्ञानं च यो जानाति स स्थापकः ४ शिल्पात् प्रतिमा जायन्ते ५ स प्रवहणः शिल्पसूत्राध्यायं स्थापकविद्यां चावदत् ६ शरीरमूर्तिरहिते मन आवेश्य विशेषेण विकल्पिदोषयुक्तं भवति इति ७ वास्तुषडङ्गमिति श्रेष्ठम् ८ षड्धा शैलं ज्ञेयम् ९ शैलादङ्गरागज्ञानं प्रसरति १०

द्वितीयप्रपाठकस्य सूत्राणि

निर्दिष्टार्थकप्रतिमा ग्राह्या १ तत्पातनं प्रथमा क्रिया २ तन्मर्दनं द्वितीया क्रिया ३ विलमिति मर्मज्ञेयम् ४ न कृत्यरूपार्थं रेखाकरणं कर्तव्यम् ५ आदौ वृत्तम् ६ एकैकस्य संयोगे एकीभवति ७ रेक्खान्वये सर्वाङ्गाणि न्यासय ८ तेजांसि सरलरेखाणि ९ नाभौ रूपकर्म प्रारभ्यते १० प्राजापत्यरीत्या वृत्तं हि तेजस्तदाऽपां भासे चतुरस्रम् ११ कर्णद्वयं मरुद्भावेन आचरन्ति १२ धरेव कर्णिकक्षेत्रमाकर्षयन्ति स्थापकाः १३ तत्र मध्ये लब्धबिन्दू रसायाः प्राणः १४ त्रिहुताग्निः स्मर्यतेऽपि च लोके १५ निम्नगास्त्रिहुता आप इति १६ षट्कोणको हि आकर्षणीविद्याविशेषः १७ यथा रूपे तथा यूपेऽनुच्छेदान्ता ग्राह्याः १८ खननप्रकारो ध्येयः १९ सूत्रायने रेखाः सुभगा भवन्ति २० उत्थितरेखा अग्निरूपाः पार्श्वगा अब्रूपाः तिर्यग्रेखा मरुतरूपा इति २१ रूपसौभाग्याद्ध्यानभावो जायते २२ अग्निरेखायामुत्तुङ्गरूपाणि जायन्ते २३ अब्रेखायामुत्सुकरूपाणि जायन्ते २४ मारुतरेखायां तैजसरूपाणि २५ रेखाज्ञानं सर्वमिति ज्ञेयम् २६

तृतीयप्रपाठकस्य सूत्राणि

रूपस्य भावो मुख्यः १ भावानुसारतो रेखाविधानमिति ज्ञेयम् २ तेषां बहुधा कृत्यं श्रेयः ३ न्यासार्थं कालबोधो ध्येय इति ४ खनित्राणि अभिमन्त्रयेत् ५ खनित्रपञ्चकं श्रेष्ठम् ६ रूपप्रकर्षार्थं रूपाङ्गं स्निग्धमिति ७ शिल्पकाराः प्रलेपयन्ति द्रावकरसम् ८ एषा हेतिविद्या श्रेष्ठा ९

Branch 15G: Sthāpatya Veda Vāstu Sūtra Upaniṣhad

Ending:

प्रथमरसः शृङ्गारः ५ शृङ्गाररूपार्थमब्रेखा ग्राह्याः ६ स हासो द्वितीयरसः ७ मुखलक्षणाद्रसं जानन्ति सर्वे ईक्षणेन ८ स तृतीयः करुणरसभाव इति ९ रौद्रः शिल्पकारेषु चतुर्थो रसः १० तिर्यग्रेखायां भावः प्रकटो भवतीति विशेषः ११ स वीरभावः पञ्चमः १२ वैरभावे उत्कटे भयङ्करो भवति स विलक्षणः षष्ठरसः १३ तस्याङ्गमारुतरेखायामिति स सप्तमः १४ शान्त-भावः सोऽष्टमो रसः १५ भावानुगतरूपाणि चतुर्धा मुख्यानि १६ लोके भावबोधस्य हेतुर्मनः १७ मनुष्याणां वृत्तिर्मुख्येति १८ सङ्कल्पाद्विकल्प इति विशेषः १९ एष भुवनकोषो देहानुभूत्या क्रमः २० अरूपाद् रूपं त-स्य फलम् २१ दिशानुसृते दिशापालानुपासन्ते २२ एवं दैवभेदान् मा-र्गभेदा जायन्ते २३

षष्ठप्रपाठकस्य सूत्राणि

न्यासधारणा श्रेष्ठा १ वृत्त्या दैवचिन्तने भेदः सञ्जायते २ लक्षणप्रकाशार्थं शिल्पविद्या ३ न्यासोऽलङ्कारमुद्रायुधबाध्रकक्षवाहनोपदेवारिस्तुवकक्रमेण रूपनवाङ्गविशेषो ध्येयः ४ तिस्रः रेखाः श्रेष्ठाः ५ रूपक्षेत्रे कोष्ठकालि-र्मुख्या ६ षोडशकोष्ठकमध्ये रूपाणि प्रभवन्ति तद्रूपार्थं श्रेष्ठम् ७ विल-मिति मर्म ब्रह्मेव निधेयम् ८ षोडशकोष्ठकप्रमाणविभागस्तु ब्रह्मदैवजैवो-पदैवयाजकक्रमेण पञ्चधाध्येयः ९ रूपाङ्गं चतुर्धेति विशेषः १० बिन्दु-र्ब्रह्मेव ब्रह्मध्रुवम् ११ ब्रह्म सत्यादौ १२ ब्रह्मबिन्द्ववलम्बनेन रूपाङ्गाणि सौभगानि भवन्ति १३ अलङ्करणं दैवभूषणमिति १४ प्रमोदाद्रतिः प्रसरति १५ करमुद्रा रूपस्य भावं ज्ञापयति १६ बाध्रं बलं ज्ञापयति रूपे १७ आसनं षड्धा ज्ञेयम् १८ गुणानुसृतं रूपत्रयम् १९ वाहनं रूपस्य प्रकृतिज्ञापकविशेषः २० उपदैवतं प्रतिरूपमिति २१ उपदैवताद्रूपज्ञानं प्रसरति २२ अरिसन्धा ध्येया २३ रूपधाराया वृत्तिरिति श्रेष्ठा २४ स्तोतृणां रूपे सुभगविशेषः २५ प्रज्ञार्थमेतद् वास्तूपाख्यानम् २६

Reference:
Boner, Alice, et al., *Vāstusūtra Upaniṣad: The Essence of Form in Sacred Art*, (Delhi: Motilal Banarsidass, 1986).

## Branch 15H: Sthāpatya Veda Kāmikāgama

Structure: Two Main Divisions. The first Division has 75 Paṭalas.
Beginning:

कामिकागमः । पूर्वभागः । तन्त्रावतारपटलः ।
कैलासदक्षिणे शृङ्गे नानाश्चर्यसमन्विते
प्रवृद्धवटवृक्षोत्थच्छायाच्छन्नेऽतिविस्तृते १
व्याघ्रचर्मपरीधाने पीठे रत्नोपशोभिते
देवदानवगन्धर्वसिद्धविद्याधरादिभिः २
सेव्यमानं महादेवं श्रीकण्ठं विश्वनायकम्
कौशिकः काश्यपोऽगस्त्यो गौतमो नारदस्तदा ३
सनत्कुमारस्सनकस्सनातनसनन्दनौ
भृगुश्चात्रिभरद्वाजवसिष्ठाद्या महर्षयः ४
जिज्ञासवः परं ज्ञानं शिवशक्त्युन्मुखीकृताः
प्रणम्य चरणौ तस्य प्राहुराशमुमापतिम् ५
ऋषयः --
भगवन् देवदेवेश पशुपाशविमोचक
सृष्टिस्थितितिरोभावलयानुग्रहकारक ६
वियदादिमहामायावृत्तेस्साक्षात्प्रवर्तक
महजानन्दसन्दोहस्वसंविल्लक्षणात्मक ७
परसंवित्स्वरूपिण्या शक्त्या परमया युत
दिग्देशकालनिर्मुक्त जगदाह्लादकारण ८
वयं नियुक्ता देवेश त्वयेज्यायां शिवस्य तु
तदर्थं सारभूतं तु शास्त्रं शिवमुखोद्भवम् ९
वक्तुमर्हसि देवेश भक्तानामनुकम्पया
इत्येवं ऋषिभिः पृष्टो भगवान् वृषभध्वजः १०
प्राह गम्भीरया वाचा स्फुरच्चन्द्रार्धशेखरः
साधु पृष्टं हि युष्माभिश्शृणुध्वं संशितव्रताः ११
कामिकाख्यान्महातन्त्रादुद्धृतं शास्त्रमुत्तमम्
अवतीर्णमिदं मेरौ प्रणवाद्यवतारकैः १२

Branch 15H: Sthāpatya Veda Kāmikāgama

Ending:

किञ्चैतदधिदेवांश्च ज्ञानाख्यक्रियया सह ८६
त्रिषु चेत्स्युस्त्रितत्त्वानि चतसृषु कलाः स्मृताः
निवृत्तिं च विना ब्रह्मरहिताः कारणं तु वा ८७
सद्योजातादिका वापि निवृत्त्याद्यास्तु पञ्चसु
अण्डान्तर्वर्तिनष्षट्सु कलान्यासाः प्रकीर्तिताः ८८
कलाद्यास्सप्त विज्ञेया विद्येशा वसुकल्पने
वामाद्या नवकल्पे स्युर्लोकपाला दशाख्यके ८९
रुद्रसंख्ये तु रुद्रास्स्युरादित्याश्चार्कसंख्यके
विश्वेरुद्राश्विनी प्रोक्ताश्चतुष्पञ्चदशान्विते ९०
तिथयो भुवनान्युक्ता दक्षादारभ्य पश्चिमे
तत्तत्स्वनाममन्त्रेण न्यसेत्तद्धाम्नि निर्मिते ९१
गोपुरस्थापनं कुर्यात्तदग्रे मण्टपे कृते
पूर्वोक्तविधिनायुक्तकुण्डे वा स्थण्डिलेऽपि वा ९२
नवकुण्डैकसंख्ये वा पुण्याहप्रोक्षणान्विते
स्थण्डिले वेदिकोर्ध्वे च अष्टौ च स्थापयेद्घटान् ९३
मध्यमे च महादिक्षु शान्त्यादीन् तत्र पूजयेत्
शतसंख्यैस्तदर्धैर्वा तन्मन्त्रैस्समिदादिभिः ९४
पूर्णां दत्वेष्टिसन्तुष्टोगुरुः पञ्चघटोदके
शान्त्यादीनादितो न्यस्त्वा तन्मनूनभिषेचयेत् ९५
क्रियैषा प्रचुरा कार्या प्रधाना देशिकोत्तमाः
अन्यत्राप्यनुकल्पं स्यात्प्रचुरा वा प्रकीर्तिता ९६
गोपुरं प्रतियोज्यास्स्युर्नन्द्याद्याश्च द्विपार्श्वयोः
निष्कले पश्चिमद्वारं सकले दक्षिणं हितम् ९७
इति कामिकाख्ये महातन्त्रे गोपुरस्थापनविधिः पञ्चसप्ततितमः पटलः

Reference: Svāminātha, Ce., *Kāmikāgama*, (Madrās: Dakṣiṇabhāratārcakasaṅghaḥ, 1975).

## Branch 15I: Sthāpatya Veda Kāraṇāgama

Structure: 4 Divisions. Only one, the Kriyā Pāda is published in Devanāgarī.
Beginning:

पूर्व कारणागमे प्रतिष्ठा तन्त्रे
तन्त्रावतारपटल प्रारंभः
कल्याणं कुरतां कश्चित् करुणावरुणालयः
मयूरनगराथशोममनृत्तविनायकः १
भूधरस्योर्ध्वशृंगेषु रत्नशृङ्गनिकेतने
तत्रासीनम्महादेवं श्रीकराठं सुरवन्दितम् २
योगपीठस्थितं तस्य वामेगौरी समायुतम्
सर्वदेवावृतं सिद्धं मुनिगन्धर्वसेवितम् ३
क्रद्यंत कारणं पूज्यमपृच्छच्छर्वरुद्रकम्
प्रणम्म्य चरणौ तस्य प्रजापतिरथाब्रवीत् ४
ब्रह्म उवाच
देवदेवमहेशान स्थित्युत्पत्तिलयेशक
जगतामपि प्रीत्यर्धं योगिनां मुक्तिहेतुकम् ५
शिवज्ञानं परं गुह्यं वद मे शर्वरुद्रक ६
शर्वरुद्रोवाच
क्वयापृष्टमिदं सर्वं वद्दयेहं सुखसाधनम्
कारणाख्यं महा तन्त्रं प्रतिष्ठातन्त्रमुत्तमम् ७
कोटयेकग्रन्धसं युक्तं कर्षणाद्यर्चनान्तकम्
संज्ञेपेणाधुनाविप्रश्रुणुवद्दये समासतः ८
तस्यादौ तन्त्रसद्भावं मूलभेदोपभेदयुक्
कामिकं योगजं चिन्त्यं कारणं क्वजितन्तथा ९
दीप्तं सूद्दमं सहस्रन्तकं शुमान्सुप्रभेदकम्
विजयन्तैव निश्वासं स्वायंभुवन्तथानिलम् १०
वीरन्तरौरवन्तैव मकुटं विमलन्तथा
चंद्रज्ञानन्तबिंबन्तप्रोद्गीतं लळितं तथा ११
नुत्रयगतानादिमलत्रयमसौ गुरुः

Branch 15I: Sthāpatya Veda Kāraṇāgama

Ending:

आवाह्याभ्यर्च्यपुष्पाद्यैर्दद्ध्यन्तेन बलिन्ददेत्
काबिदेवी गणान् सर्वान् नवसन्धिषु पूजयेत्
कूष्माण्डन्तबलिं कृत्वा पारशैवेन कारयेत्
एवं प्रदक्षिणं कृत्वा प्रविशेदालयं प्रमात्
ततो मध्याह्नसमये मूलं देवीं प्रपूजयेत् ॥
उत्सवेशीन्तसंपूज्य प्रभूतहविषन्ददेत्
ब्राह्मणान् भोजयेत्पश्चात् दीनान्धादींश्च भोजयेत्
ऐशान्ये पूर्वभागे च उत्तरे पश्चिमे पिवा
पश्चिमे द्वारसंयुक्तं कारयेद्यागमण्टखम्
तन्मध्ये वेदिकां कुर्यात् न च भागैकभागतः
तत्पूर्वे योनिकाण्डन्तु मेखला त्रयसंयुतम्
गोमया लेपनं कुर्यात् कलङ्कृत्य यथाविधी
पुण्याहं वा च धिक्वाथ प्रोक्षयेत्तज्जलेन तु ॥
उष्णीषमुत्तरीयन्त रुद्राक्षमुपवीतकम्
भस्मन्तवस्त्रतटकं स्वर्णयज्ञापवीतकम्
पवित्रं कर्णभूषन्तकौपीनं कटिसूत्रकम्
रक्तचन्दनलिप्ताङ्गं रक्तमाल्यानुभूषणम्
आचार्यो धारयेदेतान् यागशालां प्रवेशयेत्
स्थापनार्द्धाय मार्गेण यागपूजां समाचरेत्
होमद्रव्यं ततो वक्ष्ये किंचित् भेदं द्विजोत्तमाः
मुद्गान्तत्वमिलान्तत्वमध्वन्तत्वगुळान्तकम्
माषापूपं घृतो पेतं पायसं मुद्गसंयुतम्
कूष्माण्डं वज्रिकन्दत्वदद्ध्यत्वन्तक्रवात् गुरुः

Reference: 1. Pandey, Rama Chandra, *Kāraṇāgama: Kriyāpāda: Translation with Notes*, (Varanasi: Shaiva Bharati Shodha Pratishthanam, 1994).
2. Muthaliyar, Mayilai-Alagappa, *Uttara Karana Agama,* (Chennai-Sinthathirippettai: Sivajanaboth Yantra Saalai, 1901-1920).

## Branch 15J: Sthāpatya Veda Ajitāgama

Structure: 4 Divisions. Only one, the Kriyā Pāda is published.

Beginning:

अजितागमः । क्रियापादः । प्रथमः पटलः । तन्त्रावतारः ।
श्रीमद्गिरिवरे रम्ये मन्दरे चारुकन्दरे ।
देवदानवगन्धर्वदैत्यदिव्याङ्गनागणैः १
यक्षराक्षसनागेन्द्रभूतप्रेतपिशाचकैः ।
मातृकिंपुरुषैश्चैव प्रमथैर्वैनतेयकैः २
विद्याधरैश्च विविधैः किन्नरैर्मुनिभिस्तथा ।
अष्टादशगणैरेतैर्जुष्टे तुष्टिप्रदे सदा ३
हृष्टपुष्टान्यपुष्टाद्यैः पतङ्गैः परिनादिते ।
पुष्पभारावनम्रैश्च फलभारावनम्रकैः ४
नानावृक्षलतागुल्मैः परितः परिशोभिते ।
हरिचन्दनमन्दारपारिजातैः सकल्पकैः ५
सन्तानैश्च कृतोद्याने गङ्गास्त्रोतःसमाकुले ।
हंसकारण्डवक्रौञ्चचक्रवाकादिसंतते ६
मत्तमातङ्गसिंहर्क्षमृगशाखामृगादिभिः ।
नानासत्त्वगणैर्मुक्तवैरभावैः समाकुले ७
आसीनमासने दिव्ये धर्माद्यैः परिकल्पिते ।
उमेशं देवदेवेशं सोमं सोमविभूषणम् ८
ब्रह्मेन्द्रधनदार्केन्दुवरुणान्तकवायुभिः
वस्वादित्यैश्च रुद्राद्यैः सर्वदेवैरुपासितम् ९
विनयेनाच्युतो गत्वा पृच्छति स्म जगद्गुरुम्
अच्युत उवाच
भगवन्देवदेवेश त्रिपुरान्तक शंकर १०
अजितं नाम यत्तन्त्रं शिवात्प्राप्तं त्वया पुरा
तन्ममाचक्ष्व देवेश तस्योत्पत्तिपुरःसरम् ११
एवमुक्तो महादेवः स्फुरन्निटिललोचनः
उवाच तन्त्रं हृष्टात्मा गिरिजापतिरव्ययः १२

Branch 15J: Sthāpatya Veda Ajitāgama

Ending:

एवं कर्म समाख्यातं स्वतन्त्रपरतन्त्रयोः
यथाक्रममथो वक्ष्ये स्वतन्त्रस्याधिकं विधिम् ८९
दक्षिणेतरयोस्तस्य पार्श्वयोस्तु जनार्दन
उषां च प्रत्युषां चैव कृत्वा चैकासनस्थिताम् ९०
करण्डमकुटोपेतां सर्वाभरणभूषिताम्
द्विनेत्रां द्विभुजां चैव हेमवर्णां धृताम्बुजाम् ९१
नेत्रोन्मीलनकर्मादि सर्वकार्यं सहैव तु
अधिवासे तयोः कुम्भौ पार्श्वयोरपि विन्यसेत् ९२
प्रधानकुण्डे होमं च तयोर्द्रव्यैश्च तैरपि
स्वनामपदमन्त्राभ्यां कुर्यादत्रोक्तसंख्यया ९३
मन्त्रन्यासं च ताभ्यां तु देवस्यानु प्रकल्पयेत्
एवं वै शक्तिका वापि स्थापयेत्स्वस्वमन्त्रकैः ९४
द्वाराध्यक्षौ च कर्तव्यौ दक्षिणेतरयोरपि
उग्रप्रशान्तनामानौ द्वारस्य परिकल्पयेत् ९५
तयोः कुम्भौ तथा स्थाने वेदिकापार्श्वयोर्न्यसेत्
अग्रेऽरुणं तथा स्थाप्य वाजिनं तद्बहिः क्रमात् ९६
लोकपालान्यथास्थानं कुम्भस्थान्विन्यसेत्क्रमात्
परिवारांश्च सर्वांस्तानधिवासे सहैव तु ९७
मन्त्रन्यासावसाने तु यथास्थानं प्रयोजयेत्
इति यः कारयेन्मर्त्यः सवितुः स्थापनं परम् ९८
आयुरारोग्यमाप्नोति पुत्रानिष्टांस्तथैव च
कामान्कामयते यो वै स तान्सर्वानवाप्य च ९९
देहत्यागोत्तरे काले भासते चापि सूर्यवत्
इत्यजिताख्ये महातन्त्रे क्रियापादे सूर्यस्थापनविधिश्चतुःपञ्चाशः पटलः

Reference: Bhatt, N. R., *Ajitāgama*, 2 vols., (Pondichery: Institut Francais D'Indologie, 1967).

## Branch 15K: Sthāpatya Veda Dīptāgama

Structure: Vol. 1 has 21 Chapters.
Beginning:

दीप्तागमः मङ्गलम्
गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं बृहदुदरमशेषं भूतरूपं पुराणम्
अमरवरसुपूज्यं रक्तवर्णं सुरेशं पशुपतिसुतमीशं विघ्नराजं नमामि १
उमाकोमलहस्ताब्जसंभावितललाटकम्
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्त्रजम् २
सरस्वत्यै नमः

प्रथमः पटलः

मन्त्रोद्धारविधिः
अतः परं प्रवक्ष्यामि मन्त्रोद्धारविधिक्रमम्
पशुपाशविनिर्मुक्तं भवदुःखविनाशनम् ३
साधकानां विशेषेण सर्वपापप्रणाशनम्
येनोपायेन ये देवा ईशत्वं प्रापिताः परा ४
तदुपायं विशेषेण श्रोतुमर्हसि चानल
शिवः सदाशिवश्चैव महेशश्च त्रिधा भवेत् ५
शिवं परमसंयुक्तं निर्गुणं निष्कलं ध्रुवम्
अरूपमविकारं च तृप्तामृतमनामयम् ६
अनाधारं सुसंसेव्यं भक्तिगम्यं परात्परम्
निष्कलं मनसोऽतीतमप्यवाच्यमरूपकम् ७
तस्मात्सदाशिवं तत्वं सकलं निष्कलान्वितम्
व्यक्ताव्यक्तमयं सूक्ष्मं नादरूपमनामयम् ८
तस्मान्महेशमुत्पन्नमत्यन्तगहनं परम्
ज्योतीरूपं परं व्यक्तं महेशं सकलं विदुः ९
तस्माच्छक्तिः समुत्पन्ना सूक्ष्मानन्ता सदा परा
ब्रह्मादिस्तम्बपर्यन्तं जगद्योनिर्मनोन्मनी १०
तस्मान्नादः समुत्पन्नो नादाद्बिन्दुः प्रजायते
तस्माद्वामा समुत्पन्ना ज्येष्ठा वामासमुद्भवा ११

Branch 15K: Sthāpatya Veda Dīptāgama

Ending:

प्रदक्षिणं ततः कृत्वा द्वारपूजां समारभेत् ६३
प्रविश्य गर्भगेहं तु कुबेराभिमुखः स्थितः
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समारभेत् ६४
उमाकुम्भादुमाबीजं पिण्डिकायां तु विन्यसेत्
ऊर्ध्वपद्मो ह्यधोपद्मे तत्कण्ठे चैव विन्यसेत् ६५
पूर्वादीशानपर्यन्तं न्यस्त्वा वामादिशक्त्यणून्
पूजयित्वा यथान्यायं गौरीगायत्रिमन्त्रतः ६६
पञ्चवर्णहविर्दद्यात्सोपदंशं शिवस्य तु
पायसं पिण्डिकायां तु तन्मूलेनैव दापयेत् ६७
आचमनं हृदा दत्त्वा निर्माल्यं तु विसर्जयेत्
मुखवासं च कर्पूरं शिवोमाभ्यां तु दापयेत् ६८
स्नपनं कारयेत्पश्चाद्यथाशक्ति विशेषतः
आचार्यं पूजयेत्पश्चाद्वस्त्राभरणकुण्डलैः ६९
स्वर्णयज्ञोपवीतं च सप्तहेमाङ्गुलीयकैः
शय्यावाहनदासींश्च रत्नानि विविधानि च ७०
सुपुष्टां वसुधां चैव सवत्सां गां तथैव च
एतानि गुरवे दद्यात्पश्चात्स्वयमपि भोजयेत् ७१
अधमं पञ्चनिष्कं तु द्विगुणं मध्यमं भवेत्
उत्तमं त्रिगुणं प्रोक्तमाचार्यस्य तु दक्षिणा ७२
पूजयित्वा यथान्यायं नैवेद्यान्तं विशेषतः
एवं यः कुरुते मर्त्यः पिण्डिकास्थापनं परम् ७३
पुत्रपौत्राश्च वर्धन्ते स्त्रीजनानां सुखावहम्
पिण्डिकास्थापनं प्रोक्तं शृणु देशिकलक्षणम् ७४
इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पिण्डिकास्थापनपटल एकविंशतितमः

Reference: Barazer-Billoret, M.-L.; Dagens, B., & Lefevre, V. ; and Sivācārya, S. Sambandhan, *Dīptāgama*, Vol. 1 (chap. 1-21), (Pondichery: French Institute of Indology, 2004).

Branch 15L: Sthāpatya Veda Sūkṣhmāgama
Structure: 4 Divisions. Only one, the Kriyā Pāda is published.
Beginning:

सूक्ष्मागमे उत्तरभागे । क्रियापादः । प्रथमः पटलः । कैलाशवर्णनम् ।
श्रीमत्कैलासशिखरे नानाद्रुमविराजिते
नानापक्षिसमाकीर्णे नानामृगसमाकुले १
सिद्धचारणगन्धर्वयक्षरक्षोगणैर्वृते
ब्रह्मादिभिर्देवगणैरिन्द्राद्यैर्लोकपलकैः २
योगिभिः सनकाद्यैश्च मुनिवर्यैः शुकादिभिः
नन्द्यादिप्रमथानां च गणैः संसेविते शुभे ३
सारूप्यादिपदं प्राप्तैर्महाभागैर्विराजिते
नानारत्नमये दिव्ये सुखैकफलदायके ४
विभ्राजते महाशृङ्गं सौवर्णं दिव्यमन्दिरम्
रत्नस्तम्भसहस्राढये तत्रस्थे मणिमण्टपे ५
सिंहासने समासीनं ब्रह्मेन्द्रादिसुरैर्वृतम्
पप्रच्छ पार्वती देवी शङ्करं लोकशङ्करम् ६
देव्युवाच
भगवन् देवदेवेश सर्वज्ञ परमेश्वर
त्वमेव श्रुतितन्त्राणां तत्त्वं जानासि शङ्कर ७
त्वन्मुखाम्भोजनिष्यन्दिसूक्तिधारामृतं प्रभो
पीत्वा श्रोत्रपुटाभ्यां तु तृप्तिर्मे नहि जायते ८
विविधानि च तन्त्राणि श्रुतानि बहुधा मया
तथापि चञ्चलं चित्तं बहुश्रवणकारणात् ९
तस्मात्संगृह्य सारांशं मोक्षमार्गैककारणम्
सम्यक् तत्त्वं विनिश्चित्य कारुण्याद्वद मे प्रभो १०
महेश्वर उवाच
सत्यमेतन्महादेवि यदुक्तं हि त्वयाऽनघे
अनन्ता निगमाः प्रोक्ताः शास्त्राणि विविधानि च
अमितानि पुराणानि विरुद्धानि परस्परम् ११

Branch 15L: Sthāpatya Veda Sūkṣhmāgama

Ending:

शिव उवाच
स्तोत्रेणानेन तुष्टोऽस्मि तव भक्त्या च पार्वति
वरं वरय दास्यामि यत्ते मनसि रोचते ५२
देव्युवाच
वरमन्यं न याचेऽहं तव भक्तिं विना प्रभो
तामेव सुदृढां देहि सैव मे परमा गतिः ५३
शिव उवाच
तथैव सततं भूयात् किमलभ्यं तव प्रिये
पुनर्भक्तहितार्थाय वरमन्यं ददामि ते ५४
स्तोत्रमहिमा
त्वया कृतमिदं स्तोत्रं भक्तिभावेन भावितः
यः पठेन्नियतो भूत्वा स याति परमां गतिम् ५५
अभ्यसेदन्वहं देवि संवादमिममावयोः
षट्स्थलज्ञानसम्पन्नः प्राप्नुयान्मुक्तिमुत्तमाम् ५६
एवमुक्तं मया देवि मोक्षमार्गैकसाधनम्
वेदागमपुराणानां सारभूतं तव प्रिये ५७
शास्त्रस्य गोपनीयता
गोपनीयमिदं शास्त्रं वीरमाहेश्वरप्रियम्
तेषामेव हि वक्तव्यं वीरमार्गानुसारिणाम् ५८
लिङ्गत्रयैकनिष्ठानां तत्प्रसादानुवर्तिनाम्
अन्येषां तु न वक्तव्यं कदाचिद् भिन्नवर्त्मनाम् ५९
इति श्रुत्वा महाज्ञानं पावनं शिवशासनम्
ध्यायमाना शिवं देवी तस्थौ सन्तुष्टमानसा ६०
इति श्रीसूक्ष्मागमे क्रियापादे शिवस्तोत्रनिरूपणं नाम दशमः पटलः १०

Reference: Dwivedi, Vrajavallabha, *Sūkṣmāgamaḥ: Kriyāpādaḥ: Translation with Notes*, (Varanasi, Shaiva Bharati Shodha Pratisthanam, 1994).

## Branch 15M: Sthāpatya Veda Suprabhedāgama

Structure: 4 Divisions.
Excerpt: I, 14, 142 ff.:

होमबल्युत्सवान् प्रातः कृत्वा चूर्णोत्सवं ततः
प्रासादस्याग्रतो वापि याम्ये वा पावकेऽथवा १४२
गोमयालेपनं कृत्वा धूपदीपैस्समन्वितम्
पालिकाद्यैरलंकृत्य स्थण्डिलं तत्र कारयेत् १४३
शूलं पश्चिमतः स्थाप्योलूखलं मुसलं ततः
वस्त्रेणोलूखलं वेष्टय दर्भैरावेष्टयेत्पुनः १४४
गन्धाद्यैरर्चयित्वा तु त्रिशूलं लूखलं ततः
घृतं शिरोऽर्पणं कृत्वा हेमदूर्वाङ्कुराक्षतैः १४५
सुशुष्कां रजनीं पूर्वं चूर्णे चूर्णे तु लूखले
हृदा प्रक्षिप्य चास्त्रेण कुट्टयेद्देशिकस्त्रिभिः १४६
ततो भक्तजनैस्सार्धं चूर्णयेद्देशिकोत्तमः
संस्नाप्य लिङ्गं चूर्णेन पञ्चब्रह्म समुच्चरन् १४७
स्नापयेत्कौतुकं शूलं हृन्मन्त्रेण सतैलकम्
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः १४८
ग्रामं वा नगरं वापि शीघ्रं गच्छेत्प्रदक्षिणम्
नदीतटाकतीरे वा स्थण्डिलद्वितये कृते १४९
शूलं तत्रैव संस्थाप्य तत्पूर्वे कलशान्न्यसेत्
अर्चयेत्स्वस्वमन्त्रेण शूलं वै कलशांस्तथा १५०
गङ्गा च यमुना चैव नर्मदा च सरस्वती
सिन्धुर्गोदावरी चैव कावेरी चैव सप्तकान् १५१
आवाह्य मध्यकलशे गन्धतोयसुपूरिते
अनन्तादिशिखण्डयन्तान्कलशेष्वभितो न्यसेत् १५२
पुण्याहं वाच्य शूलास्त्रदेवानभ्यर्च्य पूजयेत्
स्नापयेत्कलशैः पश्चात्स्नानं तीर्थे समाचरेत् १५३
त्रिशूलेन सहैवात्र ये तीर्थं कुर्वते नराः
मुच्यते सर्वपापेभ्यो निर्मोकादिव पन्नगाः १५४

Branch 15M: Sthāpatya Veda Suprabhedāgama

Excerpt: II, 7, 38 ff.:

प्रभाते विधिवत्स्नात्वा सकलीकृतविग्रहः
पर्युषितानि पुष्पाणि पवित्राणि विसर्जयेत् ३८
पूजनं पूर्ववत्कृत्वा स्नपनान्ते विशेषतः
मृच्चूर्णलेपनं पूर्वं भस्मना लेपनं ततः ३९
दन्तकाष्ठैश्च दन्तानि धावयेद्देशिकोत्तमः
पूर्णकुम्भोदकैः स्नानं कृत्वा गन्धादिभिः पुनः ४०
वस्त्रैराभरणैश्चैव मूलमन्त्रेण देशिकः
संपूज्य देवदेवेशं नृत्तगेयसमन्वितम् ४१
सदाशिवमनुस्मृत्य मूलमन्त्रं समुच्चरेत्
पवित्रारोहणं कृत्वा देवेशं पिण्डकान्वितम् ४२
मण्डलस्थं शिवं यष्ट्वा गन्धाद्यैरनुपूर्वशः
सहस्राक्षरमन्त्रेण हुत्वान्तेऽग्निं समर्प्य वै ४३
पवित्रं वह्निमारोप्य परिशेषमाथाचरेत्
पञ्चावरणदेवानां पवित्रं हृदयेन तु ४४
अन्येषां चैव देवानां दापयेत्तु पवित्रकम्
कर्तुश्च देशिकस्यैव तयोः पत्न्योश्च देशिकः ४५
शिष्याणां परिचाराणां दत्त्वा वै तत्पवित्रकम्
गन्धपुष्पैस्तु संपूज्य धूपदीपैर्विशेषतः ४६
प्रभूतहविषं पश्चात्पायसादीनि दापयेत्
होमं तथैव कर्तव्यमाद्यन्तं मुनिभोजनम् ४७
जनानां सर्वदानानि दत्त्वा तत्र यथार्हकम्
वस्त्रैराभरणैश्चान्यैराचार्यं पूजयेत्ततः ४८
यतीनां शुद्धशैवानामन्यान्माहेश्वरानपि
विशेषभोजनं दानं कृत्वा तत्र स्वशक्तितः ४९

Reference: *Suprabhedāgama*, (Śintātiripeṭṭai, Madras: ŚivañāNapotayantraśālai, 1907).

Branch 15N: Sthāpatya Veda Svāyambhuvāgama
Structure: 4 Divisions. Only one, the Vidyā Pāda is published.
Beginning:
स्वायंभुवसूत्रसंग्रहः । विद्यापादः । प्रथमः पटलः । पशुविचारः ।
शिवं प्रणम्य परमं निधनेशमतः परम् ।
ज्ञानदीक्षे प्रवक्ष्यामि ते शृणुध्वं समाहिताः १
अथात्ममलमायाख्यकर्मबन्धविमुक्तये ।
व्यक्तये च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते २
तदेकमप्यनेकत्वं शिववक्त्राम्बुजोद्भवम् ।
परापरेण भेदेन गच्छत्यर्थप्रतिश्रयात् ३
एवमेतत्सुरेशानः शास्त्रसद्भावमुत्तमम् ।
सूत्रद्वयेन संगृह्य प्राह विस्तरशः पुनः ४
अथात्माविमलो बद्धः पुनर्मुक्तश्च दीक्षया ।
विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः ५
अचेतनो विभुर्नित्यो गुणहीनोऽक्रियोऽप्रभुः ।
व्याघातभागशक्तश्च शोध्यो बोध्योऽकलः पशुः ६
पूर्वं मायात्मकाद्बन्धादित्थमात्मा स्थितो मया ।
प्रोक्तो गुरुमुखोक्तेन श्लोकबन्धेन हे द्विजाः ७
भोक्ता भोजकभावेन नानाभोगविसर्पिणा
सांप्रतं प्रोच्यते बद्धो बन्धेनात्मा कलादिना ८
अत्यन्तमलिनस्यास्य प्रागुक्तस्याविकारिणः
कला संश्लेषमायाति शिवेच्छानुविधायिनी ९
कलोद्बलितचैतन्यो विद्यादर्शितगोचरः
रागेण रञ्जितश्चापि बुद्ध्यादिकरणैस्ततः १०
मायाद्यवनिपर्यन्ततत्त्वभूतात्मवर्त्मनि
भुङ्क्ते तत्र स्थितो भोगान्भोगैकरसिकः पुमान् ११
भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणा
तां समर्थितचैतन्यः पुमानभ्येति कर्मतः १२
कर्मतश्च शरीराणि विषयाः करणानि च

Branch 15N: Sthāpatya Veda Svāyambhuvāgama

Ending:

अन्तरङ्गतरा शोध्या बहिरङ्गतरापि च
बहिरङ्गेऽपनीते स्यादन्तरङ्गक्रियाक्रमः १३
एवमध्वा शिवस्योक्त उद्बन्धक्रमयुक्तितः
लोके चाध्वव्यवस्थेयं दृष्टा वस्तुनिबन्धने १४
दग्धसंसारबीजस्य या पुंसोऽपश्चिमा स्थितिः
सा गतिस्तस्य विज्ञेया न देशान्तरसंस्थितिः १५
धर्माद्धर्मान्तरव्यक्तौ सत्यां लोके गतं यथा
प्रोच्यते पटपर्णादि वस्तु तद्वत्पुमानपि १६
इति स्वायम्भुवसूत्रसंग्रहे तृतीय अनुग्रहशक्तिपटलः
चतुर्थः पटलः अध्वा
अथात्मबन्धसंतानपशुत्वविनिवृत्तये
व्यक्तये च शिवत्वस्य षड्विधोऽध्वेह कीर्त्यते १
तत्त्वाध्वा च पदाध्वा च वर्णाध्वा भुवनात्मकः
मन्त्रात्मकः कलाध्वा च विशत्येकं शिवं पदम् २
अप्रमेयमनिर्देश्यमनौपम्यमनामयम्
सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्ययमीश्वरम् ३
अप्रमेयमनन्तत्वादनिर्देश्यमलक्ष्यतः
अनौपम्यमसादृश्याद्विमलत्वादनामयम् ४
सूक्ष्मं चानुपलभ्यत्वाद्व्यापकत्वाच्च सर्वगम्
नित्यं कारणशून्यत्वादचलत्वाच्च तद्ध्रुवम् ५
अव्ययं परिपूर्णत्वात्स्वामिभावात्तथेश्वरम्
शिवतत्त्वमिदं प्रोक्तं सर्वाध्वोपरि संस्थितम् ६
ओंकारात्मतया भाति शान्त्यतीतः परः शिवः
बीजपङ्कजमध्यस्थः समस्ताध्वमुखः प्रभुः ७

Reference: Filliozat, Pierre-Sylvain, ed., *The Tantra of Svayaṃbhū vidyāpāda with the commentary of Sadyojyoti*, (Delhi: Motilal Banarsidass, 1994).

## Branch 15O: Sthāpatya Veda Vīrāgama

Structure: Four paṭalas of the latter half of Vīrāgama, have been published.
Beginning:

वीरागमोत्तरम् । प्रथमः पटलः ।
कैलासशिखरे रम्ये सर्वधातुसमन्विते
पुरायवृक्षैश्च संछन्ने रत्नधातुसमन्विते १
देवदेवः शिवः शम्भुः जयते सर्वदा विभुः
कदाचित् कामिनी गौरी सुरगन्धर्वसेवितम् २
शम्भुं निरञ्जनं देवं व्योमकेशं सदाशिवम्
पप्रच्छ परमप्रीत्या वीरमाहेश्वरान्वितम् ३
देवदेव जगन्नाथ सर्वाभीष्टफलप्रद
मम प्रीत्या महादेव स्वाचारं गुरुकल्पितम् ४
वीरमाहेश्वराणां च यत् सर्वं ब्रूहि तत्प्रभो
पुरा कृतयुगे गौरि रेणुको मुनिपुङ्गवः ५
सर्वागमसमोपेतः धर्मशास्त्रसमन्वितः
कलाभिज्ञो धर्मवेत्ता मन्त्र लक्षणलक्षितः ६
देशिकेन्द्रस्तत्त्वनिधिः षट्स्थ लब्रह्मपूजितः
तृणीकृतब्रह्मविष्णुः दानवेन्द्रप्रपूजितः ७
यक्षगन्धर्वसिद्धैश्च पूजितः सुरसेवितः
आधारचक्रराजानं गणाध्यक्षो गजाननः ८
भक्तमाहेश्वराणां सचाचारमस्मदीयकम्
कथयामास मत्प्रीत्या ब्रह्मानन्दरसान्वितः ९
तत्सर्वं साधकोपायं आगामाचारवारितम्
अहं वामि मे कान्ते शृणु मद्भक्तिभक्तितः १०
पातालवक्त्रे मे गौरि पञ्चब्रह्मतिरस्कृतम्
शिवतत्त्वं तत्त्वनथं जायते मम संनिधौ ११
अशेषप्रमथाः सर्वे तृणीकृतपुरन्दराः
तत्तत्त्वं मम भक्त्या च धारयन्ति गुरोः कृपात् १२
तत्त्वानां शिवतत्त्वं च राजानं रमणीयकम्

Branch 15O: Sthāpatya Veda Vīrāgama

Ending:

लभते साधु यत्पृष्टं पादद्वन्द्वरजः शुभम् ५८९
पवित्रमघनाशं च सत्यज्ञानैकसाधनम्
असुरेन्द्राः शिरोमध्ये धारयन्ति किमद्भुतम् ५९०
सर्वेषां शम्भुयोगीनां गुरुद्राणां पदच्युतम्
यद्रजः सर्वदा लोके विरागमूर्तीव राजते ५९१
तद्रजः सर्वदा लोके योगिभिः ज्ञानसाधनैः
वालखिल्यैः सहस्रैश्चा प्युप मन्युपुरस्सरैः ५९२
दीक्षाङ्गशैवसंस्कारैः शतानन्दपुरूरवैः
सेव्यते स्वात्मविज्ञानं आत्मसाधनपेशलात् ५९३
रजोदर्शनमारभ्य ब्रह्मयोगीश्वराः सदा
वालखिल्यदधीच्यत्रिशतानन्दपुरूरवाः ५९४
सर्वकर्माणि संत्यज्य यद्रजः शाम्भवात्मकम्
वीरमाहेश्वराणां च पादद्वन्द्वच्युतं शुभम् ५९५
आत्मानमिव कायेषु धार्यते ज्ञानसाधनात्
दीक्षां विद्युत्प्रभारूपां मोक्षपूजां मनोहराम् ५९६
घटपञ्चकसंयुक्तां शिवागमपरिष्कृताम्
पञ्चब्रह्मान्वितां विद्यां पञ्चसूतकवर्जिताम् ५९७
पुरातनाः पुण्योदयाः कांक्षन्ति प्रभवो बुधाः
तस्मात् सर्वप्रयत्नेन दीक्षाहीनं नरं प्रिये ५९८
चतुर्वेदधरं विप्रं सर्वतत्त्वसमन्वितम्
सुरामाण्डोदकमिव पश्य गौरि निरन्तरम् ५९९
दीक्षाविहीनं द्विजनायकं शिवे वेदाङ्गसंस्कारपलितकायम्
प्रेतात्मसन्धानसुरार्चितं परं त्वं पश्य लोके सुरबिन्दुवद्यथा ६००
इति श्रीवीरागमे वीरशैवदीक्षा स्वरूपपादरेणवर्णनं नाम चतुर्थः पटलः

Reference: Malladevaru, H.P., ed., *Vīrāgamottaram*, Vol. 1, (Mysore: Oriental Research Institute, 1988).

Branch 15 P: Sthāpatya Veda Rauravāgama

Structure: There are two divisions, *Vidyā Pāda* and *Kriyā Pāda.*

Beginning:

रौरवागमः । विद्यापादः । प्रथमः पटलः । उपोद्घातः ।
शिवविद्यात्मविज्ञानतत्त्वादिशिखराश्रितम् ।
भानुमन्तमिवाभान्तं भाभिरप्रतिमौजसम् १
तेजोराशिं महाप्राज्ञं रुरुं मुनिवरोत्तमम्
प्रसन्नमनसं शान्तं शिवज्ञानैककारणम् २
भार्गवाङ्गिरसात्रेयपौलस्त्याः समरीचयः
पप्रच्छुर्विनयानम्रा ऋषयो हृषिताननाः ३
भगवञ्छिवविद्यात्मतत्त्वविज्ञानसंविधिम्
यागसंस्कारयोगांश्च विधिवत्प्रब्रवीहि नः ४
स मन्त्रपूतान् संस्पृश्य पुष्पपूर्णो ज्ज्वलाञ्जलीन्
हर्षादुद्गतरोमाञ्चः प्राह वाक्यमिदं रुरुः ५
सुराधिपं नमस्कृत्य शशाङ्ककृतशेखरम्
कपालमालिनं देवं प्रणतोऽस्मि सदाशिवम् ६
कालेश्वरं महाकालं कालञ्जरनिवासिनम्
कालकृत्कालवेत्तारं प्रणतोऽस्मि सदाशिवम् ७
सर्वकृत्सर्ववेत्तारं सर्वज्ञमपराजितम्
सर्वभूतात्मभूतस्थं प्रणतोऽस्मि सदाशिवम् ८
योऽसृजत्सर्वभूतानि ब्रह्माद्यांश्च सुरासुरान्
तमहं लोककर्तारं प्रणतोऽस्मि सदाशिवम् ९
वरं वरेण्यं वरदं वरिष्ठं वरवाहनम्
वनमालाधरं देवं प्रणतोऽस्मि सदाशिवम् १०
प्रीतिमत्प्रीतिदातारं सुप्रियं प्रियदर्शनम्
उमाप्रियं सदा कान्तं प्रणतोऽस्मि सदाशिवम् ११
धर्माधर्ममयं देवं सुखदुःखफलोदयम्
बन्धमोक्षप्रणेतारं प्रणतोऽस्मि सदाशिवम् १२
मनोबुद्धिरहंकारतन्मात्रेन्द्रियगोचरम्

Branch 15 P: Sthāpatya Veda Rauravāgama

Ending:

स्यादूरुमूलान्तरमेकमात्रं सार्धाङ्गुले नान्तरमूरुमध्ये
जान्वन्तजङ्घानलकान्तरं च स्यादष्टषड्भागषडङ्गुलेन ४७
मानसूत्रद्वयं चैव मणिबन्धावसानकम्
अथवा पार्श्वसूत्रं च मणिबन्धावसानकम् ४८
द्व्यन्तरं वेदभागः स्यात्पञ्चभेदावसानकम्
करण्डमकुटोपेतं जटामकुटमण्डितम् ४९
पीताम्बरधरं चैव दुकूलाम्बरमेव वा
नाभ्यधः पञ्चमात्रं स्याद्व्यासमानं विधीयते ५०
गुल्फादूर्ध्वे षडङ्गुल्यं वस्त्रपर्यन्तमिष्यते
अभयं सव्यहस्ते स्यात्स्तनचूचुकसीमकम् ५१
सूत्रात्तु तलमध्ये तु द्व्यन्तरं द्वादशाङ्गुलम्
वरदं वामहस्ते स्याच्छ्रोण्या ऊर्ध्वे समायुतम् ५२
सूत्रात्तु करमध्यं च त्रयोदशाङ्गुलमिष्यते
अथवा चोर्ध्वपार्श्वे तु सिंहकर्णमथापि वा ५३
परहस्तद्वये चैव कटकं तु विधीयते
हिक्कासमं च कटकं कर्तरीमुखमेव वा ५४
बहिः कक्षान्तरे वापि सव्यपार्श्वे जपाक्षकम्
वामपार्श्वकरे चैव पद्मोत्पलसमन्वितम् ॥
बीजापूरं च पद्मं च शङ्खचक्रमथापि वा ५५
श्यामनिभवेदकरपद्मवरदाभयजपाक्षफलयुक्तम्
पीतवसनान्वितजटामकुटयुक्तं श्वेतकमलासनमनोन्मनिस्वरूपम् ५६
इच्छामयी ज्ञानमयी क्रिया च सान्तर्लिङ्गे चालयान्तर्गते स्यात्
बाह्ये शालादिग्विदिग्विष्टदेशे तत्तन्मध्ये स्थापयेत्कामकोष्ठम् ५७
इति रौरवे क्रियापादे कामकोष्ठविधिः पञ्चषष्टितमः पटलः

Reference: Bhatt, N.R., *Rauravāgama*, 3 vols., [Pondichery, Institut Francais D'Indologie, 1985, 1972, 1988.

## Branch 15Q: Sthāpatya Veda Makuṭāgama

Structure: Two divisions have been published, *Kriyāpāda* and *Charyāpāda.*

Beginning:

क्रियापाद । क्रियापादे प्रथमः पटलः ।
कैलासशिकरावासः कालकालः कृपानिधिः
अपारमहिमाधारो महादेवो महेश्वरः १
अशेषजगदाधारं सर्वकारणकारणम्
आदिमध्यान्तरहितमप्रमेयमनाकुलम् २
असंख्याताद्भुताचिन्त्यस्वशक्तिपरिशोभितम्
परं शिवं समागम्य प्रणम्योवाच भक्तिमान् ३
रुद्र उवाच
आदिदेव कृपासिन्धो पञ्चकृत्यपरायण
यतस्त्वं सर्वकर्ताऽसि सर्वज्ञः सर्वमप्यसि ४
अतः सर्वोपकाराय निगमागमसंहिताः
शब्दार्थमुख्या भवता निःश्वासवदुदीरिताः ५
श्रीमन्मुखादधिगतं मकुटं मकुटायितम्
भगवन् श्रोतुकामोऽस्मि तदीयं भागमुत्तरम् ६
उत्तमा यत्र कथ्यन्ते साक्षान्मोक्षप्रदायिनः
विशिष्टधर्मा इति हि शाम्भवव्रतधारिणाम् ।
उक्तं पुरस्ताद् भवता तदिदानीं निबोध मे ७
परशिव उवाच
शृणुष्वावेदयिष्यामि रहस्यं मकुटोत्तरे
शाम्भवव्रतमाहात्म्यमाह्निकं व्रतिनामपि ८
अर्चाविशेषाः पूजोपकरणानां च साधनम्
तदन्त्येष्टिप्रकारश्च कथ्यन्ते ह्यत्र संग्रहात् ९
शाम्भवव्रताचरणम्
तितीर्षुर्जन्मवाराशिं नानादुःखग्रहाकुलम्
वेदागमान्तविदितं शाम्भवव्रतमाचरेत् १०
तनुत्रयगतानादिमलत्रयविशोधनाः

Branch 15Q: Sthāpatya Veda Makuṭāgama

Ending:

मरणाशौचस्य प्राधान्यम्
जातके मृतकं वाऽपि मृतके वाऽपि जातकम्
यदि स्यान्मृतकस्यैव प्राधान्यं परिकीर्तितम्
पित्रोस्तु मरणाशौचमन्याशौचस्य बाधकम् २३
पितुर्दशाहमध्ये तु माता यदि मृता भवेत्
पितुः पूर्णं तु निर्वर्त्य मातुर्गृह्णीत पक्षिणीम् २४
शवानुगमे शुद्धिविधिः
अनुगम्य शवं विप्रो ज्ञातेरन्यस्य वा पुनः
स्नात्वा च भस्मनोद्धूल्य मां दृष्ट्वैव विशुद्ध्यति २५
नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम्
न जन्ममरणोद्भूतमाशौचमिह विद्यते २६
सद्यःशौचविधानम्
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे
आपद्यपि च कष्टायां सद्यःशौचं विधीयते २७
सन्ध्या पूजा च कदापि न त्याज्या
सूतके मृतके चैव सन्ध्यां पूजां सन्त्यजेत्
उपांशुसन्ध्यां पूजां तु कुर्यात् त्रिकरणैरपि २८
ग्रन्थोपसंहारः
शाम्भवव्रतिनां धर्माः संक्षेपेण मयोरिताः
श्रद्धावन्तो विमुच्यन्ते क्लिश्नन्त्यन्ये विमोहिताः २९
मकुटं धर्मशास्त्रं तु मदीयं मकुटायितम्
पठनीयं प्रयत्नेन मत्प्रसादाभिकाङ्क्षिणा ३०
इति श्रीमकुटागमे उत्तरभागे चर्यापादे आशौचविधिकथनं नाम दशमः
पटलः १० समाप्तश्चायं मकुटागमः

Reference: Ghose, Rama and Dwivedi, Vrajavallabha, *Makuṭāgama, Kriyāpāda and Charyāpāda, English translation and notes*, (Varanasi: Shaiva Bharati Shodha Pratishthanam, 1996).

## Branch 15R: Sthāpatya Veda Chandrajñānāgama

Structure: Two of four divisions, *Kriyāpāda* and *Chāryāpāda* have been published.
Beginning:

चन्द्रज्ञानागमः । प्रथमः पटलः ।
कलधौताचलोत्तुङ्गशृङ्गरिङ्गन्निकेतनम् ।
धर्ममूर्तिधरं श्रीमन्महावृषभकेतनम् १
अनन्तरुद्रप्रमथपरिषन्निकषोज्ज्वलम् ।
अनन्तरुद्रमासाद्य धिषणो धिषणोन्नतः २
परिस्पृशन् श्रीपदाब्जपीठं मूर्ध्ना मुहुर्मुहुः ।
बद्धाञ्जलिः सुप्रसाद्य नीचैर्वाचमुवाच ह ३
बृहस्पतिरुवाच
भगवन् करुणासिन्धो सर्वज्ञानसमाश्रय ।
नाविष्कृताश्चेद् भवता स्फुटमागमसंहिताः ॥
जगत् किलान्धतामिस्रे निमज्जेदज्ञानवर्जितम् ४
अविज्ञायैव यो लोके भवदागमसंहिताः ।
विपश्चितं स्वं मनुते न तस्माद्विद्यते पशुः ५
भवत्प्रसादसंपत्त्या भवदीयागमामृतम् ।
निपीयैवामरगुरुरभवं सिद्धसाधनः ६
आकर्णिता मया भागाश्चन्द्रज्ञानागताः शुभाः ।
बहवस्तदिह ब्रूहि कृपया शिवशासनम् ७
मोक्षधर्मा विशेषेण तत्रोच्यन्त इति श्रुतम्
अहं श्रुतेन येन स्यां विदिताशेषवेदनः ८
अनन्तरुद्र उवाच
युक्तं पृष्टं हि सुधिया त्रिदिवेशगुरो त्वया
शृणुष्वावहितो भूत्वा वक्ष्यामि शिवशासनम् ९
पशुपतिपदार्थनिर्वचनम्
ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः
पशवः परिकीर्त्यन्ते संसारवशवर्तिनः १०
तेषां पतित्वाद्विश्वेशः शिवः पशुपतिः स्मृतः

Branch 15R: Sthāpatya Veda Chandrajñānāgama

Ending:

क्षुरकर्मादिविशुद्धिः
क्षुरकर्मणि वान्ते च प्रेतधूमे च मैथुने
दुःस्वप्ने दुर्जनस्पर्शे नरः स्नात्वा विशुद्ध्यति १६
सावित्र्यादिजपस्य महापातकनाशकत्वम्
अयुतं चैव सावित्र्याः प्राणायामशतद्वयम्
स्नानद्वादशकं नद्यां तीर्थयात्रा द्वियोजने ॥
प्राजापत्यस्य कृच्छ्रस्य तुल्यमेतच्चतुष्टयम् १७
सहस्रपरमां देवीं शतमध्यां दशापराम्
गायत्रीं च जपेन्नित्यं महापातकनाशनम् १८
वामदेव्यं त्रिरावृत्य तदह्नैव विशुद्ध्यति
पौरुषं सूक्तमावृत्त्य मुच्यते सर्वकिल्बिषात् १९
रुद्रैकादशकं जप्त्वा तदह्नैव विशुद्ध्यति
श्रीमत्पञ्चाक्षरीं जप्त्वा तत्क्षणादेव शुद्ध्यति २०
अथर्वशिरसं चैव नीलरुद्रं तथैव च
सकृज्जप्त्वाऽखिलैः पापैस्तस्मिन्नहनि मुच्यते
त्रिसुपर्णं च जप्त्वैव मुच्यते सर्वकिल्बिषैः २१
श्रद्धायाः शिवसायुज्यप्रापकत्वम्
यः श्रद्धयैवाचरति विहितं शिवशासने
स श्रीकण्ठप्रसादेन शिवसायुज्यमृच्छति २२
शास्त्रस्य गोपनीयता
इति ते गदितं सम्यग्गीष्पते शिवशासनम्
रहस्यं सर्वशास्त्रेषु गोपनीयं प्रयत्नतः २३
इति श्रीचन्द्रज्ञानागमे उत्तरभागेऽनन्तरुद्रबृहस्पतिसंवादे शिवशासने
चर्यापादे प्रायश्चित्तविधिकथनं नामाष्टमः पटलः ८

Reference: Ghose, Rama and Dvivedi, Brajavallabha, *Candrajñānāgama: Kriyāpāda and Chāryāpāda*, (Varanasi: Shaiva Bharati Shodha Pratishthanam, 1995).

## Branch 15S: Sthāpatya Veda Parameśhvarāgama

Structure: 23 chapters
Beginning:

प्रथमः पटलः
मतभेदस्वरूपनिरूपणम् ।
मङ्गलाचरणम् ।
वन्दे गिरीन्द्रतनयाद्विरदाननाग्निभूनन्दिभृङ्गिरिटिसेवितपादपद्मम् ।
पञ्चाननं फणिशशीभतरक्षुचर्मभूषं महेशमनिशं शिरसा गिरीशम् १
पाशाङ्कुशेष्टदविषाणकराग्रबीजपूरोज्ज्वलं तरुणदिव्य जटाप्रकाशम् ।
कोटीरकोटिशशिरेखमुमातनूजं वन्दे गणेन्द्रमनिशं वरदानदक्षम् २
कैलासशिखरे रम्ये सिद्धगन्धर्वसेविते ।
सर्वकल्याणनिलये पुण्ये शङ्करमन्दिरे ३
एकदा रहसि प्रेम्णा पार्वती परमेश्वरम् ।
सर्वलोकोपकाराय नमस्कृत्यैवमब्रवीत् ४
पार्वत्युवाच
देवदेव महादेव चन्द्रशेखर धूर्जटे ।
मतभेदस्वरूपं मे वद तत्त्वेन सर्वशः ५
मतानि कतिभेदानि लक्षणं तस्य तस्य किम् ।
आचारश्च कथं तत्र प्रायश्चित्तं फलं त्वपि ६
ईश्वर उवाच
शृणु देवि प्रवक्ष्यामि मतानां लक्षणादिकम् ।
यज्ज्ञात्वा निर्वृत्तिं याति शिवः संजायते स्वयम् ७
आदौ तु सौगतमतं तच्च पञ्चविधं प्रिये
बौद्धसौगतचार्वाकजैनार्हतविभागतः ८
तेषामिदं महामुख्यं मतं साधारणं प्रिये
तारे तुत्तारतारे स्वाहेति शून्यार्थको मनुः ९
अथ वैदिकमीशानि मतं यद्वेदसंमतम्
मन्त्रस्तु ब्रह्मगायत्री सर्वसाधारणः प्रिये १०
ततोऽधिकं सौरमतं गायत्री सौरलक्षणा

Branch 15S: Sthāpatya Veda Parameśhvarāgama

Ending:

देव्युवाच
अनाधार सदाधार धातरीश्वर वल्लभ
निरन्तर निरातङ्क परिपूर्णाद्वय प्रभो १२
नित्यसत्यसुखज्योतिःकेवलस्य चिदात्मनः
सद्भावेऽन्यस्य कार्यस्याद्वितीयत्वं कुतस्तव १३
उक्तानि लक्षणान्येतान्यखिलानि स्युरीश्वर
तथापि त्वयि विश्वेश छिन्ध्येतत् संशयं मम १४
ईश्वर उवाच
घटाद्या मृत्समुपन्ना मृदेव व्यवहारतः
नामरूपक्रियावत्त्वं कनकात् कुण्डलादिवत् १५
कार्यस्य कारणात्मत्वं लोकसिद्धमपि श्रुतिः
मृत्तिकेत्येव सत्यं चेत्याह बीजाङ्कुरं स्फुटम् १६
व्यवहर्ता व्यवहृतिर्व्यवहार्यमिदं त्रयम्
एक एवासमिह यत् सुवर्णत्वं हि काञ्चनम् १७
यावन्नात्मपरिज्ञानं शिश्नोदरकुवादिनाम्
तावद्भेदवदाभासो ज्ञाते मयि कुतो भिदा १८
रज्जौ सर्पत्वमारोप्य स्वभ्रान्त्या कुमना अहिः
बिभेति किं वा तस्येयं करोति न करोति वा १९
संस्थिते मय्यधिष्ठाने निस्तरङ्गसुखाम्बुधौ
संजायन्ते विलीयन्ते नामरूपात्मबुद्बुदाः २०
देव्युवाच
प्रकृतेः परतन्त्राया यद्वा स्वातन्त्र्यवत्र्मनः
जात्याधृतिरियं नेष्टा भवतोऽस्ति प्रयोजनम् २१
इति श्रीपारमेश्वरतन्त्रे त्रयोविंशतिपटलः समाप्तः २३

Reference: Dwivedi, Vrajavallabha, *Pārameśvarāgamaḥ, Translation with Notes*, (Varanasi: Shaiva Bharati Shodha Pratisththanam, 1995).

## Branch 15T: Sthāpatya Veda Kiraṇāgama

Structure: 12 chapters of Vidyāpāda have been published.
Beginning:

किरणागम पशुपटलः
कैलासशिखरासीनं सोमं सोमार्धशेखरम्
हरं दृष्ट्वाब्रवीत्तार्क्ष्यः स्तुतिपूर्वमिदं वचः १
गरुडः
जयान्धकपृथुस्कन्धबन्धभेदविचक्षण
जय प्रवरवीरेशसंरुद्धपुरदाहक २
जयाखिलसुरेशानशिरश्छेदभयानक
जय प्रथितसामर्थ्यमन्मथस्थितिनाशन ३
जयाच्युततनुध्वंसकालकूटबलापह
जयावर्तमहाटोपसरिद्वेगविधारण ४
जय दारुवनोद्यानमुनिपत्नीविमोहक
जय नृत्तमहारम्भक्रीडाविक्षोभदारुण ५
जयोग्ररूपसंरम्भत्रसितत्रिदशासुर
जय क्रूरजनेन्द्रास्यदर्शितासृक्सुनिर्झर ६
जय वीरपरिस्पन्ददक्षयज्ञविनाशन
जयाद्भुतमहालिङ्गसंस्थानबलगर्वित ७
जय श्वेतनिमित्तोग्रमृत्युदेहनिपातन
जयाशेषसुखवासकाममोहितशैलज ८
जयोपमन्युसंतापमोहजालतमोहर
जय पातालमूलोर्ध्वलोकालोकप्रदाहक ९
भक्तस्य मम भीतस्य शिवज्ञानं परं वद
यदवाप्य नराः सर्वे मुक्तिमायान्ति केवलाम् १०
एवमुक्तो हरः प्राह प्रस्फुरच्चन्द्रशेखरः
भगवान्
भद्रमेतत्त्वया पृष्टं शृणु ज्ञानं महोदयम् ११
किरणाख्यं महातन्त्रं परामृतसुखप्रदम्

Branch 15T: Sthāpatya Veda Kiraṇāgama

Ending:

त्रियुक्ता लोकपालाः स्युश्चतुर्थेऽष्टाणि कल्पयेत् ९
विद्येशानां शृणुष्वान्यल्लक्षणं मातृकात्मकम्
व्यापकं रेफसंयुक्तं चतुर्थस्वरसंयुतम् १०
बिन्दुयुक्तमनन्तस्य वाचकत्वेन संस्थितम्
रेफवर्णयुतं शान्तं षष्ठस्वरसमन्वितम् ११
बिन्दुदेहसमायुक्तं सूक्ष्मदेवस्य वाचकम्
मकारं विभुसंयोगाद्विसर्गाच्च शिवोत्तमः १२
शान्तवर्णान्तिमो वर्णो रेफयुक्तः सबिन्दुकः
षष्ठस्वरसमायुक्तः प्रोक्तो नेत्रैकनामनि १३
शवर्णान्तान्तिमो वर्णो रान्तान्तेन समायुतः
द्वितीयस्वरसंयुक्त एकरुद्रः सबिन्दुकः १४
भान्तान्ताधः स्थितो रान्तो द्वादशान्तेन भेदितः
बिन्दुना भूषितो मूर्ध्नि त्रिमूर्तेर्वाचको मतः १५
षष्ठस्वरयुतः शान्तः सबिन्दुः सान्ततः स्थितः
श्रीकण्ठ एष विख्यातस्ततः शृणु शिखण्डिनः १६
लान्तान्तिमश्चतुर्थेन भूषितो बिन्दुसंयुतः
समासेन मया तार्क्ष्य विद्येशाः परिकीर्तिताः १७
कूटमीकारसंयुक्तं बिन्दुनादविभूषितम्
गयत्री चैव सावित्री किं तु रेफविशेषणम् १८
ओंकारादिनमोन्तांश्च ज्ञात्वा मन्त्रान्प्रयोजयेत्
स्नात्वा शुद्धः पठेन्मन्त्राञ्छुचिः प्राग्भोजनात्परः १९
द्वयोरप्यन्यथा दोषो भवेदुच्छिष्टसंभवः २०

इति श्रीमत्किरणाख्ये महातन्त्रे विद्यापादे यन्त्रावतारो द्वादशः
पटलः समाप्तः विद्यापादः समाप्तः

Reference: Vivanti, Maria Pia, "Il "Kiraṇāgama", Testo e traduzione del "Vidyāpāda," in *Annali*, Supplemento n. 3 agli: vol. 35 (1975), fasc. 2, Napoli, 1975.

## Branch 16: Hārīta Saṃhitā
Structure: 6 Main Divisions.
Beginning:

हारीतसंहिता अथ प्रथम स्थानम् प्रथमोऽध्यायः
नत्वा शिवं परमतत्त्वकलाविरूढं ज्ञानामृतैकचटुलं परमात्मरूपम्
रागादिरोगशमनं दमनं स्मरस्य शश्वत्क्षपाधिपधरं त्रिगुणात्मरूपम् १
आत्रेयहारीतसंवादः
हिमवदुत्तरे कूले सिद्धगन्धर्वसेविते
शान्ते मृगगणाकीर्णे नाना पादपशोभिते २
तत्रस्थं तपसा युक्तं तरुणादित्यतेजसम्
शुद्धस्फटिकवच्छुभ्रं भूतिभूषितविग्रहम् ३
जटाजूटाटवीमूले उषितं शुभ्रकुण्डलम्
आत्रेयं बहुशिष्यैस्तु राजितं तपसान्वितम् ४
पप्रच्छ शिष्यो हारीतः सर्वज्ञानमिदं महत् ५
हारीत उवाच
भवन् गुणगणाधार आयुर्वेदविदां वर
विनयादविनीतोऽहं पृच्छामि मुनिपुङ्गव ६
कथं रोगसमुत्पत्तिरुत्पन्नो ज्ञायते कथम्
उपचारः प्रचारश्च कथं वा सिद्धिमिच्छति ७
एतत्सम्यक् परिज्ञानं कथयस्व महामुने
एवं पृष्टो महाचार्यो हारीतेन महात्मना
प्रत्युवाच ऋषिः पुत्रं प्रहस्योत्फुल्ललोचनः ८
आत्रेय उवाच
शृणु पुत्र महाप्राज्ञ सर्वशास्त्रविशारद
चिकित्साशास्त्रकुशल वैद्यविद्याविचक्षण ९
आयुर्वेदमपारन्तु श्लोकानां लक्षसंख्यया
कथं तस्य परिज्ञानं कालेनाल्पेन पुत्रक १०
अल्पायुषोऽल्पवक्तारः स्वल्पशास्त्रविशारदाः
अल्पावत्रारणे शक्ताः कलौ जाता इमे नराः ११

Branch 16: Hārīta Saṃhitā

Ending:

श्रुत्वा चैनं महातेजा हारीतो मुनिसत्तमः १
प्रणिपत्य गुरुश्रेष्ठं हृष्टान्तःकरणस्ततः
जगाम स्वर्णदीतीरं स्नानध्यानरतस्तथा २
य एतत् पठति शास्त्रं महर्षर्वचनाच्छ्रुतम्
सर्वपापविनिर्मुक्तो नीरुजः सुखमश्नुते ३
आदौ यद् ब्रह्मणा प्रोक्तमत्रिणा तदनन्तरम्
धन्वन्तरिणा प्रोक्तञ्च अश्विना च महात्मना ४
एवं वेदसमं ज्ञेयं नावज्ञाकारणं मतम्
अन्यैश्च बहुधा प्रोक्त नानाशास्त्रविशारदैः ५
अमीषां च मतं ग्राह्यं तस्मात् सर्वे समं विदुः
चरकः सुश्रुतश्चैव वाग्भटश्च तथापरः ६
मुख्याश्च संहिता वाच्यास्तिस्त्र एव युगे युगे ७
अत्रिःकृतयुगेवैद्यो द्वापरे सुश्रुतो मतः
कलौ वाग्भटनामा च गरिमात्र प्रदृश्यते ८
वैष्णवी चाश्विनी गार्गी तत्र माध्याह्निकापरा
मार्कण्डेया च कथिता योगराजेन धीमता ९
संहिता ऋषिभिः प्रोक्ता मन्त्रैर्नानाविधैर्विभो १०
अग्निवेशश्च भेडश्च जातूकर्ण्य पराशरः
हारीतःक्षीरपाणिश्च षडेते ऋषयस्तु ते ११
यथा सिंहो मृगेन्द्राणां यथानन्तो भुजङ्गमे
देवानाञ्च यथा शम्भुस्तथात्रेयोऽस्ति वैद्यके १२
तस्माद्यत्नेन सद्वैद्यैः सादरार्द्रसुमानसैः
अर्चनीयोऽनुमन्तव्यो दास्यति सुखसम्पदः १३
इत्यात्रेयभाषिते हारीतोत्तरे परिशिष्टाध्यायः १

Reference: Shastri, Ramavalamba, *Harita Samhita*, text with Asha Hindi Commentary, (Varanasi: Prachya Prakashan, 1985).

## Branch 17: Bhel Saṃhitā
Structure: 8 Main Divisions.
Beginning:

भेल संहिता सूत्रस्थानम् चतुर्थोऽध्यायः पिप्पल्यादि पानप्रलेपनम्
पिप्पल्यो दीप्यकश्चैव तथा मूषिककर्णिकाः
बिल्वस्य पल्लवाः श्वेता हरिद्रा मधुकं तथा १
एते कुष्ठं प्रतिघ्नन्ति युक्ताः पानप्रलेपनैः
गोपित्तादि प्रलेपः
गवां पित्तं शुनः पित्तं अलाबूं कटुकां तथा २
निम्बं नतं शर्करां च दद्यात्तद्वत्प्रलेपनम्
अन्यः प्रलेपः
या तुण्डमण्डलीद्वीपात् मूलान्येडगजस्य च ३
सुरादनीं सुगन्धां च दद्यात्तद्वत्प्रलेपनम्
सुवर्णपुष्प्यादि शोधनम्
सुवर्णपुष्पीं कटुकां श्यामां तेजोवतीं तथा ४
त्रिवृत्सञ्ज्ञातकं चैव कुष्ठे संशोधनं विदुः
आरग्वधादि तनुलेपनम्
आरग्वधं च भार्गीं च साश्वगन्धाम् गवादनीम् ५
श्वेतां ज्योतिष्मतीं चैव सूक्ष्मचूर्णानि कारयेत्
गवां पित्तेन तच्चूर्णं सप्तकृत्वः सुभावितम् ६
योज्यं सर्षपतैलेन सैन्धवेन च युक्तितः
एतद्वै हृतदोषस्य मितदध्यन्नभोजिनः ७
तनुलेपनमुद्दिष्टं कृमिकुष्ठविनाशनम्
गवेधुकमकुष्ठप्रयोगः
गवेधुकमकुष्ठौ च खदिरक्वाथपाचितौ ८
तावप्युभौ प्रयुञ्जीत कुष्ठिनां कुष्ठ शान्तये
कण्डूघ्नवृक्षप्रयोगः
अथ कण्डूघ्नवृक्षाणां रसाः स्युः कुष्ठिनां हिताः ९

Branch 17: Bhel Saṃhitā

Ending:

वाराहवस्तवृषणौ वृषणौ गोवृषस्य च
चटकर्कटकांश्चैव क्षीरेण सह साधयेत् ७९
तन्निरूहं तु शुक्रेण बस्तानामथ मिश्रयेत्
उच्चटेक्षुरकं चात्र कल्कपेष्यं समावपेत् ८०
घृतमाक्षिकसंयुक्तं प्रणीतः शर्करायुतः
किञ्चिल्लवणितो बस्तिर्गमयेत्स्त्रीशतान्यपि ८१
एष नारीविहाराणां बह्वन्तःपुरवासिनाम्
रेतोबलकरः श्रेष्ठः क्रीडाबस्तिरनुत्तमः ८२
आत्मगुप्ताफलैः क्षीरमुच्चटेक्षुरकैः शृतम्
भोजने वानुपाने वा वृष्यार्थं सम्प्रयोजयेत् ८३

रसायनबस्तिष्वतिदेशः

रसायना बस्तयस्तु ये मया पूर्वदर्शिताः
तानेतैर्मांसनिर्यूहैर्योजयेत्कल्पकल्पितान् ८४
बभ्रूसूकरखड्गाश्च छागगोमहिषास्तथा
क्रौञ्चकारण्डवाः क्रौञ्चचक्रवाकबकास्तथा ८५
निरूहमेषां संहृत्य लाभतस्साधु योजयेत्

पनसबीजादिबस्तिः

क्षीरं पनसबीजानि कपिकच्छूफलानि च ८६
उच्चटेक्षुरबीजानि मधुकं तालमस्तकम्
पिप्पल्यश्शारिवा द्राक्षा खर्जूरो मदनान्यपि ८७
जीवकर्षभकौ मेदा बीजं नीलोत्पलस्य च
गर्भेणानेन संसिद्धं चटकाण्डरसायुतम् ८८
शर्करामधुसंयुक्त ---- ॥

इति भेल संहिता समाप्तम्

Reference: Shastri, K.S. Subramania, and Sarma, C. Raja Rajeswara, *Bhel Saṃhitā*, (New Delhi: Sahitya Anusandhana Ekaka, 1977).

## Branch 18: Kāśhyapa Saṃhitā

Structure: 8 Main Divisions.
Beginning:

श्रीकाश्यपसंहिता वा वृद्धजीवकीयं तन्त्रम्
कौमारभृत्यम् सूत्रस्थानम्

किंवा लेहयितव्यं च किंवा लेहितलक्षणम्
अतिलेहितदोषाः के के च दोषा अलेहिते १
मन्दीलीढस्य किं रूपं गुडदोषाश्च तत्र के
के लेहनोद्भवा रोगाः कश्च तेषामुपक्रमः २
एतन्मे भगवन् सर्वं वक्तुमर्हसि तत्त्वतः
सुखं दुःखं हि बालानां दृश्यते लेहनाश्रयम् ३
इति पृष्टो महाभागः कश्यपो लोकपूजितः
प्रश्नं प्रोवाच निखिलं प्रजानां हितकाम्यया ४
यदन्नपानं प्रायेण गर्भिणी स्त्री निषेवते
रसो निर्वर्तते तादृक् त्रिधा चास्याः प्रवर्तते ५
मातृपुष्ट्यर्थमेकांशो द्वितीयो गर्भपुष्टये
तृतीयः स्तनपुष्ट्यर्थं नार्या गर्भस्तु पुष्यति ६
तादृक्प्रकृतयस्तस्माद्गर्भात् प्रभृति देहिनः
वातपित्तकफस्थूणास्तिस्रः प्रकृतयश्च ताः ७
वातिकाः पैत्तिकाः केचित् कफिनश्चैव देहिनः
द्वन्द्वप्रकृतयश्चान्ये समस्थूणास्तथाऽपरे ८
अरोगास्तु समस्थूणा वातिकाद्याः सदातुराः
एताः प्रकृतयः प्रोक्ता देहिनां वृद्धजीवक ९
एता आश्रित्य तत्त्वज्ञो भेषजान्युपकल्पयेत्
य एता वेद तत्त्वेन न स मुह्यति भेषजे १०
विलङ्गफलमात्रं तु जातमात्रस्य देहिनः
भेषजं मधुसर्पिर्भ्यां मतिमानुपकल्पयेत् ११
वर्धमानस्य तु शिशोर्मासे मासे विवर्धयेत्
अथामलकमात्रं तु परं विद्वान्न वर्धयेत् १२

Branch 18: Kāśhyapa Saṃhitā

Ending:

इदमुत्तरमक्लिष्टं व्याख्यातुमुपचक्रमे
कुरुक्षेत्रं मध्यदेशाद्योजनानां शतं परम् ५
समस्तान् षड्रसान् प्रायो भुञ्जते मध्यदेशजाः
भक्ष्यभोज्यान्नवीरास्ते तु भुञ्जन्तो वाऽसकृत्तथा ६
पूर्वदेशस्तु विज्ञेयो मधुरः शीतलो गुरुः
कुमारवर्तनीमादौ कटीवर्षस्तथैव च ७
मगधासु महाराष्ट्रमृषभद्वीपमेव च
पौंड्रवर्धनकं चापि मृत्तिकावर्धमानकम् ८
कर्वटं च समातङ्गं तामलिप्तं सचीरकम्
प्रियङ्गुमथ कौशल्यं कलिङ्गपृष्ठपूरकम् ९
एषु प्लीहविनो मर्त्या गलगण्डिकमेव च
गुडशाल्योदनप्राया मत्स्यभोजनसेविनः १०
प्रायशो मधुराहारा वातश्लेष्मात्मका नराः
तेषां कटुकतिक्तं च रूक्षमुष्णं च भोजनम् ११
यच्चान्यदपि श्लेष्मघ्नं तेषां तत्तत् प्रयोजयेत्
कञ्चीपदा नवध्वाना कावीरास्तुल्ययोरपि १२
वानसी कुमुदाराज्यं चिरिपालिस्तथैव च
चीरराज्यञ्च चोराणां पुलिन्दं द्रविडेषु च १३
करघाटशनानां च विवेहा मण्डपेषु च
कान्तारं च वराहं च घटास्वाभीरमेव च १४
दक्षिणां दिशमाश्रित्य देशा वि ---

खिलस्थानस्यैतावानेव भाग उपलब्धः
काश्यपसंहिता वृद्धजीवकीयतन्त्रं च
एतावत्येवोपलब्धभागे विश्राम्यति

Reference: Tewari, P.V., *Kāśyapa-Saṃhitā or Vṛddhajīvakīya Tantra*, (Varanasi: Chaukhambha Visvabharati, 1996).

Branch 19: Charaka Saṃhitā
Structure: 120 Chapters
Beginning:

चरकसंहिता सूत्रस्थानम् प्रथमो दीर्घञ्जीवितीयाध्यायः
अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः १
इति ह स्माह भगवानात्रेयः २
दीर्घं जीवितमन्विच्छन्भरद्वाज उपागमत्
इन्द्रमुग्रतपा बुद्ध्वा शरण्यममरेश्वरम् ३
ब्रह्मणा हि यथाप्रोक्तमायुर्वेदं प्रजापतिः
जग्राह निखिलेनादावश्विनौ तु पुनस्ततः ४
अश्विभ्यां भगवाञ्छक्रः प्रतिपेदे ह केवलम्
ऋषिप्रोक्तो भरद्वाजस्तस्माच्छक्रमुपागमत् ५
विघ्नभूता यदारोगाः प्रादुर्भूताः शरीरिणाम्
तपोपवासाध्ययनब्रह्मचर्यव्रतायुषाम् ६
तदा भूतेष्वनुक्रोशं पुरस्कृत्य महर्षयः
समेताः पुण्यकर्माणः पार्श्वे हिमवतः शुभे ७
अङ्गिरा जमदग्निश्च वसिष्ठः कश्यपो भृगुः
आत्रेयो गौतमः साङ्ख्यः पुलस्त्यो नारदोऽसितः ८
अगस्त्यो वामदेवश्च मार्कण्डेयाश्वलायनौ
पारिक्षिर्भिक्षुरात्रेयो भरद्वाजः कपिञ्जलः ९
विश्वामित्राश्मरथ्यौ च भार्गवश्च्यवनोऽभिजित्
गार्ग्यः शाण्डिल्यकौण्डिल्यौ वार्क्षिर्देवलगालवौ १०
साङ्कृत्यो बैजवापिश्च कुशिको बादरायणः
बडिशः शरलोमा च काप्यकात्यायनावुभौ ११
काङ्कायनः कैकशेयो धौम्यो मारीचकाश्यपौ
शर्कराक्षो हिरण्याक्षो लोकाक्षः पैङ्गिरेव च १२
शौनकः शाकुनेयश्च मैत्रेयो मैमतायनिः
वैखानसा बालखिल्यास्तथा चान्ये महर्षयः १३
ब्रह्मज्ञानस्य निधयो दयमस्य नियमस्य च

Branch 19: Charaka Saṃhitā

Ending:

निदर्शनं निर्वचनं संनियोगो विकल्पनम् ४४
प्रत्युत्सारस्तथोद्धारः संभवस्तन्त्रयुक्तयः
तन्त्रे समासव्यासोक्ते भवन्त्वेता हि कृत्स्नशः ४५
एकदेशेन दृश्यन्ते समासाभिहिते तथा
यथाऽम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ४६
प्रबोधनप्रकाशार्थास्तथा तन्त्रस्य युक्तयः
एकस्मिन्नपि यस्येह शास्त्रे लब्धास्पदा मतिः ४७
स शास्त्रमन्यदप्याशु युक्तिज्ञत्वात् प्रबुध्यते
अधीयानोऽपि शास्त्राणि तन्त्रयुक्त्या विना भिषक्
नाधिगच्छति शास्त्रार्थानर्थान् भाग्यक्षये यथा ४८
दुर्गृहीतं क्षिणोत्येव शास्त्रं शस्त्रमिवाबुधम्
सुगृहीतं तदेव ज्ञं शास्त्रं शस्त्रं च रक्षति ४९
तस्मादेताः प्रवक्ष्यन्ते विस्तरेणोत्तरे पुनः
तत्त्वज्ञानार्थमस्यैव तन्त्रस्य गुणदोषतः ५०
इदमखिलमधीत्य सम्यगर्थान् विमृशति योऽविमनाः प्रयोगनित्यः
समनुजसुखजीवितप्रदाता भवति धृतिस्मृतिबुद्धिधर्मवृद्धः ५१
यस्य द्वादशसाहस्री हृदि तिष्ठति संहिता
सोऽर्थज्ञः स विचारज्ञश्चिकित्साकुशलश्च सः ५२
रोगांस्तेषां चिकित्सां च स किमर्थं न बुध्यते
चिकित्सा वह्निवेशस्य सुस्थातुरहितं प्रति ५३
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्
अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते ५४
इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृतेऽप्राप्ते दृढबलसंपूरिते सिद्धिस्थाने
उत्तरबस्तिसिद्धिर्नाम द्वादशोऽध्यायः १२ समाप्तमिदं चरकतन्त्रम्

Reference: Sharma, V.P., *Caraka Saṃhitā: Agniveśa's treatise refined and annotated by Caraka and redacted by Dṛḍhabala*, 3 vols., (Varanasi: Chaukhambha Orientalia, 1981).

## Branch 20: Suśhruta Saṃhitā

Structure: 186 Chapters.
Beginning:

सुश्रुतसंहिता सूत्रस्थानम् प्रथमोऽध्यायः

अथातो वेदोत्पत्तिमध्यायं व्याख्यास्यामः १
यथोवाच भगवान् धन्वन्तरिः २
अथ खलु भगवन्तममरवरमृषिगणपरिवृतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य गोपुररक्षितसुश्रुतप्रभृतय ऊचुः ३
भगवन् शारीरमानसागन्तुभिर्व्याधिभिर्विविधवेदनाभिघातोपद्रुतान् सनाथानप्यनाथवद्विचेष्टमानान् विक्रोशतश्च मानवानभिसमीक्ष्यमनसि नः पीडा भवति तेषां सुखैषिणां रोगोपशमार्थमात्मनश्च प्राणयात्रार्थं प्रजाहितहेतोरायुर्वेदं श्रोतुमिच्छाम इहोपदिश्यमानम् अत्रायत्तमैहिकमा मुष्मिकं च श्रेयः तद्भगवन्तमुपपन्नाः स्मः शिष्यत्वेनेति ४
तानुवाच भगवान्
स्वागतं वः सर्व एवामीमांस्या अध्याप्याश्च भवन्तो वत्साः ५
इह खल्वायुर्वेदं नामोपाङ्गमथर्ववेदस्यानुत्पाद्यैवप्रजाः श्लोकशत सहस्रमध्यायसहस्रं च कृतवान् स्वयम्भूः ततोऽल्पायुष्ट्वमल्पमेध स्त्वं चालोक्य नराणां भूयोऽष्टधा प्रणीतवान् ६
यद्यथा शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यम् अगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति ७
अथास्य प्रत्यङ्गलक्षणसमासः तत्र शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनख पूयास्रावदुष्टव्रणान्तर्गर्भ शल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थं च १
शालाक्यं नामोर्ध्वजत्रुगतानां श्रवणनयनवदनघ्राणादिसंश्रितानां व्याधीनामुपशमनार्थम् २
कायचिकित्सा नाम सर्वाङ्गसंश्रितानां व्याधीनां ज्वररक्तपित्तशोषोन्मादापस्मारकुष्ठमेहातिसारादीनामुपशमनार्थम् ३
भूतविद्या नाम देवासुरगन्धर्वयक्षरक्षः पितृपिशाचनागग्रहाद्युपसृष्टचेतसां

Branch 20: Suśhruta Saṃhitā

Ending:

पुरुषः षोडशकलः प्राणाश्चैकादशैव ये ७
रोगाणां तु सहस्रं यच्छतं विंशतिरेव च
शतं च पञ्च द्रव्याणां त्रिसप्तत्यधिकोत्तरम् ८
व्यासतः कीर्तितं तद्धि भिन्ना दोषास्त्रयो गुणाः
द्विषष्टिधा भवन्त्येते भूयिष्टमिति निश्चयः ९
त्रय एव पृथक् दोषा द्विशो नव समाधिकैः
त्रयोदशाधिकैकद्विसममध्योल्बणैस्त्रिशः १०
पञ्चाशदेवं तु सह भवन्ति क्षयमागतैः
क्षीणमध्याधिकक्षीणक्षीणवृद्धैस्तथाऽपरैः ११
द्वादशैवं समाख्यातास्त्रयो दोषा द्विषष्टिधा
मिश्रा धातुमलैर्दोषा यान्त्यसंख्येयतां पुनः १२
तस्मात् प्रसङ्गं संयम्य दोषभेदविकल्पनैः
रोगं विदित्वोपचरेद्रसभेदैर्यथैरितैः १३
भिषक् कर्ताऽथ करणं रसा दोषास्तु कारणम्
कार्यमारोग्यमेवैकमनारोग्यमतोऽन्यथा १४
अध्यायानां तु षट्षष्ट्या ग्रथितार्थपदक्रमम्
एवमेतदशेषेण तन्त्रमुत्तरमृद्धिमत् १५
स्पष्टगूढार्थविज्ञानमगाढमन्दचेतसाम्
यथाविधि यथाप्रश्नं भवतां परिकीर्तितम् १६
सहोत्तरं त्वेतदधीत्य सर्वं ब्राह्मं विधानेन यथोदितेन
न हीयतेऽर्थान्मनसोऽभ्युपेतादेतद्वचो ब्राह्मतीव सत्यम् १७

इति सुश्रुतसंहितायामुत्तरतन्त्रे दोषभेदविकल्पो नाम षट्षष्टितमोऽध्यायः ६६

इति सौश्रुते आयुर्वेदशास्त्रे उत्तरस्थानं समाप्तम्

समाप्तमिदं सुश्रुततन्त्रम्

Reference: Pandey, Shastri Shambhunatha, ed., *Suśruta-Saṃhitā of Maharṣi Suśrut,* (Varanasi: Krishnadas Academy, 1985).

## Branch 21A: Vāgbhaṭṭa Saṃhitā Aṣhtāṅgahṛidaya

Structure: 120 Chapters.
Beginning:

श्रीमद्वाग्भटविरचिते अष्टाङ्गहृदये सूत्रस्थानम् प्रथमोऽध्यायः
रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान्
औत्सुक्यमोहारतिदाञ्जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै १
आयुः कामयमानेन धर्मार्थसुखसाधनम्
आयुर्वेदोपदेशेषु विधेयः परमादरः २
ब्रह्मा स्मृत्वाऽयुषो वेदं प्रजापतिमजिग्रहत्
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान्मुनीन् ३
तेऽग्निवेशादिकांस्ते तु पृथक् तन्त्राणि तेनिरे
तेभ्योऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः ४
क्रियतेऽष्टाङ्गहृदयं नातिसंक्षेपविस्तरम्
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्रा जरावृषान् ५
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता
वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः ६
विकृताऽविकृता देहं घ्नन्ति ते वर्त्तयन्ति च
ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः ७
वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात्
तैर्भवेद्विषमस्तीक्ष्णो मन्दश्चाग्निः समैः समः ८
कोष्ठः क्रूरो मृदुर्मध्यो मध्यः स्यात्तैः समैरपि
शुक्रार्तवस्थैर्जन्मादौ विषेणेव विषकृमेः ९
तैश्च तिस्रः प्रकृतयो हीनमध्योत्तमाः पृथक्
समधातुः समस्तासु श्रेष्ठानिन्द्या द्विदोषजाः १०
तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः
पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम् ११
स्निन्धः शीतो गुरुर्मन्दःश्लक्ष्णोमृत्स्नः स्थिरः कफः
संसर्गः सन्निपातश्च तद्द्वित्रिक्षयकोपतः १२
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः

Branch 21A: Vāgbhaṭṭa Saṃhitā Aṣhtāṅgahṛidaya

Ending:

तस्मादनल्पफल मल्पसमुद्यमानां
प्रीत्यर्थमेतदुदितं पृथगेव तन्त्रम् ८०
इदमागमसिद्धत्वात्प्रत्यक्ष फलदर्शनात्
मन्त्रवत्संप्रयोक्तव्यं न मीमांस्यं कथञ्चन ८१
दीर्घजीवितमारोग्यं धर्ममर्थं सुखं यशः
पाठावबोधानुष्ठानैरधिगच्छत्यतो ध्रुवम् ८२
एतत्पठन् सङ्ग्रहबोधशक्तः स्वभ्यस्तकर्मा भिषगप्रकम्प्यः
आकम्पयत्यन्य विशालतन्त्र कृताभियोगान् यदि तन्न चित्रम् ८३
यदि चरकमधीते तद् ध्रुवं सुश्रुतादि
प्रणिगदितगदानां नाममात्रेऽपि बाह्यः
अथ चरकविहीनः प्रक्रियायामखिन्नः
किमिव खलु करोतु व्याधितानां वराकः ८४
अभिनिवेश वशादभियुज्यते सुभणितेऽपि न यो दृढमूढकः
पठतु यत्नपरः पुरुषायुषं स खलु वैद्यकमाद्यमनिर्विदः ८५
वाते पित्ते श्लेष्मशान्तौ च पथ्यं तैलं सर्पिर्माक्षिकं च क्रमेण
एतद् ब्रह्मा भाषतां ब्रह्मजो वा का निर्मन्त्रे वक्तृभेदोक्तिशक्तिः ८६
अभिधातृवशात् किंवा द्रव्यशक्तिर्विशिष्यते
अतो मत्सरमुत्सृज्य माध्यस्थ्यमवलम्ब्यताम् ८७
ऋृषिप्रणीते प्रीतिश्चेन्मुक्त्वा चरकसुश्रुतौ
भेडाद्याः किं न पठ्यन्ते तस्माद्ग्राह्यं सुभाषितम् ८८
हृदयमिव हृदयमेतत्सर्वायुर्वेदवाङ्मयपयोधेः
कृत्वा यच्छुभमाप्तं शुभमस्तुपरं ततो जगतः ८९
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायामष्टाङ्गहृदयसंहितायां षष्ठे
उत्तरस्थाने वाजीकरणविधिर्नाम चत्वारिंशोऽध्यायः ४०

Reference: Murthy, K.R.Srikantha, tr., *Vāgbhaṭa's Aṣṭāṅga Hṛidayam*, 3 vols., (Varanasi: Krishnadas Academy, 1991-3).

## Branch 21B: Vāgbhaṭṭa Saṃhitā Aṣhtāṅgasaṃgraha

Structure: Three Main Divisions.
Beginning:

अष्टाङ्गसङ्ग्रहः । सूत्रस्थाने आयुष्कामीयः प्रथमोऽध्यायः ।
रागादिरोगाः सहजाः समूला
येनाशु सर्वे जगतोऽप्यपास्ताः ।
तमेकवैद्यं शिरसा नमामि
वैद्यागमज्ञांश्च पितामहादीन् १
अथात आयुष्कामीयं नामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः--
आयुः कामयमानेन धर्मार्थसुखसाधनम् ।
आयुर्वेदोपदेशेषु विधेयः परमादरः २
आयुर्वेदामृतं सार्वं ब्रह्मा बुद्ध्वा सनातनम् ।
ददौ दक्षाय सोऽश्विभ्यां तौ शतक्रतवे ततः ३
धर्मार्थकाममोक्षाणां विघ्नकारिभिरामयैः ।
नरेषु पीड्यमानेषु पुरस्कृत्य पुनर्वसुम् ४
धन्वन्तरिभरद्वाजनिमिकाश्यपकश्यपाः ।
महर्षयो महात्मानस्तथा लम्बायनादयः ५
शतक्रतुमुपाजग्मुः शरण्यममरेश्वरम् ।
तान्दृष्ट्वैव सहस्राक्षो निजगाद यथागमम् ६
आयुषः पालनं वेदमुपवेदमथर्वणः ।
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषैः ७
गतमष्टाङ्गतां पुण्यं बुबुधे यं पितामहः
गृहीत्वा ते तमाम्नायं प्रकाश्य च परस्परम् ८
आययुर्मानुषं लोकं मुदिताः परमर्षयः
स्थित्यर्थमायुर्वेदस्य तेऽथ तन्त्राणि चक्रिरे ९
कृत्वाग्निवेशहारीतभेडमाण्डव्यसुश्रुतान्
करालादींश्च तच्छिस्यान् ग्राहयामासुरादृताः १०
स्वं स्वं तन्त्रं ततस्तेऽपि चक्रुस्तानि कृतानि च

Branch 21B: Vāgbhaṭṭa Saṃhitā Aṣhtāṅgasaṃgraha

Ending:

अपाने सकफं मूत्रशकृतोः स्यात्प्रवर्तनम्
इति द्वाविंशतिविधं वायोरावरणं विदुः ४८
प्राणादयस्तस्थान्योन्यमावृणवन्ति यथाक्रमम्
सर्वेऽपि विंशतिविधं विद्यादावरणं च तत् ४९
निःश्वासोच्छ्वाससंरोधः प्रतिश्यायः शिरोग्रहः
हृद्रोगो मुखशोषश्च प्राणेनोदान आवृते ५०
उदानेनावृते प्राणे वर्णौजोबलसंक्षयः
दिशाऽनया च विभजेत्सर्वमावरणं भिषक् ५१
स्थानान्यवेक्ष्य वातानां वृद्धिं हानिं च कर्मणाम्
प्राणादीनां च पञ्चानां मिश्रमावरणं मिथः ५२
पित्तादिभिर्द्वादशभिर्मिश्राणां मिश्रितैश्च तैः
मिश्रैः पित्तादिभिस्तद्वन्मिश्रणाभिरनेकधा
तारतम्यविकल्पाच्च यात्यावृतिरसंख्यताम् ५३
तां लक्षयेदवहितो यथास्वं लक्षणोदयात्
शनैश्शनैश्चोपशयाद्गूढामपि मुहुर्मुहुः ५४
विशेषाज्जीवितं प्राण उदानो बलमुच्यते
स्यात्तयोः पीडनाद्धानिरायुषश्च बलस्य च ५५
आवृता वायवोऽज्ञाता ज्ञाता वा वत्सरं स्थिताः
प्रयत्नेनापि दुःसाधा भवेयुर्वानुपक्रमाः ५६
विद्रधिप्लीहहृद्रोगगुल्माग्निसदनादयः
भवन्त्युपद्रवास्तेषामावृतानामुपेक्षणात् ५७
इति वैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटस्य कृतावष्टाङ्गसंग्रहसंहितायां
निदानस्थाने वातशोणितनिदानं नाम षोडशोऽध्यायः १६
अष्टाङ्गसंग्रहे निदानस्थानं समाप्तम्

Reference: Kinjwadekar, Ramchandra Sastri, ed., *Astanga Sangraha of Sri Vaghbhatta Virchit.* 3 vols., (Delhi: Sri Satguru Publications, 1990).

## Branch 22: Mādhava Nidāna Saṃhitā

Structure: 70 Chapters.
Beginning:

माधवनिदानम्  पञ्चनिदानलक्षणम्
प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणम्
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम् १
नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात्
सोपद्रवारिष्टनिदानलिङ्गो निबध्यते रोगविनिश्चयोऽयम् २
नानातन्त्रविहीनानां भिषजामल्पमेधसाम्
सुखं विज्ञातुमातङ्कमयमेव भविष्यति ३
निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ४
निमित्तहेत्वायतन प्रत्ययोत्थानकारणैः
निदानमाहुः पर्यायैःप्राग्रूपं येन लक्ष्यते ५
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः
लिङ्गमव्यक्तमल्पत्वाद् व्याधीनां तद्यथातथम् ६
तदेव व्यक्ततां यातं रूपमित्यभिधीयते
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृति ७
हेतुव्याधिविपर्यस्त विपर्यस्तार्थकारिणाम्
औषधान्नविहाराणामुपयोगं सुखावहम् ८
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः
विपरीतोऽनुपशयो व्याध्यसात्म्यमिति स्मृतः ९
यथा दुष्टेन दोषेण यथा चानुविसर्पता
निर्वृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः १०
संख्याविकल्पप्राधान्य बलकालविशेषतः
सा भिद्यते यथाऽत्रैव वक्ष्यतेऽष्टौ ज्वरा इति ११
दोषाणां समवेतानां विकल्पोंऽशाशकल्पना
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् १२
हेत्वादिकात्स्न्यार्वयवैर्बलाबल विशेषणम्

Branch 22: Mādhava Nidāna Saṃhitā

Ending:

अथ विषयानुक्रमणिका

ज्वरोऽतिसारो ग्रहणी चार्शोऽजीर्णं विसूचिका
अलसश्च विलम्बी च क्रिमिरुक्पाण्डुकामलाः १
हलीमकं रक्तपित्तं राजयक्ष्मा उरःक्षतम्
कासो हिक्का सह श्वासैः स्वरभेदस्त्वरोचकः २
छर्दिस्तृष्णा च मूर्च्छाद्या रोगाः पानात्ययादयः
दाहोन्मादावपस्मारः कथितोऽथानिलामयः ३
वातरक्तमूरुस्तम्भ आमवातोऽथ शूलरुक्
पक्तिजं शूलमानाह उदावर्तोऽथ गुल्मरुक् ४
हृद्रोगो मूत्रकृच्छ्रं च मूत्राघातस्तथाऽश्मरी
प्रमेहो मधुमेहश्च पिडकाश्च प्रमेहजाः ५
मेदस्तथोदरं शोथो वृद्धिश्च गलगण्डकः
गण्डमालाऽपची ग्रन्थिरर्बुदः श्लीपदं तथा ६
विद्रधिर्व्रणशोथश्च द्वौ व्रणौ भग्ननाडिके
भगन्दरोपदंशौ च शूकदोषस्त्वगामयः ७
शीतपित्तमुदर्दश्च कोठश्चैवाम्लपित्तकम्
विसर्पश्च सविस्फोटः सरोमान्त्यो मसूरिकाः ८
क्षुद्रास्यकर्णनासाक्षिशिरःस्त्रीबालकामयाः
विषं चेत्ययमुद्दिष्टो रुग्विनिश्चियसंग्रहः ९
सुभाषितं यत्र यदस्ति किञ्चित्तत्सर्वमेकीकृतमत्र यत्नात्
विनिश्चये सर्वरुजां नराणां श्रीमाधवेनेन्दुकरात्मजेन १०
यत्कृतं सुकृतं किञ्चित्कृत्वैवं रुग्विनिश्चयम्
मुञ्चन्तु जन्तवस्तेन नित्यमातङ्कसन्ततिम् ११

इति श्रीमाधवकरविरचितं माधवनिदानं समाप्तम्

Reference: Murthy, K.R. Srikanta, *Mādhava Nidānam (Roga Viniścaya) of Madhavakara*, (Varanasi: Chaukhambha Orientalia, 1993).

## Branch 23A: Shārṅgadhara Saṃhitā

Structure: Three Main Divisions.
Beginning:

शार्ङ्गधर संहिता     पूर्वखण्डे प्रथमोऽध्यायः

मङ्गलाचरणम्
श्रियं स दद्याद्भवतां पुरारिर्यदङ्गतेजःप्रसरे भवानी
विराजते निर्मलचन्द्रिकायां महौषधीव ज्वलिता हिमाद्रौ १
समूलं ग्रन्थप्रयोजनम्
प्रसिद्धयोगा मुनिभिः प्रयुक्ताश्चिकित्सकैर्ये बहुशोऽनुभूताः
विधीयते शार्ङ्गधरेण तेषां सुसंग्रहः सज्जनरञ्जनाय २
रोगनिश्चयपूर्वकं चिकित्सा
हेत्वादिरूपाकृतिसात्म्यजातिभेदैः समीक्ष्यातुरसर्वरोगान्
चिकित्सितं कर्षणबृंहणाख्यं कुर्वीत वैद्यो विधिवत्सुयोगः ३
ओषधिप्रभावाः
दिव्यौषधीनां बहवः प्रभेदा वृन्दारकाणामिव विस्फुरन्ति
ज्ञात्वेति संदेहमपास्य धीरैः संभावनीया विविधप्रभावाः ४
ग्रन्थप्रयोजनम्
स्वाभाविकागन्तुककायिकान्तरा रोगा भवेयुः किल कर्मदोषजाः
तच्छेदनार्थं दुरितापहारिणः श्रेयोमयान्योगवरान्नियोजयेत् ५
ग्रन्थमाहात्म्यम्
प्रयोगानागमात्सिद्धान्प्रत्यक्षादनुमानतः
सर्वलोकहितार्थाय वक्ष्याम्यनतिविस्तरात् ६
पूर्वखण्डाध्यायानुक्रमः
प्रथमं परिभाषा स्याद्भैषज्याख्यानकं तथा
नाडीपरीक्षाऽदिविधिस्ततोदीपनपाचनम् ७
ततः कलाऽदिकाख्यानमाहारादिगतिस्तथा
रोगाणां गणना चैव पूर्वखण्डोऽयमीरितः ८
मध्यमखण्डाध्यायानुक्रमः
स्वरसः क्वाथफाण्टौ च हिमः कल्कश्च चूर्णकम्

Branch 23A: Shārñgadhara Saṃhitā

Ending:

जरायुरोगे पथ्यापथ्यम्

जरायुरोगिणी नारी न च सेवेत पूरुषम्
न खादेदुग्रवीर्याणि नापि कुर्य्यादतिश्रमम्

अण्डाधारे पथ्यापथ्यम्

पथ्यमत्र हविर्दुग्धं शालि प्रन्नो यवस्तिलः
छागमांसरसश्चैव द्रव्यमुग्रं न शर्म्मणे

ओजोमेहे पथ्यापथ्यम्

लघु बल्यं पुराणञ्च धान्यं मुद्गयवादिकम्
वार्त्ताकुञ्च पटोलञ्च काकोदुम्बरकं तथा
कारवेल्लादिकं शस्तं वर्ज्जयेन्मधुरं गुरु
मांसं मत्स्यांस्तथाऽध्वानमातपाग्निनिषेवणम्
दूषितातिशीततोयस्नानपानावगाहनम्

लसिकामेहे पथ्यापथ्यम्

रक्तशाल्योदनं मुद्गं यवो वास्तूकमेव च
पालक्या चैव वेत्राग्रं कर्कोटी कदली तथा
हिमालयप्रदेशे च वासो वा सुस्थचित्तता
हितानेतान् निषेवेत गुर्वभिष्यन्दि भोजनम्
मत्स्यं मांसं तथा रौद्रसेवाऽध्वानं परिश्रमम्
वर्ज्जयेद् यत्नतो धीमानायुरारोग्यवृद्धये

पारदविकारे पथ्यापथ्यम्

वातरक्ते तथा कुष्ठे पथ्यानि यानि तानि च
शिवतेजोभवे रोगे निर्दिशेत् कुशलो भिषक्

इति पथ्यापथ्यविवेचनात्मकं द्वितीयं परिशिष्टं समाप्तम्

समाप्तश्चाऽयं ग्रन्थः

Reference: Murthy, K.R. Srikanta, tr., *Sarngadhar-Saṃhitā, a treatise on Āyurveda*, (Varanasi: Chaukhambha Orientalia, 1995).

## Branch 23A: Shārṅgadhara Saṃhitā Upavanavinodaḥ

Structure: 15 Divisions.
Beginning:

अथ उपवनविनोदः प्रस्तावना

पुष्पधन्वा विजयतेऽनङ्गेनाप्यखिलं जगत्
वशीकृतं येन हठात् ससुरासुरमानुषम् १
पुंसां सर्वसुखैकसाधनकराः सौन्दर्यगर्वोदधुर-
क्रीडालोलविलासिनीजनमनः स्फीतप्रमोदावहाः ।
गुञ्जद्भृङ्गविनिद्रपङ्कजभरस्फारोल्लसद्दीर्घिका-
युक्ताः सन्ति गृहेषु यस्य विपुलारामाः स पृथ्वीपतिः २
नवं मनोहारि वपुर्वराङ्गनाः सखा कलावित् कलवल्लरीस्वनाः
धनानि सर्वं विफलं सुखैषिणो विना विहारोपवनं महीपतेः ३

अथ तरुमहिमा

बहुभिर्बत किंजातैः पुत्रैर्धर्मार्थवर्जितैः
वरमेकः पथि तरुर्यत्र विश्रमते जनः ४
दशकूपसमा वापी दशवापीसमो ह्रदः
दशह्रदसमः पुत्रो दशपुत्रसमस्तरुः ५
क्रीडारामन्तु यः कुर्यादुद्दामफलसंयुतम्
स गच्छेच्छङ्करपुरं वसेत्तत्रायुतत्रयम् ६
एतत् सर्वं परिज्ञाय वृक्षरोपं समारभेत्
धर्मार्थकाममोक्षाणां द्रुमेभ्यः साधनं यतः ७
यावद्दिनानि तुलसी रोपिता यद्गृहे वसेत्
तावद्वर्षसहस्राणि वैकुण्ठे स महीयते ८
यस्तु संरोपयेद्बिल्वं शङ्करप्रीतिकारकम्
तत्कुलेऽपि सदा लक्ष्मीस्तिष्ठेदापुत्रपौत्रकम् ९
एवमेव हि योऽश्वत्थं रोपयेद् विधिना नरः
यत्र कुत्रापि वा स्थाने स गच्छेद् भवनं हरेः १०
तेनेष्टा बहवो यज्ञास्तेन दत्ता वसुन्धरा
सर्वदा ब्रह्मचारी स येन धात्री प्ररोपिता ११

Branch 23A: Shārῆgadhara Saṃhitā Upavanavinodaḥ

Ending:

खरतुरगविडनिवेशित त्तापितशलाकया मूले
तिर्यग् विद्धा कदली फलति फलं करिकराकारम् १७०
कौलशोणितमेदाम्यामङ्कोलक्क्वथितेन वा
सिञ्चिता कदली सूते दाडिमीफलमुत्तमम् १७१
नरमांसवसारक्तदन्तिदन्तविचूर्णितैः
मिश्रितेनाम्भसा सिक्ता रम्भा चूतफलं भवेत् १७२
अङ्कोलकथितं श्विन्नं नृमांसं छागिदुग्धयुक्
पिण्याकसहितं मूले सहकारस्य निःक्षिपेत् १७३
द्राक्षावल्लीसमाकारः सहकारः सदाफलः
जायते निश्चितं धात्ते सर्वैषामद्भुतं फलम् १७४
शशकूर्मासृङ्मध्ये बहुभावितमाम्रजं बीजम्
रूढं सिक्तं दुग्धैः फलति फलं सवकालेषु १७५
कृमिरिपुयवयष्टीमधुगुडदुग्धविलेपितो विशिष्य तरुः
भवति जलदुग्धसिक्तः स्वभावतिक्तोऽपि मधुरफलः १७६
बीजं नरपलाङ्कोलतैलभिन्नं शुभं सदा
उद्गच्छति मृदा पूर्णमम्भः सिक्तकरो क्षणात् १७७
अङ्कोलतैलभावितमुषितं गोशकृतिकुमुदकुन्दसमम्
करकाम्बुकर्दमभृते कलशे कुसुमं समुद्भवति १७८
गोकोलास्थिकरीषैस्तु दग्धे गर्ते विशोधिते
उप्तं च बालुकापूर्णे मूलकं गर्तवद्भवेत् १७९
इष्टकचितं समन्तात् पुरुषनिखातेऽवटौ तरुर्जाताः
वामन एव हि धत्ते फलकुसुमं सर्वकालीनम् १८०
इति चित्रीकरणम् समाप्तश्चायमुपवनविनोदः

Discussion: Textbook of Vṛikṣhāyurveda, Vedic Agriculture.

Reference: Jha, Krishnanand, *Upavanavinodah, A system of tree plantation,* (Kameshwaranagar, Darbhanga: K.S.D. Sanskrit University, 1984).

## Branch 24: Bhāva Prakaśha Saṃhitā

Structure: Three Main Divisions.

Beginning:

श्रीमद्भावमिश्रप्रणीतः   भाव प्रकाशः पूर्व खराडम्

गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारम्
गुरुमवगमनयनप्रदमिष्टकरीमिष्टदेवतां वन्दे १
श्रायुर्वेदागमनं क्रमेण येनाभवद्भूमौ
प्रथमं लिखामि तमहं नानातन्त्राणि संदृश्य २
श्रायुर्हिताहितं व्याधेर्निदानं शमनं तथा
विद्यते यत्र विद्वद्भिः स श्रायुर्वेद उच्यते ३
श्रनेन पुरुषो यस्मादायुर्विन्दति वेत्ति च
तस्मान्मुनिवरैरेष श्रायुर्वेद इति स्मृतः ४
विधाताऽथर्वसर्वस्वमायुर्वेदं प्रकाशयन्
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम् ५
ततः प्रजापतिं दक्षं दक्षं सकलकर्मसु
विधिर्धीनीरधिः साङ्गमायुर्वेदमुपादिशत् ६
श्रथ दक्षः क्रियादक्षः स्ववैद्यौ वेदमायुषः
वेदयामास विद्वांसौ सूर्यांशौ सुरसत्तमौ ७
दक्षादधीत्य दस्रौ वितनुतः संहितां स्वीयाम्
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ८
स्वयम्भुवः शिरश्छिन्नं भैरवेण रुषाऽथ तत्
श्रश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ९
देवासुररणे देवा दैत्यैर्ये सक्षताः कृताः
श्रक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् १०
वज्रिणोऽभूद् भुजस्तम्भः स दस्राभ्यां चिकित्सितः
सोमान्निपतितश्चन्द्रस्ताभ्यामेव सुखी कृतः ११
विशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च
शशिनो राजयक्ष्माऽभूदश्विभ्यां ते चिकित्सिताः १२
भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः

Branch 24: Bhāva Prakaśha Saṃhitā

Ending:

वर्षाऽदिष्वभया प्राश्या रसायनगुणैषिणा ८
पुनर्नवस्यार्द्धपलं नवस्य पिष्टं पिबेद्यः पयसाऽर्द्धमासम्
मासत्रयं तत्त्रिगुणं समं वा जीर्णोऽपि भूयः स पुनर्नवः स्यात्
ये मासमेकं स्वरसं पिबन्ति दिने दिने भृङ्गरजःसमुत्थम्
क्षीराशिनस्ते बलवीर्ययुक्ताः समाः शतं जीवनमाप्नुवन्ति १०
शतावरी मुण्डितिका गुडूची सहस्तिकर्णा सहतालमूली
एंतानि कृत्वा समभागयुक्तान्याज्येन किं वा मधुनाऽवलिह्यात् ११
जरारुजामृत्युवियुक्तदेहो भवेन्नरो वीर्यबलादियुक्तः
विभाति देवप्रतिमः स नित्यं प्रभामयो भूरिविवृद्धियुक्तः १२
पीत्वाऽश्वगन्धां पयसाऽर्द्धमासं घृतेन तैलेन सुखाम्बुना वा
वीर्यस्य पुष्टिं वपुषो विधत्ते बालस्य वृक्षस्य यथाऽम्बुवृष्टिः १३
अयः पलं गुग्गुलुमत्र योज्यं पलत्रयं व्योषपलानि पञ्च
पलानि चाष्टौ त्रिफलारजश्च कर्षं लिहन्यात्यमरत्वमेव १४
न केवलं दीर्घमिहायुरश्नुते रसायनं यो विधिवन्निषेवते
गतिं स देवर्षिनिषेवितां शुभां प्रपद्यते ब्रह्म तथैव चाक्षरम् १५
इति त्रिसप्ततितमो रसायनाधिकारः समाप्तः ७३
ग्रन्थकर्त्तृशुभाशीः शंसनम्
यावद् व्योमनि बिम्बमम्बरमणेरिन्दोश्च विद्योतते
यावत् सप्त पयोधयःसगिरयस्तिष्ठन्ति पृष्ठे भुवः
यावच्चावनिमण्डलं फणिपतेरास्ते फणामण्डले
तावत्सद्भिषजः पठन्तु परितो भावप्रकाशं शुभम् १
ग्रन्थस्यास्याध्यापकनाञ्जनानां मध्ये नृणामादरं कुर्वतां च
श्रीसोमेशादित्यविप्रप्रसादादायुर्दीर्घं सौख्यमास्तां सदैव २
समाप्तमिदमुत्तरखण्डम् समाप्तश्चायं ग्रन्थः

Reference: Miśra, Śrī Brahmaśaṅkara, and Vaiśya, Śrī Rūpalālajī, eds., *Bhāvaprakāśa of Śrī Bhāva Miśra,* (Varanasi: Chaukhambha Sanskrit Sansthan, 1984).

## Branch 25A: Upaniṣhad Īśhā Upaniṣhad

Structure: 18 Verses.

Beginning:

ईशावास्योपनिषद्
पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते
ॐ शान्तिः शान्तिः शान्तिः

ॐईशा वास्यमिदँ सर्वं यत्किं च जगत्यां जगत्
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् १
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे २
असूर्या नाम ते लोका अन्धेन तमसावृताः
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनः ३
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ४
तदेजति तन्नैजति तद्दूरे तद्वन्तिके
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ५
यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ६
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद् विजानतः
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ७
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरँशुद्धमपापविद्धम्
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः
अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते
ततो भूय इव ते तमो य उ विद्यायाँ रताः ९
अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे १०
विद्यां चाविद्यां च यस्तद्वेदोभयँ सह
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ११

Branch 25A: Upaniṣhad Īśhā Upaniṣhad

Ending:

अन्धन्तमः प्रविशन्ति येऽसंभूतिमुपासते
ततो भूय इव ते तमो य उ संभूत्याँ रताः १२
अन्यदेवाहुः संभवादन्यदाहुरसंभवात्
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे १३
संभूतिं च विनाशं च यस्तद्वेदोभयँ सह
विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते १४
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये १५
पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजः
यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि १६
वायुरनिलममृतमथेदं भस्मान्तँ शरीरम्
ॐ क्रमो स्मर कृतँ स्मर क्रतो स्मर कृतँ स्मर १७
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्
युयोध्यस्मज्जुहुराणमेनो भुयिष्ठां ते नमउक्तिं विधेम १८

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते
ॐ शान्तिः शान्तिः शान्तिः
इति वाजसनेयसंहितायामीशावास्योपनिषत्संपूर्णा

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25B: Upaniṣhad Kena Upaniṣhad

Structure: 4 Khaṇḍas.

Beginning:

केनोपनिषद्

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणम-स्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु

ॐ शान्तिः शान्तिः शान्तिः

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति १
श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचँ स उ प्राणस्य प्राणः
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति २
न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतद-नुशिष्यादन्यदेव तद्विदितादथो अविदितादधि
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ३
यद्वाचानभ्युदितं येन वागभ्युद्यते
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ४
यन्मनसा न मनुते येनाहुर्मनो मतम्
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ५
यच्चक्षुषा न पश्यति येन चक्षूँषि पश्यति
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ६
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदँ श्रुतम्
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ७
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ८

इति केनोपनिषत्सु प्रथमः खण्डः १

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम्
यदस्य त्वं यदस्य च देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् १

Branch 25B: Upaniṣhad Kena Upaniṣhad

Ending:

तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स
तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति १०
अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति
तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ११
स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमनामुमाँ हैमवतीं ताँ होवाच
किमेतद्यक्षमिति १२ इति तृतीयः खण्डः ३
सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदांच-
कार ब्रह्मेति १
तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं प-
स्पृशुस्ते ह्येनत्प्रथमो विदांचकार ब्रह्मेति २
तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो
विदांचकार ब्रह्मेति ३
तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इतीन्न्यमीमिषदा३ इत्यधिदैवतम् ४
अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं संकल्पः ५
तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभि हैनं सर्वाणि भू-
तानि संवाञ्छन्ति ६
उपनिषदं भो ब्रूहीत्युक्ता य उपनिषद्ब्राह्मीं वाव त उपनिषदमब्रूमेति ७
तस्यै तपो दमः कर्मेति प्रतिष्टा वेदाः सर्वाङ्गानि सत्यमायतनम् ८
यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्र-
तितिष्ठति ९ इति चतुर्थः खण्डः ४
आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि
सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोनिराकरणमस्त्व-
निराकरणं मेऽस्तु तिदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि
सन्तु ॐ शान्तिः शान्तिः शान्तिः इति सामवेदीया केनोपनिषत्समाप्ता

Reference: Radhakrishnan, S., The Principal Upanishads, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25C: Upaniṣhad Kaṭha Upaniṣhad

Structure: Two Chapters with Three Divisions each.

Beginning:

कठोपनिषद्

सह नाववतु

सह नौ भुनक्तु

सह वीर्यं करवावहै

तेजस्विनावधीतमस्तु मा विद्विषावहै

ॐ शान्तिः शान्तिः शान्तिः

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ
तस्य ह नचिकेता नाम पुत्र आस १
तँ ह कुमारँ सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोऽमन्यत २
पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः
अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत् ३
स होवाच पितरं तत कस्मै मां दास्यसीति
द्वितीयं तृतीयं तँ होवाच मृत्यवे त्वा ददामीति ४
बहूनामेमि प्रथमो बहूनामेमि मध्यमः
किँ स्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति ५
अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ६
वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्
तस्यैताँ शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ७
आशाप्रतीक्षे संगतँ सूनृतां चेष्टापूर्ते पुत्रपशूँश्च सर्वान्
एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे ८
तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः
नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ९
शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे १०
यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः

Branch 25C: Upaniṣhad Kaṭha Upaniṣhad

Ending:

बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम् १०
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ११
नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते १२
अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति १३
यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते १४
यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः
अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् १५
शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति १६
अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः
तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण
तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति १७
मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्
ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव १८
इति द्वितीयेऽध्याये तृतीया वल्ली समाप्ता ३ इति द्वितीयोऽध्यायः २

सह नाववतु
सह नौ भुनक्तु
सह वीर्यं करवावहै
तेजस्विनावधीतमस्तु मा विद्विषावहै
ॐ शान्तिः शान्तिः शान्तिः इति यजुर्वेदीया कठोपनिषत्समाप्ता

Reference: Radhakrishnan, S., The Principal Upanishads, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25D: Upaniṣhad Praśhna Upaniṣhad

Structure: Six Praśhnas.

Beginning:

प्रश्नोपनिषद्

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः

सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौशल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः १

तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति २

अथ कबन्धी कात्यायन उपेत्य पप्रच्छ भगवन्कुतो ह वा इमाः प्रजाः प्रजायन्त इति ३

तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत स तपस्तप्त्वा स मिथुनमुत्पादयते
रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति ४

आदित्यो ह वै प्राणो रयिरेव चन्द्रमा रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः ५

अथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान्रश्मिषु संनिधत्ते ।
यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान्प्राणान्रश्मिषु संनिधत्ते ६

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते
तदेतदृचाभ्युक्तम् ७

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्
सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ८

Branch 25D: Upaniṣhad Praśhna Upaniṣhad

Ending:

तस्मै स होवाच
इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति २
स ईक्षांचक्रे
कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामी-
ति ३
स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नम-
न्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च ४
स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते
तासां नामरूपे समुद्र इत्येवं प्रोच्यते ।
एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छ-
न्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति ।
तदेष श्लोकः ५
अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः
तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ६
तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद
नातः परमस्तीति ७
ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति ।
नमः परमऋषिभ्यो नमः परमऋषिभ्यः ८
इति षष्ठः प्रश्नः ६ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः
इत्यथर्ववेदीया प्रश्नोपनिषत्समप्ता

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25E: Upanishad Muṇḍaka Upaniṣhad

Structure: Three Muṇḍakas with two Khaṇḍas each.

Beginning:

मुण्डकोपनिषद्

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः

ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह १
अथर्वणे यां प्रवदेत ब्रह्माथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्
स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् २
शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ३
तस्मै स होवाच ।
द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ४
तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरु-
क्तं छन्दो ज्योतिषमिति ।
अथ परा यया तदक्षरमधिगम्यते ५
यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ६
यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति
यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वम् ७
तपसा चीयते ब्रह्म ततोऽन्नमभिजायते
अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ८
यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ९

इति प्रथममुण्डके प्रथमः खण्डः १

Branch 25E: Upaniṣhad Muṇḍaka Upaniṣhad

Ending:

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात्
एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ४
संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः
ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति ५
वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ६
गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रति देवतासु
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति ७
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ८
स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति
तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ९
तदेतदृचाभ्युक्तम्
क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः
तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् १०
तदेतत्सत्यमृषिरङ्गिराः पुरोवाच नैतदचीर्णव्रतोऽधीते
नमः परमर्षिभ्यो नमः परमर्षिभ्यः ११

इति तृतीयमुण्डके द्वितीयः खण्डः २

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः
इत्यथर्ववेदीया मुण्डकोपनिषत्समाप्ता

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

Branch 25F: Upaniṣhad Māṇḍūkya Upaniṣhad
Structure: 12 Sūtras.
Beginning:

माराडूक्योपनिषद्
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः

ओमित्येतदक्षरमिदँ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव ।
यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव १
सर्वँ ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् २
जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ३
स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः ४
यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तम्
सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः ५
एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ६
नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्
अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं
प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ७
सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ८
जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राप्तेरादिमत्त्वाद्वाप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद ९

Branch 25F: Upaniṣhad Māṇḍūkya Upaniṣhad

Continuing:

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद १०

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदँ सर्वमपीतिश्च भवति य एवं वेद ११

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद य एवं वेद १२

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः

इति माण्डूक्योपनिषत्समाप्ता

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25G: Upaniṣhad Aitareya Upaniṣhad

Structure: 5 Khaṇḍas.

Beginning:

ऐतरेयोपनिषत्

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि
वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदि-
ष्यामि सत्यं वदिष्यामि
तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारमवतु वक्तारम्

ॐ शान्तिः शान्तिः शान्तिः

आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् स ईक्षत लोकान्नु सृजा इति १
स इमांल्लोकानसृजत
अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः
पृथिवी मरो या अधस्तात्ता आपः २
स ईक्षतेमे नु लोका लोकपलान्नु सृजा इति
सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत् ३
तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डम्
मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपाना-
न्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ४

इति प्रथमः खण्डः १

ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववा-
र्जत् ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति १
ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति
ताभ्योऽश्वमानयत्ताः अब्रुवन्न वै नोऽयमलमिति २
ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति पुरुषो वाव सुकृतम्
ता अब्रवीद्यथायतनं प्रविशतेति ३

Branch 25G: Upaniṣhad Aitareya Upaniṣhad

Ending:

स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् का-
मानाप्त्वामृतः समभवत् समभवत् ६

इति चतुर्थः खराडः ४ इत्यैतरेयाररायके पञ्चमोऽध्यायः ५

उपनिषत्सु द्वितीयोऽध्यायः २

कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा पश्यति येन वा शृ-
णोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चा-
स्वादु च विजानाति १

यदेतद्धृदयं मनश्चैतत्

संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः
क्रतुरसुः कामो वश इति सर्वाणयेवैतानि प्रज्ञानस्य नामधेयानि भवन्ति २

एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी
वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव

बीजानीतराणि चेतराणि चाराडजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि
चश्वा गावः पुरुषा हस्तिनो यत्किंचेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं
सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्टा प्रज्ञानं ब्रह्म ३

स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान्कामाना-
प्त्वामृतः समभवत् समभवत् ४

इति पञ्चमः खराडः ५ इत्यैतरेयाररायके षष्ठोऽध्यायः ६

उपनिषत्सु तृतीयोऽध्यायः ३

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि

वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदि-
ष्यामि सत्यं वदिष्यामि

तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारमवतु वक्तारम्

ॐ शान्तिः शान्तिः शान्तिः इत्यैतरेयोपनिषत् संपूर्णा

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25H: Upaniṣhad Taittirīya Upaniṣhad

Structure: Three Main Chapters.

Beginning:

तैत्तिरीयोपनिषद्
शीक्षाध्यायः
शं नो मित्रः शं वरुणः
शं नो भवत्वर्यमा
शं न इन्द्रो बृहस्पतिः
शं नो विष्णुरुरुक्रमः
नमो ब्रह्मणे
नमस्ते वायो
त्वमेव प्रत्यक्षं ब्रह्मासि
त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि
ऋतं वदिष्यामि
सत्यं वदिष्यामि
तन्मामवतु
तद्वक्तारमवतु
अवतु माम्
अवतु वक्तारम्
ॐ शान्तिः शान्तिः शान्तिः
शं नो मित्रः शं वरुणः
शं नो भवत्वर्यमा
शं न इन्द्रो बृहस्पतिः
शं नो विष्णुरुरुक्रमः
नमो ब्रह्मणे
नमस्ते वायो
त्वमेव प्रत्यक्षं ब्रह्मासि
त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि
ऋतं वदिष्यामि

Branch 25H: Upaniṣhad Taittirīya Upaniṣhad

Ending:

पूर्वं देवेभ्योऽमृतस्य नाइभायि
यो मा ददाति स इदेव माइवाः
अहमन्नमन्नमदन्तमाइद्मि
अहं विश्वं भुवनमभ्यभवाइम्
सुवर्नज्योतीः
य एवं वेदः
इत्युपनिषत् ६

इति भृगुवल्ल्यध्याये दशमोऽनुवाकः १०

सह नाववतु
सह नौ भुनक्तु
सह वीर्यं करवावहै
तेजस्वि नावधीतमस्तु मा विद्विषावहै
ॐ शान्तिः शान्तिः शान्तिः
इति भृगुवल्ल्यध्यायः समाप्तः ३
शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः
नमो ब्रह्मणे नमस्ते वायो
त्वमेव प्रत्यक्षं ब्रह्मासि
त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि
ऋतं वदिष्यामि सत्यं वदिष्यामि
तन्मामवतु तद्वक्तारमवतु
अवतु माम् अवतु वक्तारम्
ॐ शान्तिः शान्तिः शान्तिः
इति तैत्तिरीयोपनिषत्संपूर्णा

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25I: Upaniṣhad Śhvetāśhvatara Upaniṣhad

Structure: Six Chapters.

Beginning:

श्वेताश्वतरोपनिषद्
पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते
ॐ शान्तिः शान्तिः शान्तिः

ब्रह्मवादिनो वदन्ति
किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् १
कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्या
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः २
ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्
यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ३
तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः
अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ४
पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्रां पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम्
पञ्चावर्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः ५
सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन्हंसो भ्राम्यते ब्रह्मचक्रे
पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ६
उद्गीतमेतत्परमं तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाक्षरं च
अत्रान्तरं ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ७
संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः
अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ८
ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता
अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् ९
क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः
तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः १०
ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः

Branch 25I: Upaniṣhad Śhvetāśhvatara Upaniṣhad

Ending:

एको हँसो भुवनस्यास्य मध्ये स एवाग्निः सलिले संनिविष्टः
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय १५
स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकारो गुणी सर्वविद्यः
प्रधानक्षेत्रज्ञपतिर्गुणेशः सँसारमोक्षस्थितिबन्धहेतुः १६
स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता
य ईशे अस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय १७
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै
तँ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये १८
निष्कलं निष्क्रियँ शान्तं निरवद्यं निरञ्जनम्
अमृतस्य परँ सेतुं दग्धेन्धनमिवानलम् १९
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति २०
तपःप्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान्
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम् २१
वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम्
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः २२
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः प्रकाशन्ते महात्मन इति

इति श्वेताश्वतरोपनिषत्सु षष्ठोऽध्यायः ६

सह नाववतु
सह नौ भुनक्तु
सह वीर्यं करवावहै
तेजस्विनावधीतमस्तु मा विद्विषावहै
ॐ शान्तिः शान्तिः शान्तिः

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

Branch 25J: Upaniṣhad Chhāndogya Upaniṣhad
Structure: 8 Chapters.
Beginning:

छान्दोग्योपनिषद्

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणम-स्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु

ॐ शान्तिः शान्तिः शान्तिः

ओमित्येतदक्षरमुद्गीथमुपासीत ओमिति ह्युद्गायति तस्योपव्याख्यानम् १
एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः २
स एष रसानाँ रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः ३
कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ४
वागेवर्क् प्राणः सामोमित्येतदक्षरमुद्गीथः
तद्वा एतन्मिथुनं यद्वाक् च प्राणश्चर्क् च साम च ५
तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे सँसृज्यते यदा वै मिथुनौ समागच्छत आप-यतो वै तावन्योन्यस्य कामम् ६
आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ७
तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यद-नुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ८
तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शँसत्योमित्युद्गायत्येतस्यै वाक्षरस्यापचित्यै महिम्ना रसेन ९
तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद
नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति १०

इति प्रथमाध्याये प्रथमः खण्डः १

देवासुरा ह वै यत्र संयेतिर उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेन

Branch 25J: Upaniṣhad Chhāndogya Upaniṣhad

Ending:

तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ६

इत्यष्टमाध्याये द्वादशः खण्डः १२

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि विधूय पापं च-
न्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवा-
मीत्यभिसंभवामीति १

इत्यष्टमाध्याये त्रयोदशः खण्डः १३

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतँ स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्येतमदत्कमदत्कँ श्येतं लिन्दु माभिगां लिन्दु माभिगाम् १

इत्यष्टमाध्याये चतुर्दशः खण्डः १४

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेद-
मधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे
स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिँस-
न्त्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंप-
द्यते न च पुनरावर्तते न च पुनरावर्तते १

इत्यष्टमाध्याये पञ्चदशः खण्डः १५

इत्यष्टमोऽध्यायः समाप्तः ८

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणम-
स्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु

ॐ शान्तिः शान्तिः शान्तिः

इति छान्दोग्योपनिषत्संपूर्णा

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25K: Upaniṣhad Bṛihadāraṇyaka Upaniṣhad

Structure: 6 Chapters.

Beginning:

बृहदारन्यकोपनिषत्
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते
ॐ शान्तिः शान्तिः शान्तिः

ॐ उषा वा अश्वस्य मेध्यस्य शिरः । सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य । द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहो-रात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो माँसानि । ऊवध्यँ सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचञ्जघनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् १ अहर्वा अश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनिः रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः संबभूवतुः । हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वासुरानश्वो मनुष्यान्समुद्र एवास्य बन्धुः समुद्रो योनिः २

इति प्रथमाध्याये प्रथमं ब्राह्मणम् १

नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत् । अशनाययाशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति । सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं कँ ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद १ आपो वा अर्कस्तद्यदपाँ शर आसीत्तत्समहन्यत । सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्तताग्निः २ स त्रेधात्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयँ स एष प्राणस्त्रेधा विहितः । तस्य प्राची दिक्शिरोऽसौ चासौ चेर्मौ । अथास्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ३ सोऽकामयत

Branch 25K: Upaniṣhad Bṛihadāraṇyaka Upaniṣhad

Ending:

वार्कारुणीपुत्राद्वार्कारुणीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्र आलम्बीपुत्रादालम्बीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिः २

याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेःकुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ३

समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ४

इति षष्ठाध्याये पञ्चमं ब्राह्मणम् ५

इति षष्ठोऽध्यायः ६

इति बृहदारण्यकोपनिषत्समाप्ता १०

ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै

तेजस्वि नावधीतमस्तु मा विद्विषावहै

ॐ शान्तिः शान्तिः शान्तिः

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25L: Upaniṣhad Kauśhītaki Upaniṣhad

Structure: 4 Chapters.

Beginning:

कौषीतकिब्राह्मणोपनिषत्

श्रीमत्कौषीतकीविद्यावेद्यप्रज्ञापराक्षरम्  प्रतियोगिविनिर्मुक्तब्रह्ममात्रं विचिन्तये  वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम्  आविराविर्मर्योऽभूर्वेदसामत्साणीर्ऋतं मा मा हिंसीरनेनाधीतेनाहोरात्रात्संवसाम्यग्नइळा नम इळा नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो नमो वोऽस्तु देवेभ्यःशिवा नः शंतमा भव सुमृळीका सरस्वती मा ते व्योम संदृशि  अदब्धंमन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः  १

चित्रो ह वै गार्ग्यायणिर्यक्ष्यमाण आरुणिं वव्रे स ह पुत्रं श्वेतकेतुंप्रजिघाय याजयेति तं हासीनं पप्रच्छ गौतमस्य पुत्रास्ति संवृतं लोकेयस्मिन्मा धास्यस्यन्यमुताहो वाध्वा तस्य मा लोके धास्यसीति  सहोवाच नाहमेतद्वेद हन्ताचार्यं पृच्छानीति  स ह पितरमासाद्य पप्रच्छेतीतिमाऽप्राक्षीत्कथं प्रतिब्रवाणीति  स होवाचाहमप्येतन्न वेद सदस्येव वयंस्वाध्यायमधीत्य हरामहे यन्नः परे ददत्येह्युभौ गमिष्याव इति  स हसमित्पाणिश्चित्रं गार्ग्यायणिं प्रतिचक्रम उपायानीति  तं होवाच ब्रह्मार्धोऽसिगौतम यो न मानमुपागा एहि व्येव त्वा ज्ञपयिष्यामीति  १

सहोवाच ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति  तेषां प्राणैः पूर्वपक्ष आप्यायते तानपरपक्षे न प्रजनयति  एतद्वै स्वर्गस्यलोकस्य द्वारं यश्चन्द्रमास्तं यः प्रत्याह तमतिसृजतेऽथ य एनं न प्रत्याहतमिह वृष्टिर्भूत्वा वर्षति स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलोवा सिंहो वा मत्स्यो वा परश्वा वा पुरुषो वाऽन्यो वैतेषु स्थानेषु प्रत्याजायतेयथाकर्म यथाविद्यम् तमागतं पृच्छति कोऽसीति तं प्रतिब्रूयाद्विचक्षणादृतवो रेत आभृतं पञ्चदशात्प्रसूतात्पित्र्यवतस्तन्मा पुंसि कर्तर्येरयध्वम् पुंसा कर्त्रा मातरिमा निषिक्त स जाय उपजायमानो द्वादशत्रयोदश उपमासोद्वादशत्रयोदशेन पित्रासं तद्विदे प्रतितद्विदेऽहं तन्म ऋतवो अमर्त्यवआभरध्वम्  तेन सत्येन तेन तपसा ऋतुरस्म्यार्तवोऽस्मि कोऽस्मि त्वमस्मीति तमतिसृजते  २

स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छतिस वायुलोकं स आदित्य-

Branch 25L: Upaniṣhad Kauśhītaki Upaniṣhad

Ending:

तासुतदा भवति यदा सुप्तः स्वप्न न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवतितदैनं वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैःशब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यतेय-थाऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नैवमेवैतस्मादात्मनःप्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः १९

तद्यथा क्षुरः क्षुरधानेऽवहितः स्यात् विश्वंभरो वा विश्वंभरकुलाय एवमेवैष प्रज्ञ आत्मेदंशरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यः तमेतमात्मामेनत आत्मानोऽन्ववस्यन्ति यथा श्रेष्ठिनं स्वाः तद्यथा श्रेष्ठी स्वर्भुङ्क्तेयथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवं वैतमात्मानमेत आत्मानो भुञ्जन्ति स यावद्ध वा इन्द्र एतमात्मानं नविजज्ञे तावदेनमसुरा अभिबभूबुः स यदा विजज्ञेऽथ हत्वाऽसुरान्विजित्यसर्वेषां देवानां श्रैष्ठ्यं स्वाराज्यमा-धिपत्यं परीयाय तथो एवैवं विद्वान्सर्वान्पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदय एवं वेद २०

ऋतं वदिष्यामि सत्यं वदिष्यामि

तन्मामवतु तद्वक्तारमवतु अवतु माम् अवतु वक्तारम्

ॐ शान्तिः शान्तिः शान्तिः

वाङ्मे मनसि प्रतिष्ठितामनो मे वाचि प्रतिष्ठितमाविराविर्मर्योऽभूर्वेदसा म-त्साणीर्ऋतं मा माहिंसीरनेनाघीतेनाहोरात्रात्संवसाम्यग्न इळा नम इळा नम ऋषिभ्यो मन्त्रकृद्योमन्त्रपतिभ्यो नमोऽस्तु देवेभ्यः शिवा नः शंतमा भव सु-मृळीका सरस्वतिमा ते व्योम संदृशि अदब्धं मन इषिरं चक्षुः सूर्यो ज्यो-तिषां श्रेष्ठो दीक्षेमा मा हिंसीः

ॐ शान्तिः शान्तिः शान्तिः इति

ऋग्वेदान्तर्गतकौषीतकिब्राह्मणारण्यकोपनिषत्सुचतुर्थोऽध्यायः ४ इति कौषीतकिब्राह्मणोपनिषत्समाप्ता

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25M: Upaniṣhad Jābāla Upaniṣhad

Structure: Six Khaṇḍas.

Beginning:

जाबालोपनिषत्

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः

बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । तस्माद्यत्र क्वचन गच्छति तदेव मन्येत तदविमुक्तमेव । इदं वैकुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षीभवति तस्मादविमुक्तमेव निषेवेत अविमुक्तं न विमुञ्चेदेवमेवैतद्याज्ञवल्क्यः

इति प्रथमः खण्डः

अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं य एषोऽनन्तोऽव्यक्त आत्मा तं कथमहं विजानीयामिति । स होवाच याज्ञवल्क्यः सोऽविमुक्त उपास्यो य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति । सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रतिष्ठित इति । का वै वरणा का च नासीतिसर्वानिन्द्रियकृतान्दोषान्वारयतीति तेन वरणा भवति सर्वानिन्द्रियकृतान्पापान्नाशयतीति तेन नासी भवतीति । कतमच्चास्य स्थानं भवतीति । भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीति । एतद्वैसंधिं संध्यां ब्रह्मविद उपासत इति सोऽविमुक्त उपास्य इति । सोऽविमुक्तं ज्ञानमाचष्टे यो वै तदेतदेवं वेदेति

इति जाबालोपनिषत्सु द्वितीयः खण्डः

अथ हैनं ब्रह्मचारिण ऊचुः किं जाप्येनामृतत्वं ब्रूहीति । स होवाचयाज्ञवल्क्यः शतरुद्रियेणेत्येतानि ह वा अमृतनामधेयान्येतैर्ह वा अमृतोभवतीति । एवमेवतद्याज्ञवल्क्यः

Branch 25M: Upaniṣhad Jābāla Upaniṣhad

Ending:

अथ हैनमत्रिः पप्रच्छ । याज्ञवल्क्य पृच्छामि त्वा याज्ञवल्क्य अयज्ञोपवीती कथं ब्राह्मण इति । स होवाच याज्ञवल्क्य इदमेवास्य तद्यज्ञोपवीतं यआत्मा प्राश्याचम्यायं विधिः परिव्राजकानाम् । वीराध्वाने वाऽनाशके वाऽपां प्रवेशे वाऽग्निप्रवेशे वा महाप्रस्थाने वाऽथ परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति । यद्यातुरः स्यान्मनसा वाचावा संन्यसेत् । एष पन्था ब्रह्मणा हानुवित्तस्तेनैति संन्यासी ब्रह्म विदित्येवमेवैष भगवन्निति वै याज्ञवल्क्यः

इति जाबालोपनिषत्सु पञ्चमः खण्डः

तत्र परमहंसा नाम संवर्तकारुणिश्वेतकेतुदुर्वासऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयोऽव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तस्त्रिदण्डं कमण्डलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूःस्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेत् । यथा जातरूपधरो निर्द्वन्द्वो निष्परिग्रहस्तत्तत्त्वब्रह्ममार्गे सम्यक्संपन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकालेविमुक्तो भैक्षमाचरन्नुदरपात्रेण लाभालाभौ समौ भूत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतवास्यप्रयत्नो निर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठोऽशुभकर्मनिर्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसो नाम स परमहंसोनामेति इति जाबालोपनिषत्सु षष्ठः खण्डः

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिर्व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः
इत्यथर्ववेदे जाबालोपनिषत्समाप्ता

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 25N: Upaniṣhad Mahānārāyaṇa Upaniṣhad

Structure: 25 Khaṇḍas.

Beginning:

महानारायणोपनिषत्

ॐ नमो महते नारायणाय
अम्भस्यपारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्
शुक्रेण ज्योतींषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः १
यस्मिन्निदं सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः
तदेव भूतं तदु भव्यमानमिदं तदक्षरे परमे व्योमन् २
येनावृतं खं च दिवं मही च येनादित्यस्तपति तेजसा भ्राजसा च
यदन्तः समुद्रे कवयो वदन्ति तदक्षरे परमे प्रजाः ३
यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यचसर्ज भूम्याम्
यदोषधीभिः पुरुषान्पशूंश्च विवेश भूतानि चराचराणि ४
अतः परं नान्यदणीयसं हि परात्परं यन्महतो महान्तम्
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ५
तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्
इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः ६
तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः
तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः ७
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ८
अर्धमासा मासा ऋतवः संवत्सरश्च कल्पताम्
स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः ९
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्
न तस्येशे कश्चन तस्य नाम महद्यशः १०
न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्
हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ११
अद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टौ १२

इति श्रीमहानारायणोपनिषदि प्रथमः खण्डः १

Branch 25N: Upaniṣhad Mahānārāyaṇa Upaniṣhad

Ending:

श्रद्धासत्यो महस्वांस्तपसोपरिष्टाज्ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान् । तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः १

वसुरण्यो विभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि विश्वसृक् तेजोदास्त्वमस्यग्नेर्वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः । उपयाम गृहीतोऽसि । ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत । एतद्वै महोपनिषदं देवानां गुह्यम् । य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् २

इति श्रीमहानारायणोपनिषदि चतुर्विंशः खण्डः २४

तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीत् । यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो याद्याहुतीराहुती यदस्य विज्ञानं तज्जुहोति यत्सायम्प्रातरत्ति तत्समिधो यत्सायम्प्रातर्मध्यन्दिनं च तानि सवनानि । ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथः । एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छति । एतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्राह्मणो महिमानमाप्नोति तस्माद्ब्राह्मणो महिमानमाप्नोतीत्युपनिषत् १

इति श्रीमहानारायणोपनिषदि पञ्चविंशः खण्डः २५

इत्याथर्वणीया महानारायणोपनिषत्समाप्ता

Reference: Shastri, J.L., ed., *Upanisat-Samgrahah, Containing 108 Upaniṣads*, (Delhi: Motilal Banarsidass, 1984).

Branch 25 O: Upaniṣhad Paiñgala Upaniṣhad
Structure: 4 Chapters.
Beginning:

पैङ्गलोपनिषत्
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते

अथ ह पैङ्गलो याज्ञवल्क्यमुपसमेत्य द्वादशवर्षशुश्रूषापूर्वकं परमरहस्यकैवल्यमनुब्रूहीति पप्रच्छ । स होवाच याज्ञवल्क्यः सदेव सोम्येदमग्र आसीत् । तन्नित्यमुक्तमविक्रियं सत्यज्ञानानन्दं परिपूर्णं सनातनमेकमेवाद्वितीयंब्रह्म । तस्मिन्मरुशुक्तिकास्थाणुस्फटिकादौ जलरौप्यपुरुषरेखादिवल्लोहितशुक्लकृष्णगुणमयी गुणसाम्यानिर्वाच्या मूलप्रकृतिरासीत् । तत्प्रतिबिम्बितंयत्तत्साक्षिचैतन्यमासीत् । सा पुनर्विकृतिं प्राप्य सत्त्वोद्रिक्ताऽव्यक्ताख्यावरणशक्तिरासीत् । तत्प्रतिबिम्बितं यत्तदीश्वरचैतन्यमासीत् । स स्वाधीनमायःसर्वज्ञः सृष्टिस्थितिलयानामादिकर्ता जगदङ्कुररूपो भवति स्वस्मिन्विलीनंसकलं जगदाविर्भावयति । प्राणिकर्मवशादेष पटो यद्वत्प्रसारितः प्राणिकर्मक्षयात्पुनस्तिरोभावयति । तस्मिन्नेवाखिलं विश्वं संकोचितपटवद्वर्तते । ईशाधिष्ठितावरणशक्तितो रजोद्रिक्ता महदाख्या विक्षेपशक्तिरासीत् । तत्प्रतिबिम्बितं यत्तद्धिरण्यगर्भचैतन्यमासीत् । स महत्तत्त्वाभिमानी स्पष्टास्पष्टवपुर्भवति । हिरण्यगर्भाधिष्ठितविक्षेपशक्तितस्तमोद्रिक्ताहंकाराभिधा स्थूलशक्तिरासीत् । तत्प्रतिबिम्बितं यत्तद्विराट्चैतन्यमासीत् । स तदभिमानी स्पष्टवपुः सर्वस्थूलपालको विष्णुः प्रधानपुरुषो भवति । तस्मादात्मन आकाशःसंभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । तानि पञ्च तन्मात्राणि त्रिगुणानि भवन्ति । स्रष्टुकामो जगद्योनिस्तमोगुणमधिष्ठयसूक्ष्मतन्मात्राणि भूतानि स्थूलीकर्तुं सोऽकामयत । सृष्टेः परिमितानिभूतान्येकमेकं द्विधा विधाय पुनश्चतुर्धा कृत्वा स्वस्वेतरद्वितीयांशैः पञ्चधासंयोज्य पञ्चीकृतभूतैरनन्तकोटिब्रह्माण्डानि तत्तदण्डोचितचतुर्दशभुवनानितत्तद्भुवनोचितगोलकस्थूलशरीराण्यसृजत् । स पञ्चभूतानां रजोंशांश्चतुर्धाकृत्वा भागत्रयात्पञ्चावृत्त्यात्मकं प्राणमसृजत् । स तेषां तुर्यभागेन कर्मेन्द्रियाण्यसृजत् । स तेषां सत्त्वांशं चतुर्धा कृत्वा भागत्रयसमष्टितः

Branch 25 O: Upaniṣhad Paiñgala Upaniṣhad

Ending:

अनन्तकर्मशौचं च जपो यज्ञस्तथैव च
तीर्थयात्राभिगमनं यावत्तत्त्वं न विन्दति १८
अहंब्रह्मेति नियतं मोक्षहेतुर्महात्मनाम्
द्वे पदे बन्धमोक्षाय न ममेति ममेति च १९
ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते
मनसो ह्युन्मनीभावे द्वैतं नैवोपलभ्यते २०
यदायात्युन्मनीभावस्तदा तत्परमं पदम्
यत्र यत्र मनो याति तत्र तत्र परं पदम् २१
तत्र तत्र परं ब्रह्म सर्वत्र समवस्थितम्
हन्यान्मुष्टिभिराकाशंक्षुधार्तः खण्डयेत्तुषम् २२
नाहंब्रह्मेति जानाति तस्य मुक्तिर्न जायते
य एतदुपनिषदं नित्यमधीते सोऽग्निपूतो भवति
स वायुपूतो भवति । स आदित्यपूतो भवति । स ब्रह्मपूतो भवति । स विष्णुपूतो भवति । स रुद्रपूतो भवति । स सर्वेषु तीर्थेषु स्नातो भवति । स सर्वेषु वेदेष्वधीतोभवति । स सर्ववेदव्रतचर्यासु चरितो भवति । तेने-तिहासपुराणानां रुद्राणांशतसहस्राणि जप्तानि फलानि भवन्ति । प्रणवा-नामयुतं जप्तं भवति । दशपूर्वान्दशोत्तरान्पुनाति । स पङ्क्तिपावनो भवति । स महान्भवति । ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पगमनतत्संयोगिपा-तकेभ्यः पूतो भवति । तद्विष्णोःपरमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् २३ ॐ सत्यमित्युपनिषत्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते
इति पैङ्गलोपनिषत्समाप्ता

Reference: Radhakrishnan, S., *The Principal Upanishads*, (London: George Allen and Unwin, Ltd., 1968).

## Branch 26A: Āraṇyaka Jaiminīya Āraṇyaka

Structure: Twelve anuvākas.

Beginning:

जैमिनीयारण्यकः

प्रजापतिर्वा इदं त्रयेण वेदेनाजयद्यदस्येदं जितं तत् १ स ऐक्षतेत्थं चेद्वा अन्ये देवा अनेन वेदेन यक्ष्यन्त इमां वाव ते जितिं जेष्यन्ति येयम्मम हन्त त्रयस्य वेदस्य रसमाददा इति २ स भूरित्येवर्ग्वेदस्य रसमादत्त सेयम्पृथिव्यभवत् तस्य यो रसः प्राणेदत्सोऽग्निरभवद्रसस्य रसः ३ भुव इत्येव यजुर्वेदस्य रसमादत्त तदिदमन्तरिक्षमभवत् तस्य यो रसः प्राणेदत्स वायुरभवद्रसस्य रसः ४ स्वरित्येव सामवेदस्य रसमादत्त सोऽसौ द्यौरभवत्तस्य यो रसः प्राणेदत्स आदित्योऽभवद्रसस्य रसः ५ अथैकस्यैवाक्षरस्य रसं नाशक्नोदादातुमोमित्येतस्यैव ६ सेयं वागभवत् ओमेव नामैषा तस्या उ प्राण एव रसः ७ तान्येतान्यष्टौ अष्टाक्षरा गायत्री गायत्रं साम ब्रह्म उ गायत्री तदु ब्रह्माभिसम्पद्यते अष्टाशफाः पशवस्तेनो पशव्यम् ८ १

प्रथमेऽनुवाके प्रथमः खण्डः

स यदोमिति सोऽग्निर्वागिति पृथिव्योमिति वायुर्वागित्यन्तरिक्षमोमित्यादित्यो वागिति द्यौरोमिति प्राणो वागित्येव वाक् १ स य एवं विद्वानुद्गायत्योमित्येवाग्निमादाय पृथिव्याम्प्रतिष्ठापयत्योमित्येव वायुमादायान्तरिक्षे प्रतिष्ठापयत्योमित्येवादित्यमादाय दिवि प्रतिष्ठापयत्योमित्येव प्राणमादाय वाचि प्रतिष्ठापयति २ तद्धैतच्छैलना गायत्रं गायन्त्योवा३चोवा३चोवा३छुम्भा ओवा इति ३ तदु ह तत्पराङिवानायुष्यमिव तद्वायोश्चापां चानु वर्त्म गेयम् ४ यद्वै वायुः पराङेव पवेत क्षीयेत स स पुरस्ताद्वाति स दक्षिणतस्स पश्चात्स उत्तरतस्स उपरिष्टात्स सर्वा दिशोऽनुसंवाति ५ तदेतदाहुरिदानीं वा अयमितोऽवासीदथेत्थाद्वातीति स यद्रेष्माणं जनमानो निवेष्टमानो वाति क्षयादेव बिभ्यत् ६ यदु ह वा आपः पराचीरेव प्रसृतास्स्यन्देरन्क्षीयेरंस्ताः यदङ्कांसि कुर्वाणा निवेष्टमाना आवर्तान्सृजमाना यन्ति क्षयादेव बिभ्यतीः तदेतद्वायोश्चैवापां चानु वर्त्म गेयम् ७ २

प्रथमेऽनुवाके द्वितीयः खण्डः

Branch 26A: Āraṇyaka Jaiminīya Āraṇyaka

Ending:

स यत्र यज्ञस्तच्छन्दांसि यत्र वा छन्दांसि तद्यज्ञः ते द्वे योनी तदेकम्मिथुनम् ८ कस्सविता का सावित्री स्तनयित्नुरेव सविता विद्युत्सावित्री ९ स यत्र स्तनयित्नुस्तद्विद्युद्यत्र वा विद्युत्तत्स्तनयित्नुः ते द्वे योनी तदेकम्मिथुनम् १० कस्सविता का सावित्री आदित्य एव सविता द्यौस्सावित्री ११ स यत्रादित्यस्तद्द्यौर्यत्र वा द्यौस्तदादित्यः ते द्वे योनी तदेकम्मिथुनम् १२ कस्सविता का सावित्री चन्द्र एव सविता नक्षत्राणि सावित्री १३ स यत्र चन्द्रस्तन्नक्षत्राणि यत्र वा नक्षत्राणि तच्चन्द्रः ते द्वे योनी तदेकम्मिथुनम् १४ कस्सविता का सावित्री मन एव सविता वाक्सावित्री १५ स यत्र मनस्तद्वाग्यत्र वा वाक्तन्मनः ते द्वे योनी तदेकम्मिथुनम् १६ कस्सविता का सावित्री पुरुष एव सविता स्त्री सावित्री स यत्र पुरुषस्तत्स्त्री यत्र वा स्त्री तत्पुरुषः ते द्वे योनी तदेकम्मिथुनम् १७ २७

द्वादशेऽनुवाके प्रथमः खण्डः

तस्या एष प्रथमः पादो भूस्तत्सवितुर्वरेण्यमिति अग्निर्वै वरेण्यमापो वै वरेण्यं चन्द्रमा वै वरेण्यम् १ तस्या एष द्वितीयः पादो भर्गमयो भुवो भर्गो देवस्य धीमहीति अग्निर्वै भर्गः आदित्यो वै भर्गः चन्द्रमा वै भर्गः २ तस्या एष तृतीयः पादस्स्वर्धियो यो नः प्रचोदयादिति यज्ञो वै प्रचोदयति स्त्री च वै पुरुषश्च प्रजनयतः ३ भूर्भुवस्तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहीति अग्निर्वै भर्गः आदित्यो वै भर्गः चन्द्रमा वै भर्गः ४ स्वर्धियो यो नः प्रचोदयादिति यज्ञो वै प्रचोदयति स्त्री च वै पुरुषश्च प्रजनयतः ५ भूर्भुवस्स्वस्तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति यो वा एतां सावित्रीमेवं वेदाप पुनर्मृत्युं तरति सावित्र्या एव सलोकतां जयति सावित्र्या एव सलोकतां जयति ६ २८

द्वादशेऽनुवाके द्वितीयः खण्डः द्वादशोऽनुवाकस्समाप्तः

इत्युपनिषद्ब्राह्मणं समाप्तम्

Reference: Oertel, Hanns, "The Jaiminiya or Talavakara Upanisad Brahmana: Text, Translation, and Notes", in: *Journal of the American Oriental Society* 16 (1896), pp. 79-260.

## Branch 26B: Āraṇyaka Śhāṅkhāyana Āraṇyaka

Structure: 15 Chapters.

Beginning:

अथ ऋग्वेदीयम् शाङ्खायनायं । अथ प्रथमोऽध्यायः ।
प्रजापतिर्वै संवत्सरः । तस्यैष आत्मा यन्महाव्रतम् । तस्माद् एनत् परस्मै न शंसेन् नेत् सर्वेषां भूतानाम् आत्मानं परस्मिन् दधानीति ॥
अथो इन्द्रस्यैष आत्मा यन्महाव्रतम् । तस्माद् एनत् परस्मै न शंसेन् नेद् इन्द्रस्याऽऽत्मानं परस्मिन् दधानीति ॥
अथो यम् एवैतम् ऋङ्मयं यजुर्मयं साममयं पुरुषं संस्कुर्वन्ति तस्यैष आत्मा यन्महाव्रतम् । तस्माद् एनत् परस्मै न शंसेन् नेत् सर्वेषां छन्दसाम् आत्मानं परस्मिन् दधानीति ॥
कामं तु सत्रिणां होता शंसेत् । पित्रे वाऽऽचार्याय वाऽऽत्मने हैवाऽस्य तच्छस्तं भवति । आत्मनैव तद्यज्ञं समर्धयति । तस्य पञ्चविंशः स्तोमः । चतुर्विंशतिर्वै संवत्सरस्याऽर्धमासाः संवत्सरस्यैवाऽप्त्यै । अथो प्रजापतिर्वै संवत्सरः पञ्चविंशः । अथो चतुर्विंशो वै पुरस्तात् कृतो भवति तस्यैषा गरित्यत् पञ्चविंशः । ऐन्द्रश्च ऋषभः प्राजापत्यश्चाऽज उपालभौ । ऐन्द्रं वा एतद् अहः । इन्द्र उ वै प्रजापतिः । तत् प्राजापत्यं रूपम् । अथो एतद् एव पशुष्वैन्द्रं रूपं यत् ऋषभः १
तस्य विशोविशो वो अतिथिमिति द्वादशर्चमाज्यम् । द्वादश वै मासाः संवत्सरः संवत्सरस्यैवाऽऽप्त्यै । तस्मिन् वै द्वे छन्दसी भवतो गायत्र्यश्चाऽनुष्टुभश्च । अग्निं नरो दीधितिभियोः इत्येतत् पञ्चविंशत्यृचमुपसंशंसति । पञ्चविंशो हि स्तोमः । तद्वै शस्त्रं समृद्धं यत्स्तोमेन संपद्यते । तस्मिन् वै द्वे छन्दसी भव्तो विराजश्च त्रिष्टुभश्च । तानि चत्वारि संपद्यन्ते । चतुष्टयं वा इदं सर्वम् अस्यैव सर्वस्याऽऽप्त्यै । त्रैष्टुभः प्रउगः । इन्द्रस्यैवैतच्छन्दो यत् त्रिष्टुप् । तदेनं स्वेन छन्दसा समर्धयति । कुविदङ्ग नमसा ये वृधासः इति वायव्यं महद्वद वृधवत् । महद्वत्--महद्वद्ध्येतदहः । अत एवोत्तरं तृचमैन्द्रवायवम् यावत्तरस्तन्वो यावदोजः इति यावन्नरश्चक्षसा दीध्यानाः इत्येतेन रूपेण । उद्वां चक्षुर्वरुण सुप्रतीकमिति मैत्रावरुणम् देवयोरेति सूर्यस्ततन्वान् इत्येतेन रूपेण ।

Branch 26B: Āraṇyaka Śhāṅkhāyaṇa Āraṇyaka

Ending:

स एषः तत्त्वमसि इति । आत्माऽवगम्योऽहं ब्रह्मास्मीति ।
तदेतद्ब्रह्माऽपूर्वमपरमनपरमनन्तरमबाह्यम् । अयमात्मा ब्रह्म
सर्वाऽनुभूरित्यनुशासनमिति याज्ञवल्क्यः । तदेतन्नाऽपुत्राय नाऽनन्तेवासिने
वा ब्रूयादिति । य इमामद्भिः परिगृहीतां वसुमतीं धनस्य पूर्णां दद्यात्
इदमेव ततो भूयः इदमेव ततो भूय इत्यनुशासनम् । तामेताम् उपनिषदं
वेदशिरो न यथा कथंचन वदेत् । तदेतदृचाऽभ्युदितम् १

इति शाङ्खायनारण्यके त्रयोदशोऽध्यायः

अथ चतुर्दशोऽध्यायः । ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां
मुण्डमुण्डम् ।
नाधीतेऽधीते वेदमाहुस्तमज्ञं शिरश्छित्त्वाऽसौ कुरुते कबन्धम् १
स्थाणुरयं भारहारः किलाऽभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा २ इति

इति शाङ्खायनायके चतुर्दशोऽध्यायः

अथ पञ्चदशोऽध्यायः । अथ वंशः । ओं नमो ब्रह्मणे नम आचार्येभ्यः ।
गुणाख्याच्छाङ्खायनाद् अस्माभिरधीतम् । गुणाख्यः शाङ्खायनः कहोलात्
कौपीतकेः । कहोलः कौषीतकिरुद्दालकादारुणेः । उद्दालक आरुणिः
प्रियव्रतात् सौमापेः । प्रियव्रतः सौमापिः सोमपात् । सोमपः
सौमात्प्रातिवेश्यात् । सौमः प्रातिवेश्यः प्रतिवेश्यात् । प्रतिवेश्यो
बृहद्दिवात् । बृहद्दिवः सुम्नयोः । सुम्नयुरुद्दालकात् । उद्दालको
विश्वमनसः । विश्वमना व्यश्वात् । व्यश्वः साकमश्वात् । साकमश्वो
देवरातात् । देवरातो विश्वामित्रात् । विश्वामित्र इन्द्रात् । इन्द्रः
प्रजापतेः । प्रजापतिर्ब्रह्मणः । ब्रह्मा स्वयम्भूः । नमो ब्रह्मणे नमो
ब्रह्मणे १ इति शाङ्खायनायके पञ्चदशोऽध्यायः ।

इति शाङ्खायनायकं समाप्तम्

Reference: Dev, Bhim, *Śāṅkhāyana Āraṇyakam*, (Hoshiarpur: Vishveshvaranand Vedic Research Institute, 1980).

## Branch 26C: Āraṇyaka Chhāndogya Āraṇyaka

Structure: 13 Khaṇḍas.

Beginning:

छान्दोग्यारण्यकम्

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणम-स्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु

ॐ शान्तिः शान्तिः शान्तिः

ओमित्येतदक्षरमुद्गीथमुपासीत ओमिति ह्युद्गायति तस्योपव्याख्यानम् १

एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः २

स एष रसानाँ रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः ३

कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति ४

वागेवर्क् प्राणः सामोमित्येतदक्षरमुद्गीथः

तद्वा एतन्मिथुनं यद्वाक् च प्राणश्चर्क् च साम च ५

तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे सँसृज्यते यदा वै मिथुनौ समागच्छत आप-यतो वै तावन्योन्यस्य कामम् ६

आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ७

तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यद-नुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ८

तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शँसत्योमित्युद्गायत्येतस्यै वाक्षरस्यापचित्यै महिम्ना रसेन ९

तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद

नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति १०

इति प्रथमाध्याये प्रथमः खण्डः १

देवासुरा ह वै यत्र संयेतिर उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेन

Branch 26C: Āraṇyaka Chhāndogya Āraṇyaka

Ending:

अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ९

इति प्रथमाध्याय एकादशः खण्डः ११

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज १

तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति २

तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयांचकार ३

ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः सँरब्धाः सर्पन्तीत्येव माससृपुस्ते ह समुपविश्य हिंचक्रुः ४

ॐ३मदा३मों३पिबा३मों३देवो वरुणः प्रजापतिः सविता२न्नमिहा२हरदन्नपते३न्नमिहा२हरा२हरो३मिति ५

इति प्रथमाध्याये द्वादशः खण्डः १२

अयं वाव लोको हाउकारो वायुर्हाइकारश्चन्द्रमा अथकार आत्मेहकारोऽग्निरीकारः १

आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोइकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट् २

अनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारः ३

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवँ साम्नामुपनिषदं वेदोपनिषदं वेद इति ४

इति प्रथमाध्याये त्रयोदशः खण्डः १३

इति प्रथमोऽध्यायः १

Reference: Shastri, J.L., *Upanisat-Samgrahah Containing 188 Upaniṣads*, (Delhi: Motilal Banarsidass, 1984).

## Branch 26D: Āraṇyaka — Maitrāyaṇīya Āraṇyaka

Structure: Seven Prapāṭhakas

Beginning:

मैत्रायणीयमारण्यकम्

तच्छँ॑योरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।

दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ॥

ऊर्ध्वं जिगातु भेषजँ॑ शन्नो अस्तु द्विपदे शं चतुष्पदे १

ॐ शान्तिः शान्तिः शान्तिः

मैत्रायण्युपनिषत्

आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु

ॐ शान्तिः शान्तिः शान्तिः

मैत्रायणी कौषितकी बृहज्ज्ञाबालतापनी । कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमत्रिका । ॐ बृहद्रथो ह वै नाम राजा राज्ये ज्येष्ठं पुत्रं निधापयित्वेदमशाश्वतं मन्यमानः शारीरं वैराग्यमुपेतोऽरण्यं निर्जगाम स तत्र परमं तप आस्थायादित्यमीक्षमाण ऊर्ध्वबाहुस्तिष्ठत्यन्ते सहस्रस्य मुनिरन्तिकमाजगामाग्निरिवाधूमकस्तेजसा निर्दहन्निवात्मविद्भगवाञ्शाकायन्य उत्तिष्ठोत्तिष्ठ वरंवृणीष्वेति राजानमब्रवीत्स तस्मै नमस्कृत्योवाच भगवन्नाहमात्मवित्त्वं तत्त्वविच्छृणुमो वयं स त्वं नो ब्रूहीत्येतद्वृतं पुरस्तादशक्यं मा पृच्छ प्रश्नमैक्ष्वाकान्यान्कामान्वृणीष्वेति शाकायन्यस्य चरणावभिमृश्यमानो राजेमां गाथांजगाद १

भगवन्नस्थिचर्मस्नाय्वुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिते विण्मूत्रवातपित्तकफसंघाते दुर्गन्धे निःसारेऽस्मिञ्छरीरे किं कामोपभोगैः २

कामक्रोधलोभभयविषादेर्ष्येष्टवियोगानिष्टसंप्रयोगक्षुत्पिपासाजरामृत्युरोगशोकाद्यैरभिहतेऽस्मिञ्छरीरे किं कामोपभोगैः ३

सर्वं चेदं क्षयिष्णु पश्यामो यथेमे दंशमशकादयस्तृणवन्नश्यतयोद्भूतप्रध्वं-

Branch 26D: Āraṇyaka Maitrāyaṇīya Āraṇyaka

Ending:

पुरुषश्चाक्षुषो योऽयं दक्षिणेऽक्षिण्यवस्थितः
इन्द्रोऽयमस्यजायेयं सव्ये चाक्षिण्यवस्थिता
समागमस्तयोरेव हृदयान्तर्गते सुषौ
तेजस्तल्लोहितस्यात्र पिण्ड एवोभयोस्तयोः
हृदयादायता तावच्चक्षुष्यस्मिन्प्रतिष्ठिता
सारणी सा तयोर्नाडी द्वयोरेका द्विधा सती
मनःकायाग्निमाहन्ति स प्रेरयति मारुतम्
मारुतस्तूरसि चरन्मन्द्रं जनयतिस्वरम्
खजाग्नियोगाद्धृदि संप्रयुक्तमणोर्ह्यणुर्द्विरणुः कण्ठदेशे
जिह्वाग्रदेशेत्र्यणुकं च विद्धि विनिर्गतं मातृकमेवमाहुः
न पश्यन्मृत्युं पश्यति न रोगंनोत दुःखताम् सर्वँ हि पश्यन्पश्यति
सर्वमाप्नोति सर्वशः ६
चाक्षुषः स्वप्नचारी च सुप्तः सुप्तात्परश्च यः
भेदाश्चैतेऽस्य चत्वारस्तेभ्यस्तुर्यंमहत्तरम् ७
त्रिष्वेकपाच्चरेद्ब्रह्म त्रिपाच्चरति चोत्तरे
सत्यानृतोपभोगार्थो द्वैतीभावो महात्मनः ८
इति द्वैतीभावो महात्मनऽइति ११
इति मैत्रायणीयारण्यकेऽथवा मैत्रायणीयशाखोपनिषदि सप्तमः प्रपाठकः ७
इति मैत्रायणीयारण्यकमथवा मैत्रायणीयशाखोपनिषत्समाप्ता ॥
ॐ नमो वाचे नमो वाचस्पतये याऽर्चोदिताय च नोदिताय तस्मै वाचे नमो
नमऽऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रविद्भ्यो मन्त्रविद्भ्यो मन्त्रपतिभ्यो मा मामृषयो
मन्त्रकृतो मन्त्रविदः प्रादुर्दैवीँ वाचमुद्यासं जुष्टां देवेभ्यः स्वधावरीं
पितृभ्योऽनुमतान्मनुष्येभ्यस्तन्मा देवाऽअवन्तु शोभायि पितरोऽनुमदन्तु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥ इति ॥

Reference: Satyavalekara, Dāmodara, *Maitrayana Samhita*, (Pāradi: Svādhyāya Maṇḍala, 1983), pp. 543-564.

## Branch 26E: Āraṇyaka Aitareya Āraṇyaka

Structure: Five major divisions, called Āraṇyakas

Beginning:

ऐतरेय आरण्यक

अथ प्रथमारण्यकम्

ओम् ॥ अथ महाव्रतम् । इन्द्रो वै वृत्रं हत्वा महानभवद्यन्महान-भवत्तन्महाव्रतमभवत्तन्महाव्रतस्य महाव्रतत्वम् । द्वे एतस्याह्न आज्ये जुर्या-दिति हैक आहुरेकमिति त्वेव स्थितम् । प्र वो देवायाग्नय इति राद्धिकामः । विशो विशो वो अतिथिमिति पुष्टिकामः । पुष्टिर्वै विशः पुष्टि-मान्भवतीति । अतिथिमिति पदं भवति नैतत्कुर्यादित्याहुरीश्वरोऽतिथिरेव चरितोः । तदु ह स्माह कुर्यादेव । यो वै भवति यः श्रेष्ठतामश्नुते स वा अतिथिर्भवति । न वा असन्तमातिथ्यायाद्रियन्ते । तस्मादु काममेवैत-त्कुर्यात् । स यद्येतत्कुर्यादागन्म वृत्रहन्तममित्येतं तृचं प्रथमं कुर्यात् । एतद्वा अहरीप्सन्तः संवत्सरमासते त आगच्छन्ति । त एतेऽनुष्टुप्शीर्षा-ण्स्त्रयस्तृचा भवन्ति ब्रह्म वै गायत्री वागनुष्टुब्ब्रह्मणैव तद्वाचं संदधाति । अबोध्यग्निः समिधा जनानामिति कीर्तिकामः । होताजनिष्ट चेतन इति प्रजापशुकामः १

अग्निं नरो दीधितिभिररण्योरित्यन्नाद्यकामः । अग्निर्वा अन्नादः । चिरत-रमिव वा इतरेष्वाज्येष्वग्निमागच्छन्त्यथेह मुखत एवाग्निमागछन्ति मुखतोऽन्नाद्यमश्नुते मुखतः पाप्मानमपघ्नते । हस्तच्युती जनयन्तेति जात-वदेतस्माद्वा अह्नो यजमानो जायते तस्माज्जातवत् । तानि चत्वारि छन्दांसि भवन्ति चतुष्पादा वै पशवः पशूनामवरुद्ध्यै । तानि त्रीणि छन्दांसि भवन्ति त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै । ते द्वे छन्दसी भवतः प्रतिष्ठाया एव । द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति । ताः पराग्वचनेन पञ्चविंश-तिर्भवन्ति पञ्चविं-शोऽयं पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या द्वा ऊरू द्वौ बाहू आ-त्मैव पञ्चविंशस्तमिममात्मानं पञ्चविंशं संस्कुरुते । अथो पञ्चविंशं वा एतदहः पञ्चविंश एतस्याह्न स्तोमस्तत्समेन समं प्रतिपद्यते तस्माद्द्वे एव पञ्चविंशतिर्भवन्ति । तास्त्रिः प्रथमया त्रिरुत्तमयैकया न त्रिंशन्नयूनाद्वरा

Branch 26E: Āraṇyaka Aitareya Āraṇyaka

Ending:

होतृशस्त्रेषूक्थशा यज सोमस्येत्येकः प्रैषः सनाराशंसेष्वनाराशंसेषु वा होत्रकाणाम् । उक्थशा यज सोमानामिति । तदिदमहर्नानन्तेवासिने प्रब्रूयान्नासंवत्सरवासिने नो एवासंवत्सरवासिने नाब्रह्मचारिणे नासब्रह्मचारिणे नो एवासब्रह्मचारिणे नानभिप्राप्तायैतं देशम् । न भूयः सकृद्वदनादि्द्वर्गदनाद्वा द्वय्येव । एक एकस्मै प्रब्रूयादिति ह स्माह जातूकर्ण्यः । न वत्से च न तृतीय इति । न तिष्ठंस्तिष्ठते न व्रजन्व्रजते न शयानः शयानाय नोपर्यासीन उपर्यासीनायाध एवासीनोऽध आसीनाय । नावष्टब्धो न प्रतिस्तब्धो नातिवीतो नाङ्कं कृत्वोर्ध्वज्ञुरनपश्रितोऽधीयीत न मांसं भुक्त्वा न लोहितं दृष्ट्वा न गतासुं नाव्रत्यमाक्रम्य नाक्त्वा नाभ्यज्य नोन्मर्दनं कारयित्वा न नापितेन कारयित्वा न स्नात्वा न वर्णकेनानुलिप्य न स्रजमपिनह्य न स्त्रियमुपगम्य नोल्लिख्य नाविलिख्य । नेदमेकस्मिन्नहनि समापयेदिति ह स्माह जातूकर्ण्यः समापयेदिति गालवो यदन्यत्प्राक्तृचाशीतिभ्यः समापयेदेवेत्याग्निवेश्यायनोऽन्यमन्यस्मिन्देशे शमयमान इति । यत्रेदमधीयीत न तत्रान्यदधीयीत यत्र त्वन्यदधीयीत काममिदं तत्राधीयीत । नेदमनधीयन्स्नातको भवति यद्यप्यन्यद्बह्वधीयान्नैवेदमनधीयन्त्स्नातको भवति । नास्मादधीतात्प्रमाद्येद्यद्यप्यन्यस्मात्प्रमाद्यद्येन्नैवास्मात्प्रमाद्येन्नो एवास्मात्प्रमाद्येत् । अस्माच्चेन्न प्रमाद्येदलमात्मन इति विद्यात् । अलं सत्यं विद्यात् । नेदंविदनिदंविदा समुद्दिशेन्न सह भुञ्जीत न सधमादी स्यात् । अथातः स्वाध्यायधर्मं व्याख्यास्यामः । उप पुराणेनापीते कच्चोदके पूर्वाह्णे न संभिन्नासु छायास्वपराह्णे नाध्यूळ्ह मेघेऽपर्तौ वर्षे त्रिरात्रं वैदिकेनाध्यायेनान्तरियान्नास्मिन्कथां वदेत नास्य रात्रौ चन चिकीर्तयिषेत् । तदिति वा एतस्य महतो भूतस्य नाम भवति योऽस्यैतदेवं नाम वेद ब्रह्म भवति ब्रह्म भवति ३

इत्यैतरेयपञ्चमारण्यके तृतीयोऽध्यायः

इति पञ्चमारण्यकं समाप्तम्

Reference: Keith, Arthur Berriedale, *The Aitareya Āraṇyaka*, (New Delhi: Master Publishers, 1981).

## Branch 26F: Āraṇyaka Taittirīya Āraṇyaka

Structure: Ten Prapāṭhakas, followed by a substantial Pariśiṣṭa.

Beginning:

तैत्तिरीयारण्यक

भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।
स्थि॒रैरङ्गै॑स्तुष्टु॒वाँ स॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।
स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।
स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ।
ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑

प्रपाठक १ अनुवाक १

भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।
स्थि॒रैरङ्गै॑स्तुष्टु॒वाँ स॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।
स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।
स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ।
आप॑मापाम॒पः सर्वाः॑ । अ॒स्माद॒स्मादि॒तोऽमुतः॑ १
अ॒ग्निर्वा॒युश्च॒ सूर्य॑श्च । स॒ह सं॑चस्क॒रर्द्धि॑या । वा॒य्वश्वा॑ रश्मि॒पत॑यः ।
मरी॑च्यात्मानो॒ अद्रु॑हः । दे॒वीर्भु॑वन॒सूव॑रीः । पु॒त्रव॒त्त्वाय॑ मे सुत ।
महानाम्नी॒र्महामा॒नाः । म॒ह॒सो मह॑स॒ः स्वः॑ । दे॒वीः पर्जन्य॒सूव॑रीः पु॒त्र॒व॒त्त्वाय॑ मे सुत २
अपाश्न्युष्णिमपा रक्षः । अपाश्न्युष्णिमपा रघम् । अपाघ्रामप चावर्त्तिम् ।
अप देवीरितो हित । वज्रं देवीरजीतांश्च । भुवनं देवसूवरीः ।
आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत । शिवा नः शंतमा भवन्तु ।
दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि ३
अमुतः सूतौषधयो द्वे च

अनुवाक २

स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलम् ।
सर्वैरेव विधास्यते । सूर्यो मरीचीमादत्ते । सर्वस्माद्भुवनादधि । तस्याः
पाकविशेषेण । स्मृतं कालविशेषणम् । नदीव प्रभवात्का चित् ।
अक्षय्यात्स्यन्दते यथा ४

Branch 26F: Āraṇyaka Taittirīya Āraṇyaka

Ending:

एतद्वै जरामयमग्निहोत्रँ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् इति

इति कृष्णयजुर्वेदीयतैत्तिरीयायके दशमप्रपाठके नारायणोपनिषदि चतुषष्टितमोऽनुवाकः ६४

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः । हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमः प्रपाठकः समाप्तः ॥

------------

अथ परिशिष्टम्

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ।

ॐ अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् ।

शुक्रेण ज्योतीँषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः इति

-----------

परमात्मा मे क्षुधेऽन्नमय पञ्चदशाग्नये स्वाहैकचत्वारिँशदो तद्ब्रह्म नव श्रद्धायां प्राणे निविष्टश्चतुर्विँशतिः श्रद्धायां दशाङ्गुष्ठमात्रऊ पुरुषो द्वे वाङ्ग आसन्नष्टौ वयः सुपर्णाः प्राणानां ग्रन्थिरसि द्वे द्वे नमो रुद्रायैकं त्वमग्ने द्युभिर्द्वे शिवेन मे संतिष्ठस्व सत्यं प्राजापत्यस्तस्यैवमेकमेकमशीतिः ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके परिशिष्टत्वेन संगृहीतो दशमः प्रपाठकः समाप्तः १० समाप्तमिदं सपरिशिष्टं तैत्तिरीयारण्यकम् ।

Reference: Abhyankarasastri, Kasinatha Vasudeva, *Kṛṣṇayajurvedīyaṃ Taittirīyāraṇyakam*, 2 vols., ( Punyakhyapattane: Ānandāśramasaṃstha, 1969).

## Branch 26G: Āraṇyaka Mādhyandinīya Āraṇyaka

Structure: The nine chapters of the Āraṇyaka Kāṇḍa of the Shatapatha Brāhmaṇa

Beginning:

ओम् । देवा ह वै सत्रं निषेदुः । अग्निरिन्द्रः सोमो मखो विष्णुर्विश्वे देवा अन्यत्रैवाश्विभ्याम् १ तेषां कुरुक्षेत्रं देवयजनमास । तस्मादाहुः कुरुक्षेत्रं देवानां देवयजनमिति तस्माद्यत्र क्व च कुरुक्षेत्रस्य निगछति तदेव मन्यतऽइदं देवयजनमिति तद्धि देवानां देवयजनम् २ तऽआसत । श्रियं गछेम यशः स्यामान्नादाः स्यामेति तथोऽएवेमे सत्त्रमासते श्रियं गछेम यशः स्यामान्नादाः स्यामेति ३ ते होचुः । यो नः श्रमेण तपसा श्रद्धया यज्ञेनाहुतिभिर्यज्ञस्योदृचं पूर्वोऽवगछात्स नः श्रेष्ठोऽसत्तदु नः सर्वेषाँ सहेति तथेति ४ तद्विष्णुः प्रथमः प्राप । स देवाना॰ श्रेष्ठोऽभवत्तस्मादाहुर्विष्णुर्देवाना॰ श्रेष्ठ इति ५ स यः स विष्णुर्यज्ञः स । स यः स यज्ञोऽसौ स आदित्यस्तद्धेदं यशो विष्णुर्न शशाक संयन्तुं तदिदमप्येतर्हि नैव सर्व इव यशः शक्नोति संयन्तुम् ६ स तिसृधन्वमादायापचक्राम । स धनुरार्त्न्या शिर उपस्तभ्य तस्थौ तं देवा अनभिधृष्णुवन्तः समन्तं परिण्यविशन्त ७ ता ह वम्र्य ऊचुः । इमा वै वम्र्यो यदुपदीका योऽस्यऽयामप्यद्यात्किमस्मै प्रयछेतेत्यन्नाद्यमस्मै प्रयछेमापि धन्वन्नपोऽधिगछेत्तथास्मै सर्वमन्नाद्यं प्रयछेमेति तथेति ८ तस्योपपरासृत्य । ज्यामपिजक्षुस्तस्यां छिन्नायां धनुरार्त्न्यौ विष्फुरन्त्यौ विष्णोः शिरः प्रचिछिदतुः ९ तद्घृङ्ङिति पपात । तत्पतित्वासावादित्योऽभवदथेतरः प्राङेव प्रावृज्यत तद्यद्घृङ्ङित्यपतत्तस्माद्घर्मोऽथ यत्प्रावृज्यत तस्मात्प्रवर्ग्यः १० ते देवा अब्रुवन् । महान्बत नो वीरोऽपादीति तस्मान्महावीरस्तस्य यो रसो व्यक्षरत्तं पाणिभिः संममृजुस्तस्मात्संम्राट् ११ तं देवा अभ्यमृज्यन्त । यथा वित्तिं वेत्स्यमाना एवं तमिन्द्रः प्रथमः प्राप तमन्वङ्गमनुन्यपद्यत तं पर्यगृह्णात्तं परिगृह्येदं यशोऽभवद्यदिदमिन्द्रो यशो यशो ह भवति य एवं वेद १२ स उ एव मखः स विष्णुः । तत इन्द्रो मखवानभवन्मखवान्ह वै तं मघवानित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः १३ ताभ्यो वम्रीभ्योऽन्नाद्यं प्रायछन् । आपो वै सर्वमन्नं ताभिर्हीदमभिक्नूयमिवादन्ति यदिदं किम्वदन्ति १४ अथेमं विष्णुं यज्ञं त्रेधा व्यभजन्त । वसवः प्रातः सवन॰ रुद्रा माध्यन्दिन॰ सवनमादित्यास्तृतीयसवनम् १५ अग्निः प्रातःसवनम् इन्द्रो माध्यन्दिन॰ सवनं

Branch 26G: Āraṇyaka Mādhyandinīya Āraṇyaka

Ending:

अथ वꣳशः । तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्र वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो बाडेयीपुत्राद्बाडेयीपुत्रो मौषेकीपुत्रान्मौषिकीपुत्रो हारिकर्णीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राछौनकीपुत्रः ३० काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौत्सीपुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रो शालङ्कायनीपुत्राछालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राछौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्रः ३१ आलम्बीपुत्रात् । आलम्बीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राछाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतोपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ३२ प्राश्नीपुत्रात् । आसुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरियीज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाज्ञश्रवसो वाज्ञश्रवा ज्ह्विावतो बाध्यागाज्जिह्वावा बाध्योगोऽसिताद्वार्षगणादसिती वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाछिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ३३ ब्राह्मणम् ५ ॥

इति माध्यन्दिनीये शतपथब्राह्मणऽउपनिषन्नाम चतुर्दशं काण्डं समाप्तम् १४

Reference: Caland, W., and Vira, Raghu, *The Śatapatha Brāhmaṇa in the Kāṇvīya Recension*, (Delhi: Motilal Banarsidass, 1998).

## Branch 26H: Āraṇyaka          Kāṭha Āraṇyaka

Structure: Fragmentary work: 240 prose passages.

Beginning:

कठारण्यक          युञ्जते ब्राह्मण

युञ्जते मन इत्याहवनीये जुहोति । मनसा वै प्रजापतिर्यज्ञमतनुत । ततो
वाचा ततः कर्मणा । मनसैवैतद्यजमानो यज्ञं वितत्य । ततो वाचा । ततः
कर्मणा करोति १ देवस्य वस्सवितुः प्रसव इत्यभ्रीरादत्ते । सवितृप्रसूत
एवैना देवताभिरादत्ते । चतस्र आदत्ते । चतस्रो वै दिशो । दिग्भ्यः
प्रवर्ग्यस्सम्भ्रियते । दिग्भ्य एव प्रवर्ग्यँ सम्भरति । वानस्पत्या भवन्ति ।
वनस्पतिभिर्वै प्रवर्ग्यस्सम्भ्रियते । वनस्पतिभिरेव प्रवर्ग्यँ सम्भरति २
उत्तिष्ठ ब्रह्मणस्पत इत्युत्तिष्ठति । बृहस्पतिर्वै ब्रह्मणस्पतिर् । बृहस्पतिरेव
भूत्वोत्तिष्ठति ३ उपप्रयन्तु मरुतस्सुदानव इति । सुदानवो वै मरुत आरण्या
। अरण्ये प्रवर्ग्यस्सम्भ्रियते । अरण्य एवारण्यं करोति ४ प्रैतु
ब्रह्मणस्पतिरिति प्रतितिष्ठति । बृहस्पतिर्वै ब्रह्मणस्पतिर् । बृहस्पतिरेव
भूत्वा । प्रतितिष्ठति ५ आ देव्येतु सूनृतेति । वाग्वै देवी सूनृता । वाचा
प्रवर्ग्यस्सम्भ्रियते । वाचैव प्रवर्ग्यँ सम्भरति ६ अच्छा वीरं नर्यं
पङ्क्तिराधसमिति । यज्ञो वै वीरो नर्यः पङ्क्तिराधा । देवेभ्य एव यज्ञँ सम्भरति
७ देवी द्यावापृथिवी देवयजनेऽनु मे मंसाथामितीमे वै महावीरात्
सम्भ्रियमाणादबिभीताम् । तेजसा ना उद्धक्ष्यतीति । स बृहस्पतिरब्रवीद्
। युवयोर्भागधेयमिति । तत एनमन्वमन्यताम् ८ ऋतस्य ध्र्यासमद्य
मखस्य शिर इति सम्भरति । यज्ञस्यैव शिरस्सम्भरति । त्रिर्हरति ।
त्रिषत्या हि देवास् । समन्तमभ्रीः परिश्रयति । रक्षसाम्पराणुत्त्यै ।
प्रजापतेर्वै प्रजास्सिसृक्षमाणस्य तस्य तेजो यज्ञियमपाक्रामत् ।
तदिमाम्प्राविशत् । तद्वराहो भूत्वान्वविन्दद् ९ इत्यत्यग्र आसीरिति ।
यद्वराहविहतम्भवत्यस्या एव तेजो यज्ञियँ सम्भरति १० देवीर्वम्रियोऽस्य
भूतस्य प्रथमजा इति । वम्रियो वा अस्य भूतस्य प्रथमजास् । ता वा
एतद्विदुर्यत्रास्या जीवं यज्ञियं । यद्वल्मीकवापनाँ सम्भरत्यस्या एव जीवं
यज्ञियँ सम्भरतीन्द्रो वै यद्वृत्रमहंस्तस्यौजो वीर्यमपाक्रामत् । तदोषधीः
प्राविशत् । ते पूतीका अभवन्न् ११ इन्द्रस्यौजोऽसीति । यत्पूतीकानाँ

Branch 26H: Āraṇyaka Kāṭha Āraṇyaka

Ending:

सर्वमायुरेति । सैव तत्र प्रायश्चित्तिस् । तमो वा एतस्य यज्ञं युवते यस्य महावीरे प्रवृज्यमाने सूर्योऽस्तमेति । स आर्तिं यजमान आर्श्छति २३७ उदु त्यं जातवेदसं चित्रं देवानामुदगादिति द्वाभ्यां जुहुयाद् । असौ वा आदित्यो रुद्रो महावीरस् । स्वेनैवैनम्भागधेयेन शमयति । सर्वमायुरेति । सैव तत्र प्रायश्चित्ति --- --- सैव तत्र प्रायश्चित्ती । रुद्रो वा एतस्य पशूनभिमन्यते यस्य महावीरे प्रवृज्यमाने घर्मधुङ निषीदति । ता --- २३८ यस्माद्भीषा निषीदसि ततो नो अभयङ्कृधि । अभयन्नः पशुभ्यो नमो रुद्राय मीढुष इति द्वाभ्यां जुहुयाद् । अग्निर्वै रुद्रस् । स्वेनैवैनम्भागधेयेन प्रशत शमयति । सर्वमायुरेति । सैव तत्र प्रायश्चित्तिर् । मृत्युर्वा एतस्य प्रजा अभिमन्यते यस्य महावीरे प्रवृज्यमाने वयांसि श्वापदानि वापिधावन्त २३९ असृन्मुखो वि गा इवेति द्वाभ्यां जुहुयान् । मृत्युर्वै यमस् । स्वेनैवैनम्भागधेयेन प्रशत शमयति --- --- आत्मनोऽहिँसायै । --- प्रवर्ग्येण प्रचरिषून्न् दीक्षितस्य --- --- प्रवर्ग्यँ सम्भरति । अजिने सम्भरत्यग्निर्वा --- --- सम्भरति शर्कराभिर्धृत्या अर्म्यैः कपालैर्--- --- --- औदुम्बरासन्दी भवति । ऊर्ध्वा उदुम्बर ऊर्जैवैनाण् दाधार । मौञ्जाविवाना भवति । ऊर्ग्वै मुञ्जा । ऊर्जैवैनां दाधार । प्रादेशमात्रपादा भवति । एतावद्धिमे २३९-१ वि प्राणा --- ऐनान्दाधार । कृष्णाजिनमास्तृणाति । कृष्णाजिनेन प्रश्छादयति । ब्रहम वा एतद्रूपं यत्कृष्णाजिनम् । ब्रह्मणैवैनां दाधार । प्रागुदग्गार्हपत्यात्खरं करोत्युदञ्चौ परौ खरौ करोति । अयं वै लोको गार्हपत्योऽसा आहवनीयो गार्हपत्ये हुतँ स्वर्गं लोकं गमयति । --- ति । तद्बहिष्टात्--- द्वाराण्यपिधाय प्रवर्ग्येण प्रचरति --- णयाथो पापवसीयसस्य व्यावृत्यै --- असौ वा आदित्यो रुद्रो महावीर ---

इति घर्माजठराब्राह्मणं समाप्तम् इति शुक्रियब्राह्मणं समाप्तम् २४०

Reference: Witzel, Michael, *Das Kaṭha Āraṇyaka. Textkritische Edition mit Uebersetzung und Kommentar*, Teildruck. Diss. erlangen 1972.

## Branch 27A: Brāhmaṇa Gopatha Brāhmaṇa

Structure: Six Prapāṭhakas

Beginning:

गोपथब्राह्मणपूर्व्वभागे । प्रथमः प्रपाठकः ।

ओं ब्रह्म ह वा इदमग्र आसीत् स्वयन्त्वेकमेव तदैक्षत महद्वैयक्षं तदेकमेवास्मि हन्ताहं मदेव मन्मात्रं द्वितीयं देवं निर्मम इति तदभ्यश्राम्यदभ्यतपत् तस्य श्रान्तस्य तप्तस्य सन्तप्तस्य ललाटे स्नेहो यदार्द्र्यमाजायत तेनानन्दत्तमब्रवीत् महद्वै यक्षं सुवेदमविदामह इति । तद्यदब्रवीत् महद्वैयक्षं सुवेदमविदामह इति तस्मात् सुवेदोऽभवत्तं वा एतं सुवेदं सन्तं स्वेद इत्याचक्षते । परोक्षेण परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः १

स भूयोऽश्राम्यद्भूयोऽतप्यद् भूय आत्मानं समतपत् । तस्य श्रान्तस्य तप्तस्य संतप्तस्य सर्वेभ्यो रोमगर्तेभ्यः पृथक् स्वेदधाराः प्रास्यन्दन्त । ताभिरनन्दत् । तदब्रवीत्--आभिर्वा अहमिदं सर्वं धारयिष्यामि यदिदं किं च आभिर्वा अहमिदं सर्वं जनयिष्यामि यदिदं किं च आभिर्वा अहमिदं सर्वमाप्स्यामि यदिदं किं चेति । तद्यदब्रवीत्--आभिर्वा अहमिदं सर्वं धारयिष्यामि यदिदं किं चेति तस्माद्धारा अभवन् । तद्धाराणां धारात्वं यच्चासु ध्रियते । तद्यदब्रवीत्--आभिर्वा अहमिदं सर्वं जनयिष्यामि यदिदं किं चेति तस्माज्जाया अभवन् । तज्जायानां जायात्वं यच्चासु पुरुषो जायते यच्च प्पुत्रः । पुन्नाम नरकमनेकशततारं तस्मात्त्रातीति पुत्रः । तत् पुत्रस्य पुत्रत्वम् । तद्यदब्रवीत्--आभिर्वा अहमिदं सर्वमाप्स्यामि यदिदं किं चेति तस्मादापोऽभवन् । तदपामप्त्वम् । आप्नोति वै स सर्वान् कामान् यान् कामयते य एवं वेद २

ता अपः सृष्ट्वान्वैक्षत । तासु स्वां छायामपश्यत् । तामस्येक्षमाणस्य स्वयं रेतोऽस्कन्दत् । तदप्सु प्रत्यतिष्ठत् । तास्तत्रैवाभ्यश्राम्यदभ्यतल्पत्समतपत् । ताः श्रान्तास्तप्ताः संतप्ताः सार्धमेव रेतसा द्वैधमभवन् । तासामन्यतरा अतिलवणा अपेया अस्वाद्व्यः । ता अशान्ता रेतः समुद्रं वृत्त्वातिष्ठन् । अथेतराः पेयाः स्वाद्व्यः शान्ताः । तास्तत्रैवाभ्यश्राम्यदभ्यतपत्समतपत् । ताभ्यः श्रान्ताभ्यस्तप्ताभ्यः संतप्ताभ्यो यद्रेत आसीत्तदभृज्ज्यत । यदभृज्ज्यत

Branch 27A: Brāhmaṇa Gopatha Brāhmaṇa

Ending:

तद्देवपवित्रेणैव वाचं पुनीते । सा वा अनुष्टुब्भवति । वाग्वा अनुष्टुप् । तत्स्वेनैव छन्दसा वाचं पुनीते । तामर्धर्चशः शंसति प्रतिष्ठित्या एव । अथ पावमानीः शंसति । पवित्रं वै पावमान्यः । इयं वागाहनस्यां वाचमवादीत् । तत् पावमानीभिरेव वाचं पुनीते । ताः सर्वा अनुष्टुभो भवन्ति । वाग्वा अनुष्टुप् । तत्स्वेनैव छन्दसा वाचं पुनीते । ता अर्धर्चशः शंसति प्रतिष्ठित्या एव । अव द्रप्सो अंशुमतीमतिष्ठदित्येतं तृचमैन्द्राबार्हस्पत्यं सूक्तं शंसति । अथ हैतदुत्सृष्टम् । तद्यदेतं तृचमैन्द्राबार्हस्पत्यमन्त्यं तृचमैन्द्राजागतं शंसति सवनधारणमिदं गुल्मह इति वदन्तः । तदु तथा न कुर्यात् । त्रिष्टुबायतना वा इयं वागेषां होत्रकाणां यदैन्द्राबार्हस्पत्या तृतीयसवने । तद्यदेतं तृचमैन्द्राबार्हस्पत्यमन्त्यं तृचमैन्द्राजागतं शंसति स्व एवैनं तदायतने प्रीणाति स्वयोर्देवतयोः । कामं नित्यमेव परिदध्यात्कामं तृचस्योत्तमया । तदाहुः--संशंसेत् षष्ठेऽहनि न संशंसेत् । कथमन्येष्वहःसु संशंसति कथमत्र न संशंसतीति अथो खल्वाहुः--नैव संशंसेत् । स्वर्गो वै लोकः षष्ठमहः । असमायी वै स्वर्गो लोकः । कश्चिद्वै स्वर्गे लोके शमयतीति । तस्माद्न संशंसति । यदेव न संशंसति तत्स्वर्गस्य लोकस्य रूपम् । यद्वेवैनाः संशंसति यद्नाभानेदिष्ठो वालखिल्यो वृषाकपिरेवयामरुदेतानि वा अत्रोक्थानि भवन्ति तस्माद्न संशंसति । ऐन्द्रो वृषाकपिः । सर्वाणि छन्दांस्यैतशप्रलापः । उपाप्तो यदैन्द्राबार्हस्पत्या तृतीयसवने तद्यदेतं तृचमैन्द्राबार्हस्पत्यं सूक्तं शंसति ऐन्द्राबार्हस्पत्या परिधानीया--विशो अदेवीरभ्याचरन्तीः इति । अपरजना ह वै विशो अदेवोः न ह्यस्यापरजनं भयं भवति शान्ताः प्रजाः क्लृप्ताः सहन्ते यत्रैवंविदं शंसति यत्रैवंविदं शंसतीति ब्राह्मणम् १६

इत्यथर्ववेदोत्तरगोपथब्राह्मणस्य षष्ठः प्रपाठकः समाप्तः ६

समाप्तश्चायं ग्रन्थः ॥

Reference: Mitra, Rajendra Lal, *Gopath Brahmana*, (Delhi: Indological Book House, 1972) originally published as part of Bibliotheca Indica.

## Branch 27B: Brāhmaṇa Vaṃśha Brāhmaṇa

Structure: Three *Khaṇḍas*

Beginning:

वंशब्राह्मण

नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नम वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय च १ उपजायत शर्वदत्ता- द्गार्ग्याच्छार्वदत्तो गार्ग्यः २ शर्वदत्तो गार्ग्यो रुद्रभूतेर्द्राह्यायणात् ३ रुद्रभूति- र्द्राह्यायणस्त्रातादैषुमात् ४ त्रात एषुमतो निगडात् पार्णवल्केः ५ निगडः पार्णवल्किः गिरिशर्मणः काण्ठेविद्धेः ६ गिरिशर्मा काण्ठेविद्धिर्ब्रह्म- वृद्धेश्छन्दोगमाहकेः ७ ब्रह्मवृद्धिश्छन्दोगमाहकिर्मित्रवर्चसः स्थैरकायनात् ८ मित्रवर्चाः स्थैरकायनः सुप्रतीतादौलुन्द्यात् ९ सुप्रतीत औलुन्द्यो बृहस्पति- गुप्ताच्छायस्थेः १० बृहस्पतिगुप्तः शायस्थिर्भवत्राताच्छायस्थेः ११ भवत्रातः शायस्थिः कुस्तुकाच्छार्कराक्ष्यात् १२ कुस्तुकः शार्कराक्ष्यः श्रवणदत्ता- त्कौहलात् १३ श्रवणदत्तः कौहलः सुशारदाच्छालङ्कायनात् १४ सुशारदः शालङ्कायन ऊर्जयत औपमन्यवात् १५ ऊर्जयन्नौपमन्यवो भानुमत औप- मन्यवात् १६ भानुमानौपमन्यव आनन्दजाच्चान्धनायनात् १७ आनन्दजश्चा- न्धनायनः शाम्बाच्छार्कराक्ष्यात्काम्बोजाच्चोपमन्यवात् १८ शाम्बः शार्क- राक्ष्यः काम्बोजश्चौपमन्यवो मद्रकाराच्छौङ्गायनेः १९ मद्रकारः शौङ्गायनिः स्वातेरौष्ट्राक्षेः २० स्वातिरौष्ट्राक्षिः सुश्रवसो वार्षगण्यात् २१ सुश्रवा वार्ष- गण्यः प्रातरह्नात्कौहलात् २२ प्रातरह्नः कौहलः केतोर्वाद्यात् २३ केतुर्वाद्यो मित्रविन्दात्कौहलात् २४ मित्रविन्दः कौहलः सुनीथात्कापटवात् २५ सु- नीथः कापटवः सुतेमनसः शाण्डिल्यायनात् २६ सुतेमनाः शाण्डिल्या- यनोऽँशोर्धानंजय्यात् २७ १

अंशुर्धाञ्जय्योऽमवास्याच्छाण्डिल्यायनाद्राधाच्च गौतमात् १ राधो गौतमो गातुर्गौतमात् पितुः २ गाता गौतमः संवर्गजितो लामकायनात् ३ संवर्ग- जिल्लामकायनः शाकदासाद्भाडितायनात् ४ शाकदासो भाडितायनो वि- चक्षणात्ताण्ड्यात् ५ विचक्षणस्ताण्ड्यो गर्दभीमुखाच्छाण्डिल्यायनात् ६ गर्दभीसुखः शाण्डिल्यायनः उदरशाण्डिल्यात्पितुः ७ उदरशाण्डिल्यो- ऽतिधन्वनश्च शौनकान्मशकाच्च गार्ग्यात् ८ मशको गार्ग्यः स्थिरकात्

Branch 27B: Brāhmaṇa Vaṃśha Brāhmaṇa

Ending:

राजन्यः सुमन्त्राद्बाभ्रवाद्गौतमात् १२ सुमन्त्रो बाभ्रवो गौतमः शूषाद्वाह्नेया-द्भारद्वाजात् १३ शुषो वाह्नेभ्यो भारद्वाजोऽरालाद्दार्तेयाच्छौनकात् १४ अरा-लो दर्तेयः शौनको दृतैरैन्द्रोताच्छौनकात्पितुः १५ दृतिरैन्द्रोतः शौनक इन्द्रो-ताच्छौनकात्पितुरेव १६ इन्द्रोतः शौनको वृषशुष्माद्वातावतात् १७ वृष-शुष्मो वातावतो निकोथकाद्भायजात्यात् १८ निकोथको भायजात्यः प्रति-थेर्देवतरथात् १९ प्रतिथिर्देवतरथो देवतरसः शावसायनात्पितुः २० देव-तराः शावसायनः शवसः पितुरेव २१ शवा अग्निभुवः काश्यपात् २२ अग्निभूः काश्यप इन्द्रभुवः काश्यपात् २३ इन्द्रभूः काश्यपो मित्रभुवः काश्यपात् २४ मित्रभूः काश्यपो विभुण्डकात्काश्यपात्पितुः २५ विभ-ण्डकः काश्यप ऋष्यशृङ्गात्काश्यपात्पितुः २६ ऋष्यशृङ्गः काश्यपः काश्य-पात्पितुरेव २७ कश्यपोऽग्नेः २८ अग्निरिन्द्रात् २९ इन्द्रो वायोः ३० वायु-र्मृत्योः ३१ मृत्युः प्रजापतेः ३२ प्रजापतिर्ब्रह्मणः ३३ ब्रह्मा स्वयम्भूः ३४ तस्मै नमस्तस्मै नमः ३५ २

आचार्येभ्यो नमस्कृत्वाथ वंशस्य कीर्तयेत्
स्वधा पूर्वेषां भवति नेतायुर्दीर्घमश्नुते

इत्युक्त्वानुक्रामेद्वंशमा ब्रह्मणः १ नयन्नर्यमभूतेः कालबवात् २ अर्यमभू-तिः कालबवः भद्रशर्मणः कौशिकात् ३ भद्रशर्मा कौशिकः पुष्पयशस औदव्रजेः ४ पुष्पयशा औदव्रजिः संकराद्गौतमात् ५ संकरो गौतमोऽर्य-मराधाच्च गोभिलात्पूष्मित्राच्च गोभिलात् ६ पूषामित्रो गोभिलोऽश्वमित्रा-द्गोभिलात् ७ अश्वमित्रो गोभिलो वरुणमित्राद्गोभिलात् ८ वरुणमित्रो गोभिलो मूलमित्राद्गोभिलात् ९ मूलमित्रो गोभिलो वत्समित्राद्गोभिलात् १० वत्समित्रो गोभिलो गौल्गुलवीपुत्राद्गोभिलात् ११ गौल्गुलवीपुत्रो गोभिलो बृहद्वसोः पितुः १२ बृहद्वसुर्गोभिलो गोभिलादेव १३ गोभिलो राधाच्च गौतमात् १४ समानं परं समानं परम् १५ ३

Reference: *Vaṃśa Brāhmaṇa*, (Calcutta: Indian Research Institute, 1985).

## Branch 27C: Brāhmaṇa Śhatapatha Brāhmaṇa (Mādhyandina)
Structure: 100 Chapters
Beginning:

ओम् । नमो गणेशाय ॥ व्रतमुपैष्यन् । अन्तरेणाहवनीयं च गार्हपत्यं च प्राङ्तिष्ठन्नप उपस्पृशति तद्यदप उपस्पृशत्यमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा व्रतमुपायानीति पवित्रं वाऽआपः पवित्रपूतो व्रतमुपायानीति तस्माद्वाऽअप उपस्पृशति १ सोऽग्निमेवाभी-क्षमाणो व्रतमुपैति । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामि-त्यग्निर्वै देवानां व्रतपतिस्तस्माऽएवैतत्प्राह व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामिति नात्र तिरोहितमिवास्ति २ अथ सꣳस्थिते विसृजते । अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधीत्यशकद्ध्येतद्यो यज्ञस्य सꣳस्थामग-न्नराधि ह्यस्मै यो यज्ञस्य सꣳस्थामगन्नेतेन न्वेव भूयिष्ठा इव व्रतमुपयन्त्यनेन त्वेवोपेयात् ३ द्वयं वाऽइदं न तृतीयमस्ति । सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्या इदमहमनृतात्सत्यमुपैमीति तन्मनुष्येभ्यो देवानुपैति ४ स वै सत्यमेव वदेत् । एतद्धवै देवा व्रतं चरन्ति यत्सत्यं तस्मात्ते यशो यशो ह भवति य एवं विद्वांत्सत्यं वदति ५ अथ सꣳस्थिते विसृजते । इदमहं य एवास्मि सोऽस्मीत्यमानुषः इव वाऽएतद्भवति यद्व्रतमुपैति न हि तदवकल्पते यद्ब्रूयादिदमहꣳ सत्यादनृतमुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिदमहं य एवास्मि सोऽस्मीत्येवं व्रतं विसृजेत ६ अथातो-ऽशनानशनस्यैव । तदुहाषाढः सावयसो ऽनशनमेव व्रतं मेने मनो ह वै देवा मनुष्यस्याजानन्ति तऽएनमेतद्व्रत्तमुपयन्तं विदुः प्रातर्नो यक्ष्यतऽइति ते स्य विश्वे देवा गृहानागछन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः ७ तन्वे-वानवक्लृप्तम् । यो मनुष्येष्वनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेष्वन-श्नत्सु पूर्वोऽश्नीयात्तस्मादु नैवाश्नीयात् ८ तदु होवाच याज्ञवल्क्यः । यदि नाश्नाति पितृदेवत्यो भवति यद्युऽअश्नाति देवानत्यश्नातीति स यदेवाशितमनशितं तदश्नीयादिति यस्य वै हविर्न हृह्णन्ति तदशितमनशितꣳ स यदश्नाति तेनापितृदेवत्यो भवति यद्यु तदश्नाति यस्य हविर्न गृह्णन्ति तेनो देवान्नात्यश्नाति ९ स वाऽआरण्यमेवाश्नीयात् । या वारण्या ओषधयो यद्वा वृक्ष्यं तदु ह स्माहापि बर्कुर्वार्ष्णो माषान्मे पचत न वाऽएतेषाꣳ

Branch 27C: Brāhmaṇa Śhatapatha Brāhmaṇa

Ending:

अथ वꣳशः । तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्र वात्सीमाण्डवीपुत्रा-
द्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराश-
रीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गी-
पुत्रो बाडेयीपुत्राद्बाडेयीपुत्रो मौषेकीपुत्रान्मौषिकीपुत्रो हारिकर्णीपुत्राद्धारिक-
र्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः
३० काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीआलाक्यामाठरीपुत्रः कौत्सी-
पुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रो शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्पग-
णीपुत्राद्वार्पगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्रा-
द्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरी-
पुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः
शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्रः ३१ आलम्बीपुत्रात् । आल-
म्बीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डू-
कायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्रा-
च्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ
वैदभृतोपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राची-
नयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ३२
प्राश्नीपुत्रात् । आसुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरा-
सुरियीज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः
कुश्रेः कुश्रिर्वाज्ञश्रवसो वाज्ञश्रवा ज्ञिह्वावतो बाध्यागाज्जिह्वावा बाध्योगो-
ऽसिताद्वार्षगणादसिती वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पा-
त्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या
अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञव-
ल्क्येनाख्यायन्ते ३३ ब्राह्मणम् ५ ॥

इति माध्यन्दिनीये शतपथब्राह्मणऽउपनिषन्नाम चतुर्दशं काण्डं समाप्तम्

Reference: Weber, Albrecht, *The Śatapatha-Brāhmaṇa in the Mādhyandina-Śākhā with extracts from the commentaries of Sāyana, Harisvāmin, and Dvivedagañga,* (Varanasi: Chowkhamba Sanskrit Series Office, 1964).

## Branch 27D: Brāhmaṇa Tāṇḍya Pañcaviṃśha Brāhmaṇa

Structure: 25 Chapters

Beginning:

ताण्ड्यमहाब्राह्मणम् । प्रथमोऽध्याये । प्रथमः खण्डः ।
ॐ महन्मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचो भुक्तिं मे
वोचः सर्वं मे वोचस्तन्मावतु तन्माविशतु तेन भुक्षिषीय १ देवो देवमेतु
सोमः सोममेत्वृतस्य पथा २ विहाय दौष्कृत्यम् ३ बद्वानामासि सृतिः
सोमसरणी सोमं गमेयम् ४ पितरो भूः पितरो भूः पितरो भूः ५ नृमण
ऊर्द्ध्वभरसं त्वोर्द्ध्वभरा दृशेयम् ६ मृदा शिथिरा देवानां तीर्थं वेदिरसि
मा मा हिंसीः ७ विष्णोः शिरोसि यशोधा यशो मयि धेहि ८ इष ऊर्ज्ज
आयुषे वर्च्चसे च ९ इति ताण्ड्यब्राह्मणे प्रथमाध्यायस्य प्रथमखण्डः

अथ द्वितीयः खण्डः

युनज्मि ते पृथिवीमग्निना सह युनज्मि वाचं सह सूर्य्येण युक्तो
वातोन्तरिक्षेण ते सह युक्तास्तिस्रो विमृजः सूर्य्यस्य १ ऋतस्य सदने
सीदामि २ ऋतपात्रमसि ३ वानस्पत्योसि बार्हस्पत्योसि प्राजापत्योसि
प्रजापतेर्मूर्द्धास्यत्यायुपात्रमसीदमहं मां प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्च्चसाय ४
मरुतो नपातोऽपङ्ग्याः पर्वतानाङ्ककुभः श्येना अजिरा एन्द्रं वग्नुना बहत
घोषेणामीवां चातयध्वं युक्तास्थ वहत ५ इदमहममुं यजमानं
पशुष्वध्यूहामि पशुषु च मां ब्रह्मवर्चसे च ६ वसवस्त्वा गायत्रेण छन्दसा
सम्मृजन्तु रुद्रास्त्वा त्रैष्टुभेन छन्दसा संमृजन्त्वादित्यास्त्वा जागतेन छन्दसा
संमृजन्तु ७ पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्य्येषि विश्वतो
तप्ततनूने तदामो अश्नुते शृतास इद्वहन्तः सन्तदाशतः ८ प्रशुक्रैतु देवी
मनीषाम्मद्रथः सुतष्टो न वाज्यायुषे मे पवस्व वर्चसे मे पवस्व विदुः
पृथिव्या दिवो जनित्राच्छृण्वन्त्वापोधः क्षरन्तीः सोमेहोद्गाय ममायुषे मम
ब्रह्मवर्चसाय यजमानस्पर्द्धया अमुष्य राज्याय ९ इति द्वितीयखण्डः

अथ तृतीयः खण्डः

बेकुरानामासि जुष्टा देवेभ्यो नमो वाच नमो वाचस्पतये देवि वाग्यत्ते
वाचो मधुमत्तस्मिन्माधाः सरस्वत्यै स्वाहा १ सूर्य्यो मा दिव्याभ्यो
नाष्ट्राभ्यः पातु वायुरन्तरिक्षाभ्यो ग्निः पार्थिबाभ्यः स्वाहा २ योऽद्य सौम्यो

Branch 27D: Brāhmaṇa Tāṇḍya Pañcaviṃśa Brāhmaṇa

Ending:

ते सहस्रंᳫं सहस्रं पुत्रान् पुष्यन्ति य एतदुपयन्ति ३ इति षोडशः खण्डः

सप्तदशः खण्डः

अतिरात्रः सहस्रं त्रिवृतः सम्वत्सरा अतिरात्रः प्रजापतेः सहस्रसंवत्सरम् १ एतेन वै प्रजापतिः सर्वस्य प्रसवमगच्छत्सर्वस्य प्रसवं गच्छन्ति य एतदुपयन्ति २ एतद्वै प्रजापतिर्जीर्य्या मूर उपैत्तेन जरामपाहताऽप जरां घ्नते य एतदुपयन्ति ३ तदेतत्प्रजापतेः सहस्रसंवत्सरमेतेन वै प्रजापतिः सर्वामृद्धिमार्ध्नोत् सर्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ४ इति सप्तदशः खण्डः

अष्टादशः खण्डः

पञ्च पञ्चाशतस्त्रिवृतः संवत्सराः पञ्च पञ्चाशतः पञ्चदशा पञ्च पञ्चाशतः सप्तदशाः पञ्च पञ्चाशत एकविᳫंशा विश्वसृजाᳫं सहस्रसम्वत्सरम् १ एतेन वै विश्वसृज इदं विश्वमसृजन्त यद्विश्वमसृजन्त तस्माद्विश्वसृजः २ विश्वमेनाननु प्रजायते य एतदुपयन्ति ३ तपो गृहपतिर्ब्रह्म ब्रह्मेरापत्न्यमृतमुद्गाता भूतं प्रस्तोता भविष्यत्प्रतिहर्त्तर्त्तव उपगातार आर्त्तवाः सदस्याः सत्यᳫं होतर्त्तं मैत्रावरुण ओजो ब्राह्मणाच्छᳫंसी त्विषिश्चाऽपचितिश्च नेष्टापोतारौ यशोऽच्छावाकोऽग्निरेवाऽग्नीद्भगो ग्रावस्तुदूर्गुन्नेता वाक्सुब्रह्मण्यः ह्प्राणोऽध्वर्युरपानः प्रतिप्रस्थाता दिष्टिर्विशास्ता बलं ध्रुवगोपमाशाहविष्येष्यहोरात्राविध्मवाहौ मृत्युः शमितैते दीक्षन्ते ४ तदेष श्लोको विश्वसृजः प्रथमे सत्रमासत सहस्रसमं प्रसुतेन यन्तस्ते ह जज्ञे भुवनस्य गोपा हिरण्मयः शकुनो ब्रह्मनामेति ५ ब्रह्मणः सलोकताᳫं सार्ष्टिताᳫं सायुज्यं गच्छन्ति य एतदुपयन्ति ६ तदे-तद्विश्वसृजाᳫं सहस्रसंवत्सरमेतेन वै विश्वसृजः सर्वामृद्धिमार्ध्नुवन् सर्वामृद्धिमृध्नुवन्ति य एतदुपयन्ति ७ पञ्चविंशोऽध्यायस्सम्पूर्णः । सम्पूर्णमिदं ताण्ड्यमहाब्राह्मणम् ।

Reference: Śāstrī, A. Cinnaswāmī, and Śāstrī, Paṭṭābhirāma, *Tāṇḍyamahābrāhmaṇa belonging to the Sāma Veda, with the commentary of Sāyaṇāchārya*, 2 vols., (Varanasi: Chaukhambha Sanskrit Sansthan, 1987).

## Branch 27E: Brāhmaṇa Chhāndogya Brāhmaṇa

Structure: Two Prapāṭhakas

Beginning:

छान्दोग्य-ब्राह्मण

देव सवितः प्रसुव यज्ञं
प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु
वाचस्पतिर्वाचं नः स्वदतु १
काम वेद ते नाम मदो नामासि
समानयामुँ सुरा ते अभवत् ।
परमत्र जन्माग्ने तपसो निर्मितोऽसि । स्वाहा २
इमं त उपस्थं मधुना सँसृजामि
प्रजापतेर्मुखमेतद्द्वितीयम् ।
तेन पुँसोऽभिभवासि सर्वान्
अवशान्वशिन्यसि राज्ञी । स्वाहा ३
अग्निं क्रव्यादमकृण्वन्गुहानाः
स्त्रीणामुपस्थमृषयः पुराणाः ।
तेनाज्यमकृण्वँस्त्रैशृण्गं त्वाष्ट्रं
त्वयि तद्दधातु । स्वाहा ४
या अकृण्तन्नवयन्या अतन्वत
याश्च देव्यो अन्तानभितोऽददन्त ।
तास्त्वा देव्यो जरसा सँव्ययन्त्व्
आयुष्मतीदं परिधत्स्व वासः ५
परिधत्त धत्त वाससैनाँ
शतायुषीं कृणुत दीर्घमायुः ।
शतं च जीव शरदः सुवर्चा
वसूनि चार्ये विभजासि जीवन् ६
सोमोऽददद्गन्धर्वाय
गन्धर्वोऽददग्नये ।

Branch 27E: Brāhmaṇa Chhāndogya Brāhmaṇa

Ending:

ततो मा राद्धिरागच्छतु ५
सव्यं पादमवनेनिजे
ऽस्मिन्राष्ट्रे श्रियं दधे ६
दक्षिणं पादमवनेनिजे
ऽस्मिन्राष्ट्रे श्रियमावेशयामि ७
पूर्वमन्यमपरमन्यमुभौ पादाववनेनिजे
राष्ट्रस्यर्द्ध्या अभयस्यावरुद्धयै ८
अन्नस्य राष्ट्रिरसि
राष्ट्रिरहं भूयासम् । ९
स्यशोऽसि यशो मयि धेहि १०
स्यशसो यशोऽसि ११
स्यशसो भक्षोऽसि
महसो भक्षोऽसि
श्रीभक्षोऽसि
श्रियं मयि धेहि । स्वाहा १२
स्मुञ्च गाँ वरुण पाशाद्
द्विषन्तं मेऽभिधेहि
तं जह्यमुष्य चोभयोर्
उत्सृज गामत्तु तृणानि पिबतूदकम् १३
स्माता रुद्रानां दुहिता वसूनाँ
स्वसादित्यानाममृतस्य नाभिः ।
प्र णु वोचं चिकितुषे जनाय
मा गामनागामदितिँ वधिष्ट
ओमुत्सृजत १४ ८ इति द्वितीयो भागः

Reference: Stoenner, 1. Heinrich, Das Mantrabrāhmaṇa, 1. Prapāṭhaka, Diss. Halle/Saale 1901; 2. Joergensen, Hans, Das Mantrabrāhmaṇa, 2. Prapāṭhaka, Diss. Kiel. Darmstadt 1911.

## Branch 27F: Brāhmaṇa Ārṣheya Brāhmaṇa

Structure: 5 Chapters

Beginning:

जैमिनीयार्षेयब्राह्मणम् । प्रथमोऽध्यायः । प्रथमः खण्डः ।
ओमित्येतत्परमेष्ठिनः प्राजापत्यस्य साम १ परमेष्ठिनो वा प्राजापत्यस्य ब्रह्मणो वा ब्रह्मवाचो वा सत्यं साम २ स्वर्गस्य वा लोकस्य द्वारविवरणम् । देवानां वौघः । त्रयस्य वा वेदस्याप्यायनम् । अयातयामाक्षरस्थं साम ३ वासिष्ठो हिंकारः । प्राजापत्यो वा गवां वा ४ अथात ऋषीणां नामधेयगोत्रोदाहरणम् । स्वर्ग्यं धन्यं पुण्यं पौत्रीयं पशव्यमायुष्यम् ५ प्राक्प्रातराशिकम् । तद्यदिदमुपधारयते । एकैकस्य ऋषेर्दिव्यं वर्षसहस्रमतिथिर्भवति । अभिनन्दितः प्रतिनन्दितो मानितः पूजितः । ततः स्वाध्यायफलमुपजीवतीति ६ तदप्येवमिव ब्राह्मणं भवति - यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणोक्तेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते प्र वा मीयते यातयामान्यस्य छन्दांसि भवन्ति । तस्मादेतानि मन्त्रे मन्त्रे विद्यात् । अयातयामान्यस्य छन्दांसि भवन्ति । य एवं वेद ७ इति प्रथमाध्याये प्रथमः खण्डः

द्वितीयः खण्डः आग्नेयं पर्व

गोतमस्य पर्कः । कश्यपस्य बर्हिषीयम् । गोतमस्य चैव पर्कः १ सौपर्णं च २ वैश्वमनसं चादित्यसाम वा ३ श्रौतर्षाणि त्रीणि ४ औशनं च शैरीषे च ५ इन्द्रस्य संवर्ग्यवार्त्रघ्ने द्वे ६ साकमश्वस्य शौनःशेपेः सामनी द्वे ७ वत्सस्य काण्वस्य सामनी द्वे ८ अग्नेश्च वैश्वानरस्यार्षेयम् ९ सुमित्रस्य च वाध्र्यश्वेः साम १० प्रथमाध्याये द्वितीयः खण्डः

तृतीयः खण्डः

अग्नेश्च संवर्ग्यः १ वैश्वमनसं च २ श्नभाश्नौष्टे च ३ वैश्वामित्रं च ४ अग्नेश्च जराबोधीये ५ मारुतं च ६ भार्गवे द्वे चाग्नेश्च वारवन्तीयम् ७ और्वस्य वैधारेः सामनी द्वे ८ अत्रेश्चासङ्गम् ९ प्रजापतेश्च निधनकामम् १० इति प्रथमाध्याये तृतीयः खण्डः

चतुर्थः खण्डः

सैन्धुक्षितानि त्रीणि १ अग्नेर्हरसी द्वे । इहवद्वामदेव्यं तृतीयम् २ यामे द्वे

Branch 27F: Brāhmaṇa Ārṣheya Brāhmaṇa

Ending:

प्रजापतेरुल्बजरायुणी ४ प्रजापतेरुद्भिद्द्वलभिदौ ५

द्वन्द्वपर्व द्वितीयः खण्डः

भर्गयशसी १ धर्मस्य तनू २ वार्कजम्भे ३ तौरश्रवसे ४ तास्पन्द्ये ५

तृतीयः खण्डः

त्रीणि चक्षूंषि १ वार्षाहराणि २ भद्रश्रेयांसि त्रीणि ३ वसिष्ठस्य शफौ

चतुर्थः खण्डः

बार्हद्गिररायोवाजीये १ संकृतिपार्थुरश्मे २ वृषकश्येनौ ३ धेनुपयसी ४ यण्वापत्ये ५

पञ्चमः खण्डः

यामे १ याममाधुच्छन्दसे २ तन्त्वोतुनी द्वे ३ द्वैगते ४ आयुर्नवस्तोभे

षष्ठः खण्डः

ईष्विश्वज्योतिषी १ स्वर्ज्योतिषी २ द्रविणस्पर्धिनी ३ सहोमहसी ४ शुक्रचन्द्रे ५ द्वन्द्वपर्व समाप्तम्

शुक्रियपर्व

मार्तवे द्वे १ इन्द्रस्य क्षुरपविणी द्वे २ क्षुरहरसी ३ सलिलापीते द्वे ४ अहोवामदेव्यम् ५ अग्नेः स्वराणि । वायोः स्वर्यांसि । अथवा वायोर्नवानुगानम् । इन्द्रस्य द्व्यनुगानम् । मृत्योश्चतुरनुगानम् इति त्रीणि ६ आदित्यस्य व्रतशुक्रियाणि षट् । भ्राजाभ्राजे विकर्णभासे आहादिवाकीर्त्यम् आदित्यव्रतमिति ७ शुक्रियपर्व समाप्तम् ॥

परिशिष्टम्

ऐन्द्रा महानाम्न्यः । महामानयः । सिमाः शक्वर्यः मटवीर्वा १ ऐन्द्रः । षोडशी । तवश्शाव्यम् । ज्येष्ठसाम । सुभेषज वा २ वाचोव्याहृतिसामानि सप्तदश ३ प्राजापत्यं गायत्रम् ४ इत्यारण्यकगानं समाप्तम् । जैमिनीयार्षेयब्राह्मणं समाप्तम् ॥

Reference: Burnell, A.C., *The Jaiminiya text of the Arsheyabrahmana of the Sama Veda*, (Mangalore: Basel Mission Press, 1878).

## Branch 27G: Brāhmaṇa Śhāṅkhāyana Brāhmaṇa

Structure: 30 Chapters

Beginning:

अथ ऋग्वेदे शाङ्खायनब्राह्मणम् । हरि ॐ ।

अस्मिन्वै लोक उभये देवमनुष्या आसुस्ते देवाः स्वर्गं लोकं यन्तोऽग्निमूचुस्त्वं नो अस्य लोकस्याध्यक्ष एधीति तानग्निरुवाचाथ यद्धोऽहं घोरसंस्पर्श-तमोऽस्म्यनपचायितारो मनुष्याः कथं वस्तद्भविष्यति यन्मनुष्येष्विति ते देवा ऊचुस्तस्य वै ते वयं घोरास्तनूर्विनिधास्यामोऽथ यैव ते शिवा शग्म्या यज्ञिया तनूस्तयेह मनुष्येभ्यो भविष्यसीति तस्याप्सु पवमानामदधुर्वायौ पावकामादित्ये शुचिमथ यैवाऽस्य शिवा शग्म्या यज्ञिया तनूरासीत्तयेह मनुष्येभ्योऽतपदेता वा अग्नेस्तन्वस्तद्यदेता देवता यजत्यत्राग्निः साङ्गः सतनूः प्रीतो भवति ता वै तिस्रो भवन्ति त्रयो वा इमे लोका इमानेव तं लोकानाप्नोति पौर्णमासं प्रथमायै तन्त्रं भवत्यामावास्यं द्वितीयायै तेन हास्य दर्शपूर्णमा-सावन्वारब्धौ भवत ईळितवत्यौ हव्यवाड्वत्यौ प्रथमायै संयाज्ये तत्संयाज्यारूपं ह्यग्नी द्वितीयायै द्वौ ह्यग्नी यजति सप्तदशसामिधेनीका तृतीया सप्तदशसामिधेनीका वा इष्टिपशुबन्धास्तदिष्टिपशुबन्धानाप्नोति सद्वन्तावा-ज्यभागौ भवतोऽसानोति वाऽग्नीनाधत्ते स्यामिति कामयते स यदि ह वा अपि स्वैषा वीर इव सन्नग्नीनाधत्ते क्षिप्र एव सम्भवति क्षिप्रे भोग्यतामश्नुते यः सद्वन्तौ कुरुते विराजौ संयाज्ये श्रीर्विराळन्नाद्यं श्रियो विराजोऽन्नाद्यस्योपाप्त्यै ता वै गायत्र्यो भवन्ति गायत्रो वा अग्निर्गायत्रच्छन्दाः स्वेनैव तच्छन्द-साऽग्नीनाधत्ते ता वा उपांशु भवन्ति रेतःसिक्तिर्वा अग्न्याधेयमुपांशु वै रेतः सिच्यतेऽभिरूपा भवन्ति यद्यज्ञेऽभिरूपं तत्समृद्धं यज्ञस्यैव समृद्ध्यै द्वादश दद्याद्द्वादश वै मासाः संवत्सरः संवत्सरस्यैवाऽऽप्त्या अश्वं त्रयोदशं ददाति यस्त्रयोदशो मासस्तस्याप्त्यै १ देवासुरा वा एषु लोकेषु संयत्ता आसु-स्तेभ्योऽग्निरपाक्रामत्स ऋतून्याविशत्ते देवा हत्वाऽसुरान्विजित्याग्निमन्वैछंस्तं यमश्च वरुणश्चान्वपश्यत्तां तमुपामन्त्रयन्त तमज्ञपयंस्तस्मै वरमददुः स हैतं वरं वव्रे प्रयाजान्मे अनुयाजाँश्च केवलान्घृतं चापां पुरुषं चौषधीनामिति तस्मादाहुराग्नेयाः प्रयाजानुयाजा आग्नेयमाज्यमिति ततो वै देवा अभवन्परासुरा भवत्यात्मना परास्य द्वेष्यो य एवं वेद २

Branch 27G: Brāhmaṇa Śhāñkhāyana Brāhmaṇa

Ending:

पशवो वै च्छन्दोमाः पाङ्क्ताः पशवः पशूनामेवाऽऽप्त्यै षट्षळुत्तरयोः षड्वा ऋतवः संवत्सरः संवत्सरस्यैवाऽऽप्त्यै चतुराहावानि शस्त्राणि पशवो वा उक्थानि चतुष्टया वै पशवोऽथो चतुष्पादाः पशूनामेवाऽऽत्यै षष्ठ एवाहन्मैत्रावरुणस्य पञ्चाहावं भवति पशवो वा उक्थानि पाङ्क्ताः पशवः पशूनामेवाऽऽप्त्या ऐकाहिका उक्थयाज्याः प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एवानुवषट्कुर्वन्त्याहुतीनामेव शान्त्या आहुतीनां प्रतिष्ठित्यै १० पञ्च च्छन्दांसि रात्रौ शंसन्त्यनुष्टुभं गायत्री मुष्णिहं त्रिष्टुभं जगतीमित्येतानि वै रात्रिच्छन्दांसि पञ्चाहावा रात्रिर्वाजपेयस्य चातिरिक्तोक्थमुक्थस्यातिग्रहो रात्रिश्छन्दशश्छन्दस एव तदाहूयन्त इति ह स्माऽह कौषीतकिरजामिताया अथ यत्तिरो अह्न्यवतीं त्रिष्टुभमाश्विनोक्थग्रहस्य पुरोनुवाक्यामन्वाह तिरोअह्न्यवान्प्रैषस्तिरोअह्न्या हि सोमा भवन्त्यथो बलं वै वीर्यं त्रिष्टुब्बलमेव तद्वीर्यं यजमाने दधाति चतुराहावान्याप्तोर्यामस्यातिरिक्तोक्थानि भवन्ति पशवो वा उक्थानि चतुष्टया वै पशवोऽथो चतुष्पादाः पशूनामेवाऽऽप्त्यै क्षैत्रपत्याः परिधानीयाः कुर्वत इयं वै क्षेत्रं पृथिव्यस्यामदीनायामन्तः प्रतिष्ठास्याम इत्यस्यामेव तददीनायामन्ततः प्रतितिष्ठत्यथ यत्तिरोअह्न्यव-त्यस्त्रिष्टुभो याज्या भवन्ति तिरोअह्न्या हि सोमा भवन्त्यथो बलं वै वीर्यं त्रिष्टुब्बलमेव तद्वीर्यं यजमाने दधत्यनुवषट्कुर्वन्त्याहुतीनामेव शान्त्या आहुतीनां प्रतिष्ठित्या अथ हारियोजनेन चरन्ति तस्योक्तं ब्राह्मणं त्रिष्टुभं हारियोजनस्य पुरोनुवाक्यामन्वाह तस्या उक्तं ब्राह्मणमथ यदतिप्रैषस्य पुरोनुवाक्यामन्वाहावीर्यो वा उ स प्रैषो योऽपुरोनुवाक्योऽथो द्विदेवत्येषु वै पुरोनुवाक्या भवन्ति सर्वेषु च प्रस्थितेषु तस्मादस्य पुरोनुवाक्यामन्वाहाथ यदतिप्रैषमाह परमेवैतदहरभिवदति परमेवैतदहरभ्यारभ्य वसन्तीति ह स्माऽऽह कौषीतकिः परमेवैतदहरभ्यारभ्य वसनीति ह स्माऽऽह कौषीतकिः ११ इति शाङ्खायनब्राह्मणे त्रिंशोऽध्यायः ३० इति शाङ्खायनब्राह्मणं समाप्तम्

Reference: Rai, Ganga Sagar, The *Śāñkhāyana Brāhmaṇa*, (Varanasi: Ratna Publications, 1987).

## Branch 27H: Brāhmaṇa Sāma Vidhāna

Structure: Three Prapāṭhakas.

Beginning:

सामविधानब्राह्मणम् । अथ प्रथमः प्रपाठकः । प्रथमः खण्डः ।
ब्रह्म ह वा इदमग्र आसीत् १ तस्य तेजो रसोऽत्यरिच्यत । स ब्रह्मा समभवत् २ स तूष्णीं मनसाध्यायत् । तस्य यन्मन आसीत् स प्रजापतिरभवत् ३ तस्मात् प्राजापत्यां मनसा जुह्वति । मनो हि प्रजापतिः ४ तस्य द्यौः शिर आसीदुरोऽन्तरिक्षं मध्यँ समुद्रः पृथिवी पादौ ५ स वा इदं विश्वं भूतमसृजत । तस्य सामोपजीवनं प्रायच्छत् ६ उपजीवनीयो भवति य एवं वेद ७ तद्योऽसौ क्रुष्टतम इव साम्नः स्वरस्तं देवा उपजीवन्ति । योऽवरेषां प्रथमस्तं मनुष्या यो द्वितीयस्तं गन्धर्वाप्सरसो यस्तृतीयस्तं पशवो यश्चतुर्थस्तं पितरो ये चाण्डेषु शेरते यः पञ्चमस्तमसुररक्षाँसि योऽन्त्यस्तमोषधयो वनस्पतयो यच्चान्यज्जगत् । तस्मादाहुः सामैवान्नमिति । साम ह्येषामुपजीवनं प्रायच्छत् ८ उपजीवनीयो भवति य एवं वेद ९ तस्य ह वा एतस्य साम्न ऋगेवास्थीनि । स्वरो माँसानि । स्तोभा लोमानि १० यो ह वै साम्नः स्वं यः सुवर्णं वेद स्वं च ह वै साम्नः सुवर्णं च भवति । स्वरो वाव साम्नः स्वं तदेव सुवर्णम् ११ यो ह वै साम्नः प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिँश्च लोकेऽमुष्मिँश्च । वाग्वाव साम्नः प्रतिष्ठा । यद्वेतद्वागित्यृगेव सा । ऋचि साम प्रतिष्ठितम् १२ स यदा गायत्रं बृहत्यां गायति बार्हतं जगत्याम् जागतं त्रिष्टुभिः समतां चापद्यते । तस्मादेतत् सामेत्याह । समा उ ह वा अस्मिँश्छन्दांसि साम्यादिति तत्साम्नः सामत्वम् १३ क्रुष्टः प्राजापत्यो ब्राह्मो वा वैश्वदेवो वादित्यानां प्रथमः साध्यानां द्वितीयोऽग्नेस्तृतीयोवायोश्चतुर्थः सौमो मन्द्रो मित्रावरुणयोरतिस्वार्यः १४ ते देवाः प्रजापतिमुपाधावन् । तेऽब्रुवन् कथं नु वयँ स्वर्गं लोकमियाम इति । तेभ्य एतान् यज्ञक्रतून् प्रायच्छत् एतैः लोकमेष्यथ इति । तैः स्वर्गं लोकमायन् १५ स्वर्गं लोकमेति य एवं वेद १६ तेषामहीयन्ताजाः पृश्नयो वैखानसा वसुरोचिषो ये चापूता ये च कामेप्सवस्तेऽब्रुवन् कथं नु वयं स्वर्गं लोकमियाम इति । तेभ्य एतत् स्वाध्यायाध्ययनं प्रायच्छत्

Branch 27H: Brāhmaṇa Sāma Vidhāna Brāhmaṇa

Ending:

रात्रिस्तु मा पुनातु रात्रिः खमेतत्पुष्पान्तं यत्पुराणमाकाशं तत्र मे स्थानं कुर्वपुनर्भवायापुनर्जन्मन एतावदेव रात्रौ रात्रेर्व्रतं च रात्रेर्व्रतं च ८

नवमः खण्डः

चतुरो मासान् पयोभक्षो गा अनु गत्वारण्ये शुचौ देशे मठं कृत्वा तत्र प्रविशेत् । कमण्डलुमुदकोपस्पर्शनार्थमादाय त्रीन्त्सप्तरात्राननुदक उपवसन्नृचँ साम यजामह इत्येतयोः पूर्वँ सदा सहस्रकृत्व आवर्तयन् यदि देवताः पश्यति सिद्धं तदिति । अथोत्थानम् । अन्तरिक्षया हास्य सिद्धा भवन्त्यन्तरिक्षक्रमणं च । द्वाराणि चास्य विव्लीयन्ते १ द्वितीयमेतेन कल्पेन प्रयुञ्जानः कामचारी मनोजवा भवति २ शुक्लानुपवसेत् सर्वान् कालान्मृष्टः शुक्लवासाश्चन्दनेनानुलिप्तः सुमनसो धारयँस्त्यमू षु पूर्व ँ सदा सहस्रकृत्व आवर्तयन् ये मानुषाः कामास्तानवाप्नोति ३ द्वितीयमेतेन कल्पेन प्रयुञ्जानो ये दैवास्ताँ स्तेन ४ मासमुपवसेदेकमेकमयाचितं भुञ्जीत मयि वर्च इत्येतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जानस्त्रयाणां लोकानामाधिपत्यं गच्छति व्यृद्धावप्यस्यैकस्य ५ अथ यान्यनादिष्टकामकल्पानि तेषां यथाश्रुति स्मृतिलिङ्गैः कामाः क्षुरसंयुक्ताः ६ आभिप्रायिकं कर्म ७ सोऽयं प्राजापत्यो विधिस्तमिमं प्रजापतिर्बृहस्पतये प्रोवाच बृहस्पतिर्नारदाय नारदो विष्वक्सेनाय विष्वक्सेनो व्यासाय पाराशर्याय व्यासः पाराशर्यो जैमिनये जैमिनिः पौष्पिञ्ज्याय पौष्पिञ्ज्यः पाराशर्यायणाय पाराशर्यायणो बादरायणाय बादरायणस्ताण्डिशाट्यायनिभ्यां ताण्डिशाट्यायनिनौ बहुभ्यः ८ सोऽयमनूचाप्राय ब्रह्मचारिणे समावर्तमानायाख्येयः ९ उपाध्यायाय ग्रामवरँ सहस्रँ श्वेतं चाश्वं प्रदायानुज्ञातो वा यं कामं कामयते तमाप्नोति तमाप्नोति १०

इति तृतीयः प्रपाठकः । इति सामविधानं ब्राह्मणं समाप्तम् ।

Reference: Sharma, B.R., *Sāmavidhāna Brāhmana, with Vedārthaprakāśa of Sāyaṇa and Padārthamātravivrti of Bharatasvāmin*, (Tirupati: Kendriya Sanskrit Vidyapeetha, 1980).

## Branch 27I: Brāhmaṇa Aitareya Brāhmaṇa

Structure: 40 Chapters

Beginning:

ऐतरेयब्राह्मणम् पञ्चिका १ अध्याय १ खण्डः १-६

अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता आग्नावैष्णवम्पुरोळाशं निर्वपन्ति दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्त्यग्निर्वै सर्वा देवता विष्णुः सर्वा देवता एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च तद्यदाग्नावैष्णवम्पुरोळाशं निर्वपन्त्यन्तत एव तद्देवानृध्नुवन्ति तदाहुर्यदेकादशकपालः पुरोळाशो द्वावग्नाविष्णू कैनयोस्तत्र क्ळिप्तिः का विभक्तिरित्यष्टाकपाल आग्नेयोऽष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दस्त्रिकपालो वैष्णवस्त्रिर्हीदं विष्णुर्व्यक्रमत सैनयोस्तत्र क्ळिप्तिः सा विभक्तिर्घृते चरुं निर्वपेत योऽप्रतिष्ठितो मन्येतास्यां वाव स न प्रतितिष्ठति यो न प्रतितिष्ठति तद्यद्घृतं तत्स्त्रियै पयो ये तण्डुलास्ते पुंसस्तन्मिथुनम्मिथुनेनैवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेदारब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमासाभ्यां यजत आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन्बर्हिषि दीक्षेतैषो एका दीक्षा सप्तदश सामिधेनीरनुब्रूयात्सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन तावान्संवत्सरः संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेवाभी राध्नोति य एवं वेद १

यज्ञो वै देवेभ्य उदक्रामत्तमिष्टिभिः प्रैषमैछन्यदिष्टिभिः प्रैषमैछंस्तदिष्टी-नामिष्टित्वं तमन्वविन्दन्ननुवित्तयज्ञो राध्नोति य एवं वेदाहूतयो वै नामैता यदाहुतय एताभिर्वै देवान्यजमानो ह्वयति तदाहुतीनामाहुतित्वमूतयः खलु वै ता नाम याभिर्देवा यजमानस्य हवमायन्ति ये वै पन्थानो याः स्रुतयस्ता वा ऊतयस्त उ एवैतत्स्वर्गयाणा यजमानस्य भवन्ति तदाहुर्यदन्यो जुहोत्यथ योऽनु चाह यजति च कस्मात्तं होतेत्याचक्षत इति यद्वाव स तत्र यथाभाजनं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति होतेत्येनमाचक्षते य एवं वेद २

पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति यं दीक्षयन्त्यद्भिरभिषिञ्चन्ति रेतो वा आपः सरेतसमेवैनं तत्कृत्वा दीक्षयन्ति नवनीतेनाभ्यञ्जन्त्याज्यं वै देवानां सुरभि

Branch 27I: Brāhmaṇa Aitareya Brāhmaṇa

Ending:

चन्द्रमा वा अमावास्यायामादित्यमनुप्रविशति सोऽन्तर्धीयतां तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयाच्चन्द्रमसो मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तम्मा निर्ज्ञासिषुरिति च्चिप्रं हैवैनं न निर्जानन्त्यादित्यो वा अस्तं यन्नग्निमनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनाम्न निर्जानन्ति स ब्रूयादादित्यस्य मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तम्मा निर्ज्ञासिषुरिति च्चिप्रं हैवैनं ना निर्जानन्त्याग्निर्वा उद्वान्वायुमनुप्रविशति सोऽन्तर्धियते तं न निर्जानन्ति यदा वै म्रियते-ऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयादग्नेर्मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तम्मा निर्ज्ञासिषुरिति च्चिप्रं हैवैनं न निर्जानन्ति ता वा एता देवता अत एव पुनर्जायन्ते वायोरग्निर्जायते प्राणाद्धि बलान्मथ्यमानो-ऽधिजायते तं दृष्ट्वा ब्रूयादग्निर्जायताम्मा मे द्विषज्ञन्यत एव पराङ्प्रजिघ्यत्विति अतो हैव पराङ्प्रजिघ्यत्यग्नेर्वा आदित्यो जायते तं दृष्ट्वा ब्रूयादादित्यो जायताम्मा मे द्विषज्ञन्यत एव पराङ्प्रजिघ्यत्वित्यतो हैव पराङ्प्रजिघ्य-त्यादित्याद्वै चन्द्रमा जायते तं दृष्ट्वा ब्रूयाच् चन्द्रमा जायताम्मा मे द्विषज्ञन्यत एव पराङ्प्रजिघ्यत्विति अतो हैव पराङ्प्रजिघ्यति चन्द्रमसो वै वृष्टिर्जायते तां दृष्ट्वा ब्रूयाद्वृष्टिर्जायताम्मा मे द्विषज्ञन्यत एव पराङ्प्रजिघ्यत्वित्यतो हैव पराङ्प्रजिघ्यति वृष्टेर्वै विद्युज्ञायते तां दृष्ट्वा ब्रूयाद्विद्युज्ञायताम्मा मे द्विषज्ञन्यत एव पराङ्प्रजिघ्यत्वित्यतो बैव परान्प्रजिघ्यति स एष ब्रह्मणः परिमरस्तमेतम्ब्रह्मणः परिमरम्मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच तं ब पञ्च राजानः परिमम्रुस्ततः सुत्वा महज्ञगाम तस्य व्रतं न द्विषतः पूर्व उपविशेद्यदि तिष्ठन्तम्मन्येत तिष्ठेतैव न द्विषतः पूर्वः संविशेद्यद्यासीनम्मन्येतासीतैव न द्विषतः पूर्वः प्रस्वप्याद्यदि जाग्रतम्मन्येत जागृयादेवापि ह यद्यस्याश्ममूर्धा द्विषन्भवति च्चिप्रं हैवैनं स्तृणुते स्तृणुते २८ ५ इत्यष्टमपञ्चिका समाप्ता शुभं भवतु

Reference: Aufrecht, Th., *Das Aitareya Brāhmaṇa.mit Auszuegen aus dem Commentare von Sāyaṇācārya und anderen Beilagen*, (Bonn: Adolph Marcus, 1879).

## Branch 27J: Brāhmaṇa Taittiīiya Brāhmaṇa

Structure: Three main divisions, called Kāṇḍas.

Beginning:

तैत्तिरीयब्राह्मण

ब्रह्म संधत्तं तन्मे जिन्वतम् । क्षत्रँ संधत्तं तन्मे जिन्वतम् । इषँ संधत्तं तां मे जिन्वतम् । ऊर्जँ संधत्तं तां मे जिन्वतम् । रयिँ संधत्तं तां मे जिन्वतम् । पुष्टिँ संधत्तं तां मे जिन्वतम् । प्रजाँ संधत्तं तां मे जिन्वतम् । पशून्संधत्तं तान्मे जिन्वतम् । स्तुतोऽसि जनधाः । देवास्त्वा शुक्रपाः प्रणयन्तु १
सुवीराः प्रजाः प्रजनयन्परीहि । शुक्रः शुक्रशोचिषा । स्तुतोऽसि जनधाः । देवास्त्वा मन्थिपाः प्रणयन्तु । सुप्रजाः प्रजाः प्रजनयन्परीहि । मन्थी मन्थिशोचिषा । संजग्मानौ दिव आ पृथिव्यायुः । संधत्तं तन्मे जिन्वतम् । प्राणँ संधत्तं तं मे जिन्वतम् । अपानँ संधत्तं तं मे जिन्वतम् २
व्यानँ संधत्तं तं मे जिन्वतम् । चक्षुः संधत्तं तन्मे जिन्वतम् । श्रोत्रँ संधत्तं तन्मे जिन्वतम् । मनः संधत्तं तन्मे जिन्वतम् । वाचँ संधत्तं तां मे जिन्वतम् । आयुः स्थ आयुर्मे धत्तम् । आयुर्यज्ञाय धत्तम् । आयुर्यज्ञपतये धत्तम् । प्राणः स्थः प्राणं मे धत्तं । प्राणं यज्ञाय धत्तम् ३
प्राणं यज्ञपतये धत्तम् । चक्षुः स्थश्चक्षुर्मे धत्तम् । चक्षुर्यज्ञाय धत्तम् । चक्षुर्यज्ञपतये धत्तम् । श्रोत्रँ स्थः श्रोत्रं मे धत्तम् । श्रोत्रं यज्ञाय धत्तम् । श्रोत्रं यज्ञपतये धत्तम् । तौ देवौ शुक्रामन्थिनौ । कल्पयतं दैवीर्विशः । कल्पयतं मानुषीः ४
इषमूर्जमस्मासु धत्तम् । प्राणान्पशुषु । प्रजां मयि च यजमाने च । निरस्तः शण्डः । निरस्तो मर्कः । अपनुत्तौ शण्डामर्कौ सहामुना । शुक्रस्य समिदसि । मन्थिनः समिदसि । स प्रथमः संकृतिर्विश्वकर्मा । स प्रथमो मित्रो वरुणो अग्निः । स प्रथमो बृहस्पतिश्चिकित्वान् । तस्मा इन्द्राय सुतमाजुहोमि ५
कृत्तिकास्वग्निमादधीत । एतद्वा अग्नेर्नक्षत्रम् । यत्कृत्तिकाः । स्वायामेवैनं देवतायामाधाय । ब्रह्मवर्चसी भवति । मुखं वा एतन्नक्षत्राणाम् । यत्कृत्तिकाः । यः कृत्तिकास्वग्निमाधत्ते । मुख्य एव भवति । अथो खलु ६

Branch 27J: Brāhmaṇa Taittirīya Brāhmaṇa

Ending:

अपानो विद्वानावृतः । प्रति प्रातिष्ठदध्वरे । आर्तवा उपगातारः । सदस्या ऋतवोऽभवन् । अर्धमासाश्च मासाश्च । चमसाध्वर्यवोऽभवन् । अशँसद्ब्रह्मणस्तेजः । अच्छावाकोऽभवद्यशः । ऋतमेषां प्रशास्तासीत् । यद्विश्वसृज आसत ५२

ऊर्ग्राजानमुदवहत् । ध्रुवगोपः सहोऽभवत् । ओजोऽभ्यष्टौद्ग्राव्णः । यद्विश्वसृज आसत । अपचितिः पोत्रीयामयजत् । नेष्ट्रीयामयजत्त्विषिः । आग्नीध्राद्विदुषी सत्यम् । श्रद्धा हैवायजत्स्वयम् । इरा पत्नी विश्वसृजाम् । आकूतिरपिनड्ढविः ५३

इध्मँ ह क्षुच्चैभ्य उग्रे । तृष्णा चावहतामुभे । वागेषाँ सुब्रह्मण्यासीत् । छन्दोयोगान्विजानती ।कल्पतन्त्राणि तन्वानाहःसँस्थाश्च सर्वशः । अहोरात्रे पशुपाल्यौ । मुहूर्ताः प्रेष्या अभवन् । मृत्युस्तदभवद्धाता । शमितोग्रो विशां पतिः ५४

विश्वसृजः प्रथमाः सत्त्रमासत । सहस्रसमं प्रसुतेन यन्तः । ततो ह जज्ञे भुवनस्य गोपाः । हिरण्मयः शकुनिर्ब्रह्म नाम । येन सूर्यस्तपति तेजसेद्धः । पिता पुत्रेण पितृमान्योनियोनौ । नावेदविन्मनुते तं बृहन्तम् । सर्वानुभुमात्मानँ संपराये । एष नित्यो महिमा ब्राह्मणस्य । न कर्मणा वर्धते नो कनीयान् ५५

तस्यैवात्मा पदवित्तं विदित्वा । न कर्मणा लिप्यते पापकेन । पञ्च पञ्चाशतस्त्रिवृतः संवत्सराः । पञ्च पञ्चाशतः पञ्चदशाः । पञ्च पञ्चाशतः सप्तदशाः । पञ्च पञ्चाशत एकविँशाः । विश्वसृजाँ सहस्रसंवत्सरम् । एतेन वै विश्वसृज इदं विश्वमसृजन्त । यद्विश्वमसृजन्त । तस्माद्विश्वसृजः । विश्वमेनाननु प्रजायते । ब्रह्मणः सायुज्यँ सलोकतां यन्ति । एतासामेव देवतानाँ सायुज्यम् । सार्ष्टिताँ समानलोकतां यन्ति । य एतदुपयन्ति । ये चैनत्प्राहुः । येभ्यश्चैनत्प्राहुः ५६ १२ ३

Reference: *Krsnayajurvediyam Taittiriya-Brahmanam*, 3 vols. (Punyapattane] : Anandasrama, 1979).

## Branch 27K: Brāhmaṇa Jaiminīya Brāhmaṇa

Structure: Three main books

Beginning:

जैमिनीयब्राह्मणम्

तदाहुः केन जुहोति कस्मिन्हूयत इति ।
प्राणेनैव जुहोति प्राणे हूयते ।
तद्यदेतदग्नीन्मन्थन्ति यजमानस्यैव तत्प्राणाञ्जनयन्ति ।
तद्यावद्वै मन्थन्ति न तर्हि प्राणिति ।
अरण्योरेवास्य तर्हि प्राणा भवन्ति ।
तस्य वै मथ्यमानस्य भस्मावशीयते ।
अन्नमेवास्य तज्जायते ।
अन्नं म एतदजनीत्येव तद्विद्यात् ।
धूमोऽनु निनर्दति ।
मन एवास्य तज्जायते ।
मनो म एतदजनीत्येव तद्विद्यात् ।
अङ्गारोऽनु निर्वर्तते ।
चक्षुरेवास्य तज्जायते ।
चक्षुर्म एतदजनीत्येव तद्विद्यात् ।
स एषोऽङ्गार एतानि भस्मानि ग्रसते ।
यथा कुमारो जातस्स्तनमभिपद्येत तथा तिर्यङ्विसर्पति ।
श्रोत्रमेवास्य तज्जायते ।
श्रोत्रं म एतदजनीत्येव तद्विद्यात् ।
उपरि तृणानि धुनोति ।
प्राण एवास्य स जायते ।
प्राणो म एषोऽजनीत्येव तद्विद्यात् ।
भा इत्युद्दीप्यते ।
वागेवास्य सा जायते ।
वाङ्म एषाजनीत्येव तद्विद्यात् ।
स एतान्पञ्च प्राणाञ्जनयते ।

Branch 27K: Brāhmaṇa Jaiminīya Brāhmaṇa

Ending:

सवनानि सर्वे पशवस्सर्वे देवास्सर्वे लोकास्सर्वे कामा ।
द्वादशाहमन्वायत्ता । द्वादशाहमन्वाभक्ता । द्वादशाहमनुसंतृप्यन्ति ।
द्वादशाहे संपन्ना । द्वादशाहे प्रतिष्ठिताः ।
तदाहुर्यदेतानि दशैवाहान्यथ कस्माद्द्वादशाह इत्याख्यायत इति ।
स ब्रूयाद्यदेवैते द्वादशाग्निष्टोमा संपद्यन्ते तेनेति ३८५
तदाहुर्यत्त्रयोदश मासास्संवत्सरस्संवत्सरश्च चतुर्दशोऽथ केन त्रयोदशं च मासमुपाप्नुवन्ति संवत्सरं च चतुर्दशमिति ।
अतिरात्राभ्यामिति ब्रूयात् ।
प्रायणीयेनातिरात्रेण त्रयोदशं मासमुपाप्नुवन्त्य् । उदयनीयेन संवत्सरं चतुर्दशम् ।
तदाहुस्स वाद्य द्वादशाहं विद्यात् । स वा वेदेति मन्येत । य एनं सर्वेषु लोकेषु प्रतिष्ठितं विद्यादिति ।
मासा वै द्वादशाहस्याहानि । त एव लोका । एत एव देवलोकाः ।
फाल्गुनो वै मासो द्वादशाहस्य प्रथममहश् । चैत्रो द्वितीयं वैशाखस्तृतीयम् । आषाढापौर्णमासश्चतुर्थं । श्रोणाश्रविष्ठः पञ्चमं । शातभिषजष्षष्ठं । प्रोष्ठपदः सप्तमम् । आश्वयुजोऽष्टमं । कार्तिको नवमम् । मार्गशीर्षो दशमं । तैष एकादशं । माघो द्वादशं ।
प्रायणीय एवातिरात्रस्त्रयोदशो मास । उदयनीयस्संवत्सरश्चतुर्दशः ।
स एष द्वादशाहस्सर्वेषु लोकेषु प्रतिष्ठितः ।
स य एवमेतं द्वादशाहं सर्वेषु लोकेषु प्रतिष्ठितं वेद सर्वेषु लोकेषु प्रतितिष्ठति ।
स एष वाव द्वादशाहो य एष तपत्येष इन्द्र । एष प्रजापतिर् । एष एवेदं सर्वमित्युपासितव्यम् ।
एष एवेदं सर्वमित्युपासितव्यम् ३८६

Reference: Vīra, Raghu, and Candra, Lokesh, *Jaiminīya-Brāhmaṇa of the Sāmaveda*, (Nagpur: L. Candra, 1954), and the grantha manuscripts, Vohd II, 2 Nr. 535, Berlin.

## Branch 27L: Brāhmaṇa Tāṇḍya Ṣaḍviṃśa Brāhmaṇa

Structure: Six Chapters

Beginning:

षड्विंशब्राह्मणम् । प्रथमः खण्डः । ब्रह्म च वा इदमग्रे सुब्रह्म चास्ताम् १ ततः सुब्रह्मोदक्रामत् २ अथ ह देवा यज्ञेन ब्रह्म पर्यगृह्णत ३ अग्निर्वै ब्रह्मासावादित्यः सुब्रह्म ४ तद्देवा यज्ञस्य संधावन्वैच्छन् ५ एष वै यज्ञस्य संधिर्यत्रैष उत्करः ६ तस्मादुत्करे तिष्ठन्त्सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति ७ सुब्रह्मण्योऽ३म् सुब्रह्मण्योऽ३म् सुब्रह्मण्योऽ३म् इति स्त्रियमिव त्रिराह ८ त्रिषत्या हि देवाः ९ इन्द्रागच्छेति १० यदाहेन्द्रागच्छेत्येतद्वा अस्य प्रत्यक्षं नाम तेनैवैनं तदाह्वयति ११ हरिव आगच्छेति १२ पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्यां हीदं सर्वं हरति १३ मेधातिथेर्मेषेति १४ मेधातिथिं ह काण्व्यायनं मेषो भूत्वा जहार १५ वृषणश्वस्य मेन इति १६ वृषणश्वस्य ह मेनस्य मेनका नाम दुहितास । ता हेन्द्रश्चकमे १७ गौरावस्कन्दिन्निति १८ गौरमृगो ह स्म भूत्वावस्कन्द्यारण्याद्राजानं पिबति १९ अहल्यायै जारेति २० अहल्याया ह मैत्रेय्या जार आस २१ कौशिक ब्राह्मणेति २२ कौशिको ह स्मैनां ब्राह्मण उपन्येति २३ गौतमब्रुवाणेति २४ देवासुरा ह संयत्ता आसंस्तानन्तरेण गौतमः शश्राम । तमिन्द्र उपेत्योवाचेह नो भवान्त्स्पशश्चरत्विति । नाहमुत्सह इति । अथाहं भवतो रूपेण चराणीति । स यथा मन्यस इति । स यत्तत् गौतमो वा ब्रुवाणश्चचार गौतमरूपेण वा तदेतदाह गौतमेति २५ इत्यहे सुत्यामागच्छ मघवन्निति २६ तद्यथार्हतो ब्रूयादित्यहे वः पक्तास्मि तदागच्छतेत्येवमेवैतद्देवेभ्यः सुत्यां प्राह २७ देवा ब्रह्माण इति २८ देवा हैव देवा अथ हैते मनुष्य-देवा ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्यदेवाः २९ आहुतय एव देवानां दक्षिणा मनुष्यदेवानाम् । आहुतिभिर्ह देवान् प्रीणाति । दक्षिणाभिर्मनुष्यदेवान् शुश्रुवुषोऽनूचानान् ब्राह्मणान् प्रीणाति ३० इति प्रथमाध्याये प्रथमः खण्डः १ द्वितीयः खण्डः

अथ यत्र सुब्रह्मण्यः सुब्रह्मण्यामाह्वयत्येतस्मिन् ह कालेऽसुररक्षांसि देवानां यज्ञमजिघांसन् १ ते देवा निहवमेवा कुर्वत ब्रह्मोऽ३म् सुब्रह्मोऽ३म् इति २

Branch 27L: Brāhmaṇa Tāṇḍya Ṣadviṃśa Brāhmaṇa

Ending:

विष्णवे स्वाहा सर्वभूताधिपतये स्वाहा चक्रपाणये स्वाहा ईश्वराय स्वाहा सर्वपापशमनाय स्वाहा इति व्याहृतिभिर्हुत्वा अथ साम गायेत् ३ खननाद्दहनादभिमर्शनाद्गोभिराक्रमणाच्च चतुर्भिः शुध्यते भूमिः पञ्चमाच्चोपलेपनात् ४ संभारान् प्रदक्षिणमानीय ब्राह्मणान् स्वस्ति वाच्य ५ एतैः संभारैर्यदुपस्पृष्टं तदभ्युक्षेत् । शाम्यति हातः ६ ब्राह्मणभोजनं हिरण्यं गौर्वासोऽश्वो भूमिर्दक्षिणा इति । शाम्यति हातः । शान्त्यर्थः शान्त्यर्थः ७ इति दशमः खण्डःएकादशः खण्डः

सोऽधस्ताद्दिशमन्वावर्तते १ अथ यदास्य गवां मानुषमहिष्यजाश्वोष्ट्राः प्रसूयन्ते हीनाङ्गान्यतिरिक्ताङ्गानि विकृतरूपाणि वा जायन्ते असंभवानि संभवन्ति अचलानि चलन्ति इत्येवमादीनि तान्येतानि सर्वाणि रुद्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति २ आ वो राजानम् इति स्थालीपाकं हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति । रुद्राय स्वाहा पशुपतये स्वाह शूलपाणये स्वाहा ईश्वराय स्वाहा सर्वपापशमनाय स्वाहा इति व्याहृतिभिर्हुत्वा अथ साम गायेत् ३

द्वादशः खण्डः

स सर्वां दिशमन्वार्तते १ अथ यदास्य मानुषाणामतिधृतिमतिदुःखं वा पर्वताः स्फुटन्ति निपतन्त्याकाशाद्भूमिः कम्पते महाद्रुमा उन्मूलन्ति अश्मानः प्लवन्ति तटाकानि प्रज्वलन्ति चतुष्पादं पञ्चपादं वा भवन्ति इत्येवमादीनि तान्येतानि सर्वाणि सूर्यदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति २ उदु त्यं जातवेदसमिति स्थालीपाकं हुत्वा पञ्चभिराज्याहुतिभिरभिजुहोति । सूर्याय स्वाहा सर्वग्रहाधिपतये स्वाहा किरणपाणये स्वाहा ईश्वराय स्वाहा सर्वपापशमनाय स्वाहा इति व्याहृतिभिर्हुत्वा अथ साम गायेत् ३

षड्विंशब्राह्मणं समाप्तम् ।

Reference: Sharma, Belikoth Ramachandra, *Ṣaḍviṃśa Brāhmaṇa with Vedārthaprakāśa of Sāyaṇa*, (Tirupati: Kendriya Sanskrit Vidyapeetha, 1983).

## Branch 27M: Brāhmaṇa Saṃhitopaniṣhad Brāhmaṇa

Structure: Five Khaṇḍas.

Beginning:

संहितोपनिषद्ब्राह्मणम् । प्रथमः खण्डः । अथातः संहितोपनिषदो
व्याख्यास्यामः १ सर्वपरोक्षा देवसँहिता भवति २ सर्वप्रत्यक्षासुर-
सँहिता भवति ३ परोक्षप्रत्यक्षार्षिसँहिता भवति ४ यथाधीमहे ।
स्वर्ग्या देवसँहिता भवति । स्वर्गं लोकं गच्छति यस्तथाधीते ६
पशव्यासुरसँहिता भवति । पशुमान् भवति यस्तथाधीते ७
ब्रह्मवर्चस्यर्षिसँहिता भवति । ब्रह्मवर्चसी भवति यस्तथाधीते ८
अथैतास्तिस्रः सँहिता भवन्ति । देवहूरेका । वाक् शबहूरेका ।
अमित्रहूरेका ९ सा या मन्द्रस्वरवती सा देवहूः । आ हास्य देवा हवं
गच्छन्ति यस्तथाधीते १० अथ यत् क्लबितमिव निरुदितमिव सा
बाक्शबहूः । क्षिप्रं मरिष्यतीति विद्याद्यस्तथाधीते ११ अथ
यदाक्रन्दितमिव निक्रन्दितमिव सामित्रहूः सर्वज्यानिं ज्यास्यतीति
विद्याद्यस्तथाधीते १२ तद्वै खलु समृद्धिमेव ध्यायन्नुपासीत १३ सा
यादीनतमा संपूर्णा संसृष्टा संयता वाक् सा पुत्र्यपशव्या । तद्यथावाते
वाति प्रजा निर्मुच्यन्त एवमेतया १४ अथ या मध्यायिनी संपूर्णा संसृष्टा
संयता वाक् सा पुत्र्यपशव्या । तद्यथा वातोऽप्सु शनैर्वान् सुखी
भवत्येवमेतया १५ अथ योत्सृष्टा गुल्मीभूतासंपूर्णासंसृष्टासंयता वाक्
सापुत्र्यपशव्या । तद्यथा वातेनातिशीघ्रं वाता बहुविभग्नं प्रभग्नं शेत
एवमेतया १६ अथैतास्तिस्रः संहिता भवन्ति । शुद्धादुःस्पृष्टानिर्भुजेति
१७ अथैषा शुद्धा संहिता भवति सर्वेभ्यः कामेभ्यः । तद्यथा समञ्जनवता
रथेन यं कामं कामयते तमभ्यश्नुत एवमेतया १८ अथैषादुःस्पृष्टा संहिता
भवति सर्वेभ्यः कामेभ्यः । तद्यथा समञ्जनवता पूर्णखेन रथेन यं कामं
कामयते तमभ्यश्नुते । एवमेतया १९ अथैषानिर्भुजा संहिता भवति
सर्वेभ्यः एव कामेभ्यः । तद्यथा समञ्जनवता पूर्णखेन समाहितेन रथेन यं
यं कामं कामयते तं तमभ्यश्नुते । एवमेतया २० अथैतास्तिस्रः संहिता
भवन्ति वायोरिन्द्रस्याग्नेः । सर्वावृद्धा वायोः । सर्ववृद्धेन्द्रस्य ।
उत्सेधपरोक्षवृद्धाग्नेः २१ इति प्रथमः खण्डः १

Branch 27M: Brāhmaṇa Saṃhitopaniṣad Brāhmaṇa

Ending:

अति संसिद्धिमपि गच्छेत विद्यया सह १७ ज्ञानवान् न त्वेनामसते दद्यात् १८ सतश्च न विमानयेत् १९ अथैता वेदस्याष्टावुपनिषदो भवन्ति । वित्तिश्चोपस्तवश्च दमश्च श्रद्धा च संप्रश्नश्चानाकाशीकरणं च योगश्चाचार्यशुश्रूषा चेति २० तदेतत्कौकुरुण्डेर्वचनं वेदयन्ते त्रिभिः पर्यायैः यः संपूर्णं पश्यति । छन्दस्तो देवतातो निगमत इति स मन्त्रदर्शी भवति २१ अथ य एतैरसंपूर्णं पश्यति स गाथादर्शी भवति २२ ते खल्विम एवमेव पूर्वैराचार्यैः प्रोक्ता धर्माः २३ इति तृतीयः खण्डः चतुर्थः खण्डः

दानेन सर्वान् कामान् अवाप्नोति । चिरजीवित्वं च १ ब्रह्मचारी रूपवानहिंस्र उपपद्यते २ स्वर्ग्यं पर्णाशनात् ३ दिविचरः पयोभक्षः ४ स्थानवीरासनाद्वित्तवान् ५ पितृमातृगुरुशुश्रूषाध्यानवान्त्स्वर्गी ६ यः काञ्चनदाता यावानु वै रसस्तावानात्मा सः ७ एष इम एव लोकाः ८ अयं सलोकः स प्रतिष्ठित एव भवति ९ प्रतिष्ठित इव ह्ययं लोकः १० अथ यदुत्तरं सा द्यौर्मूर्तिमत्सु गृहेष्वभिजायते ११ त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती १२ नरकादुद्धरन्त्येते जपवापनदोहनादुपस्पर्शनात् १३ षड्भागं करकं यः प्रयच्छत्यपिपासितश्च मिर्यते सोमपश्चाभिजायते १४

इति चतुर्थः खण्डःपञ्चमः खण्डः

अथ हिरण्यमेवापः कनको भवति । सहस्रं लभते १ अथैषा यजनीयेऽहनि सप्तच्छन्दाः २ अथैषाग्निरुपसमाहितो भवति ३ ब्रह्मचारी भैक्षं चरति निवेद्यं लभते ४ तिष्ठत्यहः शेषो भवति ५ व्रतमिति सारस्वतम् ६ अन्नं प्रजापतिमपृच्छत् । पृच्छामि त्वा इति वामेति वा ७ सर्वत्र दानप्रतिग्रहः सोमयाज्यपीतो भवति ८ स खलुत एतं प्रजापतिर्वा इदमेकम् ९ अह्नः क्षितयः १० पुरुषो वायमीश्वरोऽभिजायते ११ अनाकाशीकरणं च १२ चतुर्ऋचो भवति य एवं वेद य एवं वेद १३ इति छान्दोग्यसंहितोपनिषत्समाप्तम् ॥

Reference: Sharma, Belikoth Ramachandra, *Devatādhyāya-Saṃhitopaniṣad-Vaṃśa-Brāhmaṇas with commentaries*, (Tirupati: Kendriya Sanskrit Vidyapeetha, 1983).

Branch 27N: Brāhmaṇa Kauthuma Ārsheya Brāhmaṇa
Structure: 6 Chapters
Beginning:

आर्षेयब्राह्मणम् । प्रथमः अध्यायः । प्रथमः खण्डः । अथ खल्वयमार्षः प्रदेशो भवति १ ऋषीणां नामधेयगोत्रोपधारणम् २ स्वर्ग्यं यशस्यं धन्यं पुण्यं पुत्र्यं पशव्यं ब्रह्मवर्चस्यं स्मार्त्यमायुष्यम् ३ प्राक्प्रातराशिकमित्याचक्षते ४ तदप्येवमाहुर्य इदमुपधारयत एकैकस्य ऋषेः दिव्यं वर्षसहस्रमतिथिर्भवति । अभिनन्दितः प्रतिनन्दितो मानितः पूजितस्ततः स्वाध्यायफलमुपजीवतीति ५ अथापि ब्राह्मणं भवति--यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान् भवति । यातयामान्यस्य छन्दांसि भवन्ति । अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयान् भवति । अयातयामान्यस्य छन्दांसि भवन्ति । तस्मादेतानि मन्त्रे मन्त्रे विद्यात् इति ६ ऋषीणां संस्थानो भवति । संस्थानो भवति ब्रह्मणः । स्वर्गे लोके महीयते । स्मरन्नाजायते पुनः । य एवं वेद ७ तान्येतान्यार्षेयाणि योऽधिते ब्राह्मणः पङ्क्तिपावनो भवत्यर्घ्यः ८ य एवंवित्स्यान्न मृन्मये भुञ्जीत । तथा हास्यायुर्न रिष्येत तेजश्च ९ अथात उपदेशः १० ओमिति एतत् परमेष्ठिनः प्राजापत्यस्य साम । परमेष्ठिनो वा ब्राह्मणस्य ब्रह्मणो वा ब्रह्मवाचो वा ११ सत्यसाम स्वर्गस्य वा लोकस्य द्वारविवरणं देवानां वौकस्त्रयस्य वा वेदस्याप्यायनमयातयामाक्षरस्थं साम १२ वासिष्ठो हिंकारः प्राजापत्यो गवां वा १३ गायत्रं पौष्कलमाग्नेयम् १४ प्रथमायां वा यथादिष्टं गेयम् । प्रथमस्वरैर्वा चतुरक्षरवृद्धान्तैः १५ आद्यपात्प्रस्ताव ओंकारान्तः १६ हुम् आ वेत्यन्तस्तोभो वृद्धो वा १७ इति प्रथमः खण्डः

द्वितीयः खण्डः

गोतमस्य पर्काविभितः । कश्यपस्य बर्हिष्यं मध्यमम् १ सौपर्णं च वैश्वमनसं च २ बृहद्भारद्वाजं बृहदाग्नेयं बृहद्वा सौरम् ३ औतर्षाणि त्रीणि ४ औशने च शैरीषं चौशने वाभितः शैरीषं मद्ध्यमं शैरीषे वोत्तरे सर्वाणि वौशनानि सर्वाणि वा शैरीषाणि ५ इन्द्रस्य सांवर्गवार्त्रघ्ने द्वे ६

Branch 27N: Brāhmaṇa Kauthuma Ārṣheya Brāhmaṇa

Ending:

दिशां व्रतं दशानुगानम् १ कश्यपव्रतं दशानुगानम् । कश्यपग्रीवा द्वितीयम् । प्रजापतेर्हृदयं पञ्चमम् । इडानां संक्षारः षष्ठः । कश्यपपुच्छं दशमम् । प्राग्दशमाद्द्वां व्रते २ निह्नवाभिनिह्नवौ द्वौ । अनडुद्व्रते द्वे वा ३ इति सप्तमः खण्डः तृतीयं पर्व समाप्तमचतुर्थं पर्व प्रथमः खण्डः अग्नेर्व्रतम् १ वायोश्च व्रतम् २ महावैश्वानरव्रते द्वे ३ सूर्यस्य भ्राजाभ्राजे द्वे ४ वायोर्विकर्णभासे द्वे । मृत्योर्वा ५ ऐन्द्रं महादिवाकीर्त्यम् । सौर्यं वा दशानुगानम् । तस्य शिरश्च ग्रीवा च स्कन्धकीकसौ च पुरीषाणि च पक्षे चात्मा चोरू च पुच्छं चैतत् साम सुपर्णमित्या चक्षते ६ इति प्रथमः खण्डः

द्वितीयः खण्डः

आदित्यव्रतमेकविंशत्यनुगानमिति शाण्डलीपुत्रः । द्वाविंशतिरिति वार्ष्यायणीपुत्रः १ वैश्वदेवाः समैरयाः संशानानि भूतवदित्येकम् २ चित्रं देवानाम् अन्तरिति द्वयोरपरम् ३ गन्धर्वाप्सरसामानन्दप्रतिनन्दौ पक्षौ ४ सौर्योऽतीषङ्गः । इन्द्रस्य सधस्थम् । मरुतां भूतिः ५ प्रजापतेस्तिस्रः सार्पराज्ञ्याः । सर्पाणां वा । अर्बुदस्य वा ६ सर्पस्य घर्मरोचनमिन्द्रस्य वा ७ षडैन्द्राः परिधयः ८ ऋतूनां वागादि पित्र्यम् ९ अन्त्यं वैकल्पिकम् १० तन्मित्रावरुणयोश्चक्षुरित्याचक्षते । श्रोत्रं च तदेवैके ११ द्वितीयोऽतीषङ्गस्तन्मित्रावरुणयोः श्रोत्रमित्याचक्षते । चक्षुश्च तदेवैके १२ तृतीयोऽतीषङ्गस्तदिन्द्रस्य शिर इत्याचक्षते १३ आदित्यस्योन्नयं तदादित्यात्मेत्याचक्षते १४ ऐन्द्र्यो महानाम्न्यः प्रजापतेर्वा । विष्णोर्वा । विश्वामित्रस्य वा । सिमा वा । मट्रया वा । अध्वरमा वा । शक्वर्यो वा । शक्वर्यो वा १५

इति षष्ठाध्याये चतुर्थपर्वणि द्वितीयः खण्डः । इति षष्ठोऽध्यायः । आर्षेयब्राह्मणं समाप्तम् ॥

Reference: Sharma, Belikoth Ramachandra, *Ārseya Brāhmaṇa with Vedārthaprakāśa of Sāyaṇa*, (Tirupati: Kendriya Sanskrit Vidyapeetha, 1984).

## Branch 27 O: Brāhmaṇa Daivatādhyāya Brāhmaṇa

Structure: Four Khaṇḍas.

Beginning:

देवताध्यायब्राह्मणम् । प्रथमः खराडः । अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी १ इडानिधनानि पदनिधनानीकारणिधनानीत्याग्नेयानि २ सर्वाणि निधनवन्त्यैन्द्राणयन्यान्यादिष्टेभ्यः ३ सर्वाणि स्वाराणि प्राजापत्यानि ४ यथा वामदेव्यम् ५ ऋक्सामानि सौमानि ६ यथौशनकावे वाङ्गिनधनानि वारुणानि ८ यथा यज्ञायज्ञीयम् ९ अक्षरानुस्वराणि त्वाष्ट्राणि १० यथा वारवन्तीयं चाभीवर्तश्च ११ स्वःपृष्ठान्याङ्गिरसानि १२ स्वर्णिधनानि पौषाणि १३ कया नश्चित्र आ भुवदा पवस्व सहस्त्रिणमिति वाङ्गिनधने सारस्वते १४ य आनयत्परावतः इत्यैन्द्राग्ने १५ सुतं रयिष्ठाः सहो रयिष्ठा इत्याग्नेयैन्द्रे १६ वसवो रुद्रा आदित्या विश्वे देवाः १७ वसूनां स्वाराणि रुद्राणां निधनवन्ति आदित्यानामैडानि विश्वेषां देवानां वाङ्गिनधनानि १८ यथा भूयस्त्वेन प्रदेशा वर्तन्त इत्यन्तराणि १९ अथान्तरतराणि सर्वाणयाग्नेयानि सर्वाणयैन्द्राणि सर्वाणि स्वाराणि प्राजापत्यानि सामानीत्यन्तरतराणि २० अथान्तरतमानि सर्वाणि ब्राह्माणि ब्राह्मानि सामानीति सर्वान्तरतमानि २१ अथोपनिषत् २२ ऋग्वै माता साम पिता प्रजापतिः स्वरः २३ अथ यान्यृक्त आख्यायन्ते मातृतस्तान्याख्यायन्ते । अथ यानि सामत आख्यायन्ते पितृतस्तान्याख्यायन्ते । अथ यानि स्वरत आख्यायन्ते प्रजापतितस्तान्याख्यायन्ते २४ स वा एष उद्गीथो बन्धुमान् बन्धुमत्यः २५ बन्धुमान् बन्धुमत्यो भवति । जानन्ति ह वा एनं पितृतश्च मातृतश्च । य एवं वेद २६ इति प्रथमः खराडः

द्वितीयः खराडः

अथातश्छन्दसां वर्णाः १ शुक्ला गायत्र्यो रूपेण सारङ्गं रूपमुष्णिहाम् । पिशङ्गं ककुभां रूपं कृष्णमानुष्टुभं ततः ॥ रोहितं बृहतीनां तु नीलं पाङ्क्तं ततः पुनः । सुवर्णं त्रिष्टुभां रूपं गौरं जागतमुच्यते २ अतो यान्यन्यानि च्छन्दांसि श्यावं तेषां ततः पुनः । नकुलं त्वेकपदानां द्विपदा बभ्रुरुच्यते

Branch 27 O: Brāhmaṇa Daivatādhyāya Brāhmaṇa

Ending:

अथातो निर्वचनम् १ गायत्री गायतेः स्तुतिकर्मणः २ गायतो मुखादुदप-
तदिति हि ब्राह्मणम् ३ उष्णिगुत्स्नानात्स्निह्यतेर्वा कान्तिकर्मणोऽपि
वोष्णीषिणीत्यौपमिकम् ४ ककुप् ककुदरूपिणीत्यौपमिकम् ५ ककुप् च
कुब्जश्च कुजतेर्वोब्जतेर्वा ६ अनुष्टुबनुस्तोभनात् ७ अन्वस्तौदिति हि
ब्राह्मणम् ८ पिपीलिका पेलतेर्गतिकर्मणः ९ पिपीलिकमध्येत्यौपमिकम्
१० बृहती बृहतेर्विद्धिकर्मणः ११ विराड्विरमणाद्विराजनाद्विराधनाद्वा १२
पङ्क्तिः पञ्चिनी पञ्चपदा १३ त्रिष्टुभ् स्तोभत्युत्तरपदा १४ का तु त्रिता
स्यात्तीर्णतमं छन्दो भवतीति १५ त्रिवृद्वज्रस्तस्य स्तोभिनीवेत्यौपमिकम्
१६ जगती गततमं छन्दो जज्ञगतिर्भवति क्षिप्रगतिः १७
जज्ञलाकुर्वन्नसृजतेति हि ब्राह्मणम् १८ अतिच्छन्दाश्छदेरर्थे १९ छन्दांसि
छन्दयतीति वा २० निचृत् निपूर्वाच्चृतेः भरणात् भुरिगुच्यते २१ अथातो
गायत्रमाग्नेयं भक्त्या भवति । देवानां वर्षीणां वा परमेष्ठिनो वा
प्राजापत्यस्य साम २२ सावित्रीगेयं यत्रागीतम् २३
तत्सवितुर्वरेणियोम् । भर्गो देवस्य धीमही ऽ २ । धियो
योनः प्रचो १२१२ । हुम् आ २ । दायो । आ २३४५ ॥ इति ॥ इति
तृतीयः खण्डः ३अथ सावित्र्यङ्गानि व्याख्यास्यामः । शिरो ब्रह्मा ।
ललाटं द्यौः । चन्द्रादित्यौ चक्षुषी । मुखमग्निः । जिह्वा सरस्वती ।
त्वष्टा ग्रीवा । वसवश्च रुद्राश्च बाहू । उरो वायुः । रोमाणि पा यवः ।
पृष्ठमिन्द्रः । विष्णुर्नाभिः । प्रजापतिर्जघनम् । ऊरू मरुतः । वेदाः
पादौ । स्मितं विद्युत् । श्वसितं वायुः । अस्थीनि पर्वताः । समुद्रा
वासांसि । नक्षत्राणि अलंकारः १ य एवं वेद २
दुष्टतादुरुपयुक्तान्नयूनाधिकाच्च सर्वस्मात्स्वस्ति ३ स्वस्ति देवऋषिभ्यश्च
४ ब्रह्म सत्यं च पातु मामिति । ब्रह्म सत्यं च पातु मामिति ५
इति देवताध्यायब्राह्मणं चतुर्थः खण्डे ४ देवताध्यायब्राह्मणं समाप्तम् ।

Reference: Sharma, Belikoth Ramachandra, *Devatādhyāya-Saṃhitopaniṣad-Vaṃśa-Brāhmaṇas with commentaries*, (Tirupati: Kendriya Sanskrit Vidyapeetha, 1983).

## Branch 27P: Brāhmaṇa Kāṇvīya Śhatapatha Brāhmaṇa

Structure: 104 Chapters

Beginning:

काण्वीयं शतपथब्राह्मणम् ।

स वै संभारान्त्संभरति यद्वा एनानित्थाच्चेत्थाच्च संभरति तदेव संभाराणाँ संभरत्वँ सयत्र यत्राग्नेर्न्यक्तं भवति ततस्तत एनँ संभरति यशसेव त्वदेनँ समर्धयन्पशुभिरिव त्वन्मिथुनेनेव त्वदेनं प्रजननेन समर्धयति संभरँस्तस्माद्वाव संभारान्त्संभरति १ स यत्राग्नी आधास्यन्भवति तत्स्फ्येनोल्लिखति बहु वा अस्याः पृथिव्या अमेध्यं यदभिष्ठ्यूतं वाभिष्ठितं वा तदेवैतत्स्फ्येनोल्लिखत्यथ मेध्यायामेव यज्ञियायां पृथिव्यामाधत्ते तदद्भिरवोक्षति सोऽपाँ संभारोऽन्नमु वा आपोऽन्नँ हि वा आपस्तस्माद्यदेहाप आगच्छन्त्यथेहान्नं जायतेऽन्नाद्येनैवैनमेतत्समर्धयति योषा उ वा आपो वृषाग्निस्तन्मिथुनं प्रजननं मिथुनेनैवैनमेतत्प्रजननेन समर्धयत्यद्भिरु वा इदँ सर्वमाप्तमद्भिरेवैनमेतदाप्त्वाधत्ते तस्माद्वा अपः संभरति २ अथ हिरण्यँ संभरत्यग्निर्ह वा अपोऽभिदध्यौ मिथुन्येनाः स्यामिति ताः संबभूव तासु रेतः प्रसिषेच तद्धिरण्यं तस्माद्धिरण्यमग्निसंकाशमग्नेर्हि रेतस्तस्मादेनदप्स्वेवानुविन्दन्त्यप्सु पुनन्त्यप्सु ह्येनत्प्रासिञ्चन्नैनेन धावयन्ति न किं चन कुर्वन्त्यथ यशो देवरेतसँ हि यशसैवैनमेतत्समर्धयति सरेतसं कृत्स्नमग्निमाधत्ते तस्माद्धिरण्यँ संभरति ३ अथोषान्त्संभरत्यसौ ह वै द्यौरस्यै पृथिव्यै पशून्प्रददौ त ऊषास्तस्माद्यत्रोषरं तत्पशव्यमाहुः साक्षाद्ध्येते पशवो यदूषाः पशुभिरेवैनं तत्समर्धयति स वा एषोऽमुष्या दिवो रसः सोऽस्यां पृथिव्यां प्रतिष्ठितस्तमनयोर्द्यावापृथिव्यो रसं मन्यन्तेऽनयोरेवैनं तद्द्यावापृथिव्यो रसेन समर्धयति ४ अथाखुकरीषँ संभरत्याखवो ह वा अस्याः पृथिव्या रसं विदुस्तस्मादधोऽध एव चरन्तः पीविष्ठास्ते ह यत्र यत्रास्या रसस्ततस्ततो हैतदुत्किरन्त्यस्या एवैनमेतत्पृथिव्या रसेन समर्धयति समानमु वै करीषं च पुरीषं च पुरीषीति वै तमाचक्षते यः श्रियं गच्छति तस्याश्चैवावरुद्धये ५ अथ शर्कराः संभरति देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्ताथ हेयं तर्हि पृथिव्ययतेवास यथा पुष्करपर्णं लेलायेदेवँ ह स्म लेलायति ताँ ह

Branch 27P: Brāhmaṇa Kāṇvīya Śhatapatha Brāhmaṇa

Ending:

अथ वꣳशः । तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्र वात्सीमाण्डवीपुत्रा-
द्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराश-
रीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गी-
पुत्रो बाडेयीपुत्राद्बाडेयीपुत्रो मौषेकीपुत्रान्मौषिकीपुत्रो हारिकर्णीपुत्राद्धारिक-
र्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राछौनकीपुत्रः
३० काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीआलाक्यामाठरीपुत्रः कौत्सी-
पुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रो शालङ्कायनीपुत्राछालङ्कायनीपुत्रो वार्पग-
णीपुत्राद्वार्पगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्रा-
द्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरी-
पुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः
शौङ्गीपुत्राछौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्रः ३१ आलम्बीपुत्रात् । आल-
म्बीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डू-
कायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्रा-
छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ
वैदभृतोपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राची-
नयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ३२
प्राश्नीपुत्रात् । आसुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरा-
सुरियीज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः
कुश्रेः कुश्रिर्वाज्ञश्रवसो वाज्ञश्रवा ज्ञिह्वावतो बाध्यागाज्जिह्वावा बाध्योगो-
ऽसिताद्वार्षगणादसिती वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पा-
त्कश्यपाछिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या
अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूँषि वाजसनेयेन याज्ञव-
ल्क्येनाख्यायन्ते ३३ ब्राह्मणम् ५ ॥
इति काण्वीये शतपथब्राह्मणऽउपनिषन्नाम सप्तदशं काण्डं समाप्तम् १४

Reference: Caland, W., and Vira, Raghu, *The Śatapatha Brāhmaṇa in the Kāṇvīya Recension*, (Delhi: Motilal Banarsidass, 1998).

## Branch 27Q: Brāhmaṇa Vādhūla Anvākhyāna

Structure: Five Prapāṭhakas

Beginning:

कृष्णयजुर्वेदीयं वाधूल-अन्वाख्यानम् अथ प्रथमः प्रपाठकः
यज्ञेन देवाः सुवर्गं लोकमायन् तेषां मनुष्याणामक्लृप्तेन यज्ञेन यजमानानां कुसिन्धान्येव प्रावर्धन्त नान्यानि कानिचनाङ्गानि नो ह देवान् हव्यं प्राप ते देवा अब्रुवन् मनुष्या वा अक्लृप्तेन यज्ञेन यजन्ते तेनैनेन न ऋध्नुवन्ति ते वाचं ब्रुवन् व्रजतं युवं मनुष्येभ्यो यज्ञं कल्पयतमिति तौ हागत्य मनुष्यानूचतुरावं वै वो यज्ञं कल्पयिष्याव इति तेषाँ ह मनुष्याणां प्रियं बभूव १ तन्मनो वाचं प्राविशत् ततो मनुरजायत सा वाङ्मनुं प्राविशत् तत इडा मानव्यजायत स मनुरिडां प्राविशत्ततः पुरूरवा ऐडोऽजायत सेडा पुरूरवसं प्राविशत् तत उर्वश्यजायत मनुष्या ह पुरूरवसं राजानमकुर्वत गन्धर्वा होर्वशीं दुहितरमकुर्वत तौ तथा मनुष्येभ्यो यज्ञमिच्छन्तौ चेरतुः २ स ह पुरूरवा मृगयाञ्चरन्नप्सरसोऽधिजगाम तासाँ होर्वशीमेवाभिदध्यौ तां जायां चक्रे सा गर्भं दधे तं परैवास सा द्वितीयं दधे तं परैवास सा तृतीयं दधे तं परैवास सा चतुर्थं दधे सा होवाच--अयमुभयेषां देवमनुष्याणामन्नादो भविष्यति पितृष्विमञ्जनयानीति ३ सा होर्वशी पितृन् विजनितुमियाय तस्मादुतैतत् स्त्री पितृन् विजनितुमियादेतामेवानु देवविहितिम् ईश्वरो हान्नादो भवितोर्यं तत्र जनयति ४ सा होर्वशी पुमाँसं जनयाञ्चकार तस्य हायुरिति नाम दधुः तन्नु हैतदायुरायुरिति चरन्त्यायुष्मानसीत्थमसीति ५ स ह पुरूरवा आवव्राज किमुवेवान्यदित्येषोऽश्वत्थः शम्यांरूढ इति होवाच स वाव यज्ञ इति होचुः तत् सत्यँ सा यज्ञिया तनूः स वाव यज्ञः प्रत्यक्षमिति ४ स एष एवमाहृतो यज्ञः पुरूरवसा मनुष्येभ्यः ततो वै मनुष्याणां क्लृप्तेन यज्ञेन यजमानानामङ्गापरूँष्यङ्गुलिपरूँषि प्रावर्धन्त यथेमानि पुरुषस्याङ्गापरूँषि अङ्गुलिपरूँषि प्रवर्धन्त एवम् ५ तस्मान्नु ह उर्वश्यसि इत्येवाधरारणिमाददीत पुरूरवाः इत्युत्तरारणिम् घृतेनाक्ते इत्यनक्ति वृषणं दधाथामित्यवदधाति गायत्रं छन्दोऽनु प्र जायस्व इति छन्दोभिरात्मानमभि निवर्तयते त्रैष्टुभं छन्दोऽनु प्र जायस्व जागतं छन्दोऽनु प्र

Branch 27Q: Brāhmaṇa Vādhūla Anvākhyāna

Ending:

तस्मिन्वा एतस्मिन्नग्नौ संचित आदित्योऽस्तमेति यमस्मिन्नेतँ
संचितेऽग्नाविध्मं प्रहरन्ति स तत ऊर्ध्वो धूम उदेति सोऽन्तरिक्षं गच्छति तदु
हैवान्तरिक्षे संभवति स तत ऊर्ध्वो धूम उदेति स दिवं गच्छति तद्वा एतत्
सर्वेषां भूतानां प्रजननस्य रूपम् प्र हैव प्रजया पशुभिर्मिथुनैर्जायते य एवं
वेद १ इति षड्विंशोऽनुवाकः
कदो ह वा एतद्रूपं यत् स्त्रिया अथ हैतन्मनसो रूपं यत्पुँस आदित्यस्य
रूपम् तेन वा एतौ मिथुनौ संभवतः तस्यामेतद् द्वेधा विभक्तं शुक्लं
रेतोऽनुसरति प्र हैवान्यतरच्छुक्लं रेतो भवति स्तना उ हैवान्यतरच्छुक्लं रेतो
गच्छति तदु हैव क्षीरं भवति तदु हैव जातो धातुं धयते तस्माद्या विजायते
तस्या एव क्षीरं भवति सा ह्येतच्छुक्लँ रेतः प्रतिगृह्णाति अथ या न
विजायते नो हैव तस्याः क्षीरं भवति न हि सा तच्छुक्लँ रेतः प्रतिगृह्णाति
१ तन्नु हैतदेके शूलाकृतस्य निपाक्यं खादन्ति एषा वा अस्यैतद् देवता
रूपमादत्त इति वदन्तः २ शुक्रशृतँ स्यात् तत् पुमान् खादेत् कामं तु ह
स्त्री निपाक्यं खादेदात्मनैवात्मानँ समनक्ति ३ इति सप्तविंशोऽनुवाकः
सप्त च शतानि विँशतिश्चेष्टकाः प्रथमा चितिरुपधीयते अनुसंख्याता
गार्हपत्याः एवं द्वितीयैवं तृतीयैवं चतुर्थ्येवं पञ्चम्येवं षष्ठी उत्तमायां चित्यां
धिष्णियाननु संचष्टे तानि वा एतानि त्रीणि च सहस्राणि संपद्यन्ते षट् च
शतानि एतावन्तो वै पञ्चानाँ संवत्सराणामहोरात्रा यावतीरेता इष्टका
यावानग्निः संचित एतावद्भिर्हास्य यज्ञक्रतुभिरिष्टं भवति यावतीरेता इष्टका
यावानग्निः संचितो य एवंविद्वानग्निं चिनुते यस्य वैवंविद्वानग्निं चिनोति १

इत्यष्टाविंशोऽनुवाकः

इत्यग्निचयनान्वाख्यानं समाप्तम्

इति पञ्चमः प्रपाठकः

इति वाधूल अन्वाख्यानं समाप्तम्

Reference: Chaubey, Braj Bihari, *Vādhūla-Anvākhyānam*, (Hoshiarpur: Katyayan Vaidik Sahitya Prakashan, 2001).

Branch 27A: Brāhmaṇa Kāṭhaka Brāhmaṇa
Structure: Fragmentary: 7 Brāhmaṇas.
Beginning:

कठकब्राह्मणम् अग्न्याधेयब्राह्मणम्

ब्रह्मवादिनो वदन्ति पुरा वा औद्दालकिरारुणिरुवाच ब्रह्मणे त्वा प्राणाय जुष्टं निर्वपामि ब्रह्मणे त्वापानाय जुष्टं निर्वपामि ब्रह्मणे त्वा व्यानाय जुष्टं निर्वपामि ब्रह्मणे त्वा समानाय जुष्टं निर्वपामि का एता देवता यासामेवैतज्जुष्टं निर्वपत्यृचो वै ब्रह्मणः प्राण ऋचामेवैतज्जुष्टं निर्वपति यजूंषि वै ब्रह्मणोऽपानो यजुषामेवैतज्जुष्टं निर्वपति सामानि वै ब्रह्मणो व्यानः साम्नामेवैतज्जुष्टं निर्वपत्यथर्वाणो वै ब्रह्मणः समानोऽथर्वणामेवैतज्जुष्टं निर्वपति । चतुःशरावो भवति चत्वारो हीमे वेदास्तानेव भागिनः करोति मूलं वै ब्रह्मणो वेदो वेदानामेवैतन्मूलं यदृत्विजः प्राश्नन्ति तद्ब्रह्मौदनस्य ब्रह्मौदनत्वम् १

निशि चर्मन्ब्रह्मा ब्रह्मौदनं निर्वपति रक्षांसि वै देवानां यज्ञमाजिघांसंस्तानि ब्रह्मणापाघ्नत ब्रह्म ब्रह्मा ब्रह्मणैव यज्ञाद्रक्षांस्यपहन्ति । चतुःशरावो भवति चतस्रो दिशो दिग्भिरेव यज्ञाद्रक्षांस्यपहन्ति । जीवतण्डुलो भवति संपद्ध्या । अपूतो वा एषोऽमेध्योऽयज्ञियोऽनृतमूचिवान्य ऋणान्यनवदायाग्निमाधत्ते तमन्वारम्भयित्वा यद्देवा देवहेडनं यददीव्यन्नृणमहमित्येता आहुतीराज्येन जुहोति पुनात्येवैनं पूतो मेध्यो यज्ञियोऽग्निमाधत्त एकविंशतिरेता आहुती-र्जुहोत्यसा आदित्य एकविंश एष सविता स ह देवस्य सवितुः पवित्रं तेनै-वैनं सवितुः पवित्रेण पुनाति यदन्तरिक्षमित्यग्नय एवैनमेतदेनसः प्रमुञ्चन्ति संकसुको विकसुक इत्येतदेवास्मा अग्नयो यक्ष्मं चातयन्ति कृत्यां निर्ऋतिं सं वर्चसेत्याशिषमेवाशास्ते २

देवाश्च वा असुराश्चाग्न्याधेयायोपावसन्समावत्कुर्वाणा यदेव देवा अकुर्वत तदसुरा अकुर्वत ते देवा एतमोदनमासाद्यैता आहुतीराज्येनाजुहवुस्तदसुरा नान्ववायंस् ततो देवा अभवन्परासुरा अभवन्य एवं विद्वानेतमोदनमासाद्यैता आहुतीराज्येन जुहोति भ्रातृव्यस्यानन्ववायाय भवत्यात्मना परास्य भ्रातृव्यो भवति प्रवेधसे कवय इत्युक्त्वोदनस्य जुहोति देवानामेव हेडान्यवयजते चातुर्मास्यान्यालप्स्यमानस्य दीक्षिष्यमाणस्यैता आहुतीराज्येन जुहोति पुना-त्येवैनं पूतो मेध्यो यज्ञियो यजते पूतो मेध्यो यज्ञियो दीक्षते ।

Branch 27A: Brāhmaṇa Kāṭhaka Brāhmaṇa

Ending:

लोकमेत्याहुरन्यस्मिं ल्लोके समिधा प्रत्यतिष्ठन्नन्नाद्यं च ब्राह्मणे-भ्योऽपासरँस्तेभ्योऽब्रुवन्नग्नौ कुर्माग्नौ करिष्याम्यग्नौ करवाणीति तेऽब्रुवन्कुरुत कुरुष्व क्रियतामिति यं कामयेत प्रजावान्स्यादिति तस्य यज्ञे कुरुतेति ब्रूयाद्यं कामयेत पशुमान्स्यादिति तस्य यज्ञे कुरुष्वेति ब्रूयाद्यं कामयेत वसीया-न्स्यादिति तस्य यज्ञे क्रियतामिति ब्रूयादग्नीषोमीयं वा एतद्धविर्यदग्नौकरण-मग्नीषोमीयेनैवेतद्धव्येनास्मिं ल्लोके यजमानो वसीयान्भवति ३

मनो वा एष युङ्क्ते यो यक्ष्यमाणो युङ्क्ते नहि मनसा यज्ञस्तायते स यज्ञो भवत्यथ श्रद्धत्ते श्रद्दधानं वे पितरोऽन्वायन्ति वृद्धिं श्रुत्वा यद्वृद्धिश्राद्धं कुर्वन्ति तेनास्य तेऽभीष्टाः प्रीता भवन्तीन्द्रो वे प्रजाकामः पितृयज्ञेनायजत्तस्यासुरा यज्ञमजि-घांसँस्तान्विश्वे देवा उपाघ्नन्यद्वैश्वदेवं पुरस्तात्कुर्वन्त्यसुराणामपहत्यै प्राचीन-प्रवणे देयं प्राचीनप्रवणो वे वज्रो वज्रेणैव यज्ञाद्रक्षांस्यपहन्ति दक्षिणाग्रा-श्चोदगग्राश्च दर्भा भवन्ति दक्षिणाग्रेभिर्वा अस्य पितरः समुपसरन्त्युदगग्रेभि-र्देवास्तस्माद्ब्राह्मणेभ्य आवृत्ता दर्भाः प्रदीयन्ते पितॄणामुपसरत्वायेवमस्य पितरः समुपसरन्त्यन्तर्हिता ह्यमुष्मादादित्यत्पितरोऽथो अन्तर्हिता हि देवेभ्यश्च मनुष्येभ्यश्च पितर उपमूलं बर्हिर्दाति तेन पितॄणां यदृतेमूलं तेन देवानामुभये हीज्यन्तेऽन्तर्हिता हि वीक्षया मनुष्यस्यैवमिव हि तेऽन्तर्हिता भवन्ति ४

इति श्राद्धब्राह्मणम्

मेखलाब्राह्मणम्

इयं दुरुक्तात्परिबाधमान इति दुरुक्ता वर्जयित्वा परिबाधन्ते वर्णं पवित्रं पुनती न आगादित्यपो वे वर्णमेव पवित्रमलं करोति प्राणापानाभ्यां बलमाहजन्तीति प्राणेवेपानाभ्यां बलं दधाति सुखा देवी सुभगा मेखलेयमित्याशिषमेवाशास्ते सौभाग्यं वे सुखा देवी दधाति सहस्रमावि प्रतिरन्त आयुः

इति मेखलाब्राह्मणम्

Reference: Caland, W., "Brāhmaṇa- en Sūtra-Aanwinsten," (*Verslagen en Mededelingen der Koninklijke Nederlandsche Akademie van Wetenschappen*, Afd. Letterkunde, 5. Reeks, Deel iv, 1920), pp. 461-498.

## Branch 28A: Itihāsa Vālmīki Rāmāyaṇa

Structure: Seven main divisions, called Kāṇḍas.

Beginning:

रामायणस्य बालकाण्डम् प्रथमः सर्गः

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम्
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम् १
को न्वस्मिन्साप्रतं लोके गुणवान्कश्च वीर्यवान्
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः २
चारित्रेण च को युक्तः सर्वभूतेषु को हितः
विद्वान्कः कः समर्थश्च कश्चैकप्रियदर्शनः ३
आत्मवान्को जितक्रोधो मतिमान्कोऽनसूयकः
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ४
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ५
श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ६
बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ७
इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः
नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी ८
बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्छत्रुनिबर्हणः
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ९
महोरस्को महेष्वासो गूढजत्रुररिंदमः
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः १०
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान्
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ११
धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः
यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् १२
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता

Branch 28A: Itihāsa Vālmīki Rāmāyaṇa

Ending:

तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः
लोकान्सान्तानिकान्नाम यास्यन्तीमे समागताः १६
यच्च तिर्यग्गतं किंचिद्राममेवानुचिन्तयत्
प्राणांस्त्यक्ष्यति भक्त्या वै संताने तु निवत्स्यति
सर्वैरेव गुणैर्युक्ते ब्रह्मलोकादनन्तरे १७
वानराश्च स्वकां योनिमृक्षाश्चैव तथा ययुः १८
येभ्यो विनिःसृता ये ये सुरादिभ्यः सुसंभवाः
ऋषिभ्यो नागयक्षेभ्यस्तांस्तानेव प्रपेदिरे १९
तथोक्तवति देवेशे गोप्रतारमुपागताः
भेजिरे सरयूं सर्वे हर्षपूर्णाश्रुविक्लवाः २०
अवगाह्य जलं यो यः प्राणी ह्यासीत्प्रहृष्टवत्
मानुषं देहमुत्सृज्य विमानं सोऽध्यरोहत २१
तिर्यग्योनिगताश्चापि संप्राप्ताः सरयूजलम्
दिव्या दिव्येन वपुषा देवा दीप्ता इवाभवन् २२
गत्वा तु सरयूतोयं स्थावराणि चराणि च
प्राप्य तत्तोयविक्लेदं देवलोकमुपागमन् २३
देवानां यस्य या योनिर्वानरा ऋक्षराक्षसाः
तामेव विविशुः सर्वे देहान्निक्षिप्य चाम्भसि २४
तथा स्वर्गगतं सर्वं कृत्वा लोकगुरुर्दिवम्
जगाम त्रिदशैः सार्धं हृष्टैर्हृष्टो महामतिः २५
एतावदेव आख्यानं सोत्तरं ब्रह्मपूजितम्
रामायणमिति ख्यातं मुख्यं वाल्मीकिना कृतम् २६
इति श्रीरामायणे उत्तरकाण्डे शततमः सर्गः १००
समाप्तं उत्तरकाण्डम्

Reference: Vasishth, Shivram Sharma, *Śrimadvālmīkirāmāyaṇa of Maharṣi Vālmīki*, (Varanasi: Chowkhamba Vidyabhawan, 1982).

## Branch 28B: Itihāsa Mahābhārata

Structure: 18 Parvas

Beginning:

महाभारत आदिपर्व श्रीगणेशाय नमः अथ प्रथमोऽध्यायः
ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
देवीं सरस्वतीं चैव ततो जयमुदीरयेत्
लोमहर्षणपुत्र उग्रश्रवाः सूतः पौराणिको
नैमिषारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे १
समासीनानभ्यगच्छद्ब्रह्मर्षीन् संशितव्रतान्
विनयावनतो भूत्वा कदाचित् सूतनन्दनः २
तमाश्रममनुप्राप्तं नैमिषारण्यवासिनः
चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ३
अभिवाद्य मुनींस्तांस्तु सर्वानेव कृताञ्जलि
अपृच्छत्स तपोवृद्धिं सद्भिश्चैवाभिनन्दितः ४
अथ तेषूपविष्टेषु सर्वेष्वेव तपस्विषु
निर्दिष्टमासनं भेजे विनयाल्लोमहर्षणिः ५
सुखासीनं ततस्तंतु विश्रान्तमुपलक्ष्य च
अथापृच्छदृषिस्तत्र कश्चित्प्रस्तावयन्कथाः ६
कुत आगम्यते सौते क्व चायं विहृतस्त्वया
कालः कमलपत्राक्ष शंसैतत्पृच्छतो मम ७
सूत उवाच
जनमेजयस्य राजर्षेः सर्पसत्रे महात्मनः
समीपे पार्थिवेन्द्रस्य सम्यक्पारिक्षितस्य च ८
कृष्णद्वैपायनप्रोक्ताः सुपुण्या विविधाः कथाः
कथिताश्चापि विधिवद्या वैशंपायनेन वै ९
श्रुत्वाहं ता विचित्रार्था महाभारतसंश्रिताः
बहूनि संपरिक्रम्य तीर्थान्यायतनानि च १०
समन्तपञ्चकं नाम पुण्यं द्विजनिषेवितम्
गतवानस्मि तं देशं युद्धं यत्राभवत्पुरा

Branch 28B: Itihāsa Mahābhārata

Ending:

स नरः पापनिर्मुक्तः कीर्तिं प्राप्येह शौनक
गच्छेत्परमिकां सिद्धिमत्र मे नास्ति संशयः ४४
भारताध्ययनात्पुण्यादपि पादमधीयतः
श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ४५
महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा
श्लोकैश्चतुर्भिर्भगवान्पुत्रमध्यापयच्छुकम् ४६
मातापितृसहस्राणि पुत्रदारशतानि च
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ४७
हर्षस्थानसहस्राणि भयस्थानशतानि च
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ४८
ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ४९
न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः
नित्यो धर्मः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ५०
इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत्
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ५१
यथा समुद्रो भगवान्यथा च हिमवान्गिरिः
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ५२
महाभारतमाख्यानं यः पठेत्सुसमाहितः
स गच्छेत्परमां सिद्धिमिति मे नास्ति संशयः ५३
द्वैपायनोष्ठपुटनिःसृतमप्रमेयं पुण्यं पवित्रमथ पापहरं शिवं च
यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजलैरभिषेचनेन ५४

इति श्रीमहाभारते स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः ५

इति स्वर्गारोहणपर्व समाप्तम् इति श्रीमहाभारतं सम्पूर्णम्

Reference: Sukthankar, V.S.; Sakthankar, Vishnu Sitaram; Belvalkar, Shripad Krishna; and Vaidya, Parasurama Lakshmana, *The Mahābhārata*, 19 vols., (Poona: Bhandarkar Oriental Research Institute, 1927-1966).

Branch 28C: Itihāsa Śhrīmad Bhagavad Gītā
Structure: 18 Chapters
Beginning:

श्रीमद् भगवद् गीता प्रथमोऽध्यायः धृतराष्ट्र उवाच
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः
मामकाः पाण्डवाश्चैव किमकुर्वत संजय १
संजय उवाच
दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा
आचार्यमुपसंगम्य राजा वचनमब्रवीत् २
पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ३
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि
युयुधानो विराटश्च द्रुपदश्च महारथः ४
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ५
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६
अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ७
भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ८
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ९
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् १०
अयनेषु च सर्वेषु यथाभागमवस्थिताः
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ११
तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् १२

Branch 28C: Itihāsa Śhrīmad Bhagavad Gītā

Ending:

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः
भविता न च मे तस्मादन्यः प्रियतरो भुवि ६९
अध्येष्यते च य इमं धर्म्यं संवादमावयोः
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ७०
श्रद्धावाननसूयश्च शृणुयादपि यो नरः
सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ७१
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ७२

अर्जुन उवाच

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ७३

संजय उवाच

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ७४
व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम्
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ७५
राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम्
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ७७
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८
ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः १८

Reference: *Srimad-Bhagavad-gita*, (Gorakpur: Gita Press, 1925).

## Branch 28D: Itihāsa _Rāmopākhyāna

Structure: Chapters 258 to 275 of the Āraṇyaka Parva

Beginning:

मार्कण्डेय उवाच
प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ
रक्षसा जानकी तस्य हृता भार्या बलीयसा १
आश्रमाद्राक्षसेन्द्रेण रावणेन विहायसा
मायामास्थाय तरसा हत्वा गृध्रं जटायुषम् २
प्रत्याजहार तां रामः सुग्रीवबलमाश्रितः
बद्ध्वा सेतुं समुद्रस्य दग्ध्वा लङ्कां शितैः शरैः ३
युधिष्ठिर उवाच
कस्मिन्रामः कुले जातः किंवीर्यः किंपराक्रमः
रावणः कस्य वा पुत्रः किं वैरं तस्य तेन ह ४
एतन्मे भगवन्सर्वं सम्यगाख्यातुमर्हसि
श्रोतुमिच्छामि चरितं रामस्याक्लिष्टकर्मणः ५
मार्कण्डेय उवाच
अजो नामाभवद्राजा महानिक्ष्वाकुवंशजः
तस्य पुत्रो दशरथः शश्वत्स्वाध्यायवाञ्शुचिः ६
अभवंस्तस्य चत्वारः पुत्रा धर्मार्थकोविदाः
रामलक्ष्मणशत्रुघ्ना भरतश्च महाबलः ७
रामस्यमाता कौसल्या कैकेयी भरतस्य तु
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायाः परंतपौ ८
विदेहराजो जनकः सीता तस्यात्मजा विभो
यां चकार स्वयं त्वष्टा रामस्य महिषीं प्रियाम् ९
एतद्रामस्य ते जन्म सीतायाश्च प्रकीर्तितम्
रावणस्यापि ते जन्म व्याख्यास्यामि जनेश्वर १०
पितामहो रावणस्य साक्षाद्देवः प्रजापतिः
स्वयंभूः सर्वलोकानां प्रभुः स्रष्टा महातपाः ११
पुलस्त्यो नाम तस्यासीन्मानसो दयितः सुतः

Branch 28D: Itihāsa Rāmopākhyāna

Ending:

यथागतेन मार्गेण प्रययौ स्वपुरं प्रति ५८
अयोध्यां स समासाद्य पुरीं राष्ट्रपतिस्ततः
भरताय हनूमन्तं दूतं प्रस्थापयत्तदा ५९
लक्षयित्वेङ्गितं सर्वं प्रियं तस्मै निवेद्य च
वायुपुत्रे पुनः प्राप्ते नन्दिग्राममुपागमत् ६०
स तत्र मलदिग्धाङ्गं भरतं चीरवाससम्
अग्रतः पादुके कृत्वा ददर्शासीनमासने ६१
समेत्य भरतेनाथ शत्रुघ्नेन च वीर्यवान्
राघवः सहसौमित्रिर्मुमुदे भरतर्षभ ६२
तथा भरतशत्रुघ्नौ समेतौ गुरुणा तदा
वैदेह्या दर्शनेनोभौ प्रहर्षं समवापतुः ६३
तस्मै तद्भरतो राज्यमागतायाभिसत्कृतम्
न्यासं निर्यातयामास युक्तः परमया मुदा ६४
ततस्तं वैष्णवे शूरं नक्षत्रेऽभिमतेऽहनि
वसिष्ठो वामदेवश्च सहितावभ्यषिञ्चताम् ६५
सोऽभिषिक्तः कपिश्रेष्ठं सुग्रीवं ससुहृज्जनम्
विभीषणं च पौलस्त्यमन्वजानाद्गृहान्प्रति ६६
अभ्यर्च्य विविधै रत्नैः प्रीतियुक्तौ मुदा युतौ
समाधायेतिकर्तव्यं दुःखेन विससर्ज ह ६७
पुष्पकं च विमानं तत्पूजयित्वा स राघवः
प्रादाद्वैश्रवणायैव प्रीत्या स रघुनन्दनः ६८
ततो देवर्षिसहितः सरितं गोमतीमनु
दशाश्वमेधानाजह्रे जारूथ्यान्स निरर्गलान् ६९
इति श्रीमहाभारते आरण्यकपर्वणि पञ्चसप्तत्यधिक द्विशततमोऽध्यायः २७५

Reference: Chapters 258 to 275 of the Āraṇyaka Parva.[Mbh 3, 258-275, : Nooten, Barend A. Van: The Rāmopākhyāna and the Rāmāyaṇa [Engl.]. In: IT 8-9, 1980-1981: Dr. Ludwik Sternbach commemoration volume ... 1981. - pp. 293-305.]

## Branch 28E: Itihāsa Viṣhṇu Saharanāma Stotram

Structure: Introduction, 1000 Names, and Conclusion.

Beginning:

श्री विष्णुसहस्रनामस्तोत्रम्

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये १
नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
देवीं सरस्वतीं चैव ततो जयमुदीरयेत्
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् २
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ३
अविकाराय शुद्धाय नित्याय परमात्मने
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ४
यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ५

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य । श्रीवेदव्यासो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता । अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनः स्रष्टेति शक्तिः । उद्भवः क्षोभणो देव इति परमो मन्त्रः । शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इति नेत्रम् । त्रिसामा सामगः सामेति कवचम् । आनन्दं परंब्रह्मेति योनिः । ऋतुस्सुदर्शनः काल इति दिग्बन्धः । श्रीविश्वरूप इति ध्यानम् । श्रीमहाविष्णुप्रीत्यर्थे सहस्रनामस्तोत्रपाठे विनियोगः ॥

ध्यानम्

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैः
आनन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः १

Branch 28E: Itihāsa Viṣhṇu Sahasranāma Stotram

Ending:

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ९९
अनन्तरूपोऽनन्तश्रीः जितमन्युर्भयापहः
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः १००
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः
जननो जनजन्मादिर्भीमो भीमपराक्रमः १०१
आधारनिलयोऽधाता पुष्पहासः प्रजागरः
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः १०२
प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः १०३
भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः १०४
यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च १०५
आत्मयोनिः स्वयंजातो वैखानः सामगायनः
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः १०६
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः १०७
वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी
श्रीमान्नारायणो विष्णुर्वासुदेवोऽभिरक्षतु १०८
नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः १०९
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ११०

Reference: Swami Vimalananda, *Sri Vishnu Sahasranama Stotram*, (Tirupparaitturai: Sri Ramakrishna Tapovanam, 1978).

Branch 28F: Itihāsa Harivaṃśha
Structure: 118 chapters, divided among three Parvas
Beginning:

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥
शौनक उवाच ।
सौते सुमहदाख्यानं भवता परिकीर्तितम् ।
भारतानां च सर्वेषां पार्थिवानां तथैव च १
देवानां दानवानां च गन्धर्वोरगरक्षसाम् ।
दैत्यानामथ सिद्धानां गुह्यकानां तथैव च २
अत्यद्भुतानि कर्माणि विक्रमा धर्म निश्चयाः ।
विचित्राश्च कथायोगा जन्म चाग्र्यमनुत्तमम् ३
कथितं भवता पुण्यं पुराणं श्लक्ष्णया गिरा ।
मनःकर्णसुखं तन्मां प्रीणात्यमृतसंमितम् ४
तत्र जन्म कुरूणां वै त्वयोक्तं लोमहर्षणे ।
न तु वृष्ण्यन्धकानां वै तद्भवान्प्रब्रवीतु मे ५
सूत उवाच ।
जनमेजयेन यत्पृष्टः शिष्यो व्यासस्य धीमतः ।
तत्तेऽहं संप्रवक्ष्यामि वृष्णीनां वंशमादितः ६
श्रुत्वेतिहासं कार्त्स्न्येन भरतानां स भारतः ।
जनमेजयो महाप्राज्ञो वैशंपायनमब्रवीत् ७
महाभारतमाख्यानं बह्वर्थं बहुविस्तरम्
कथितं भवता विप्र विस्तरेण मया श्रुतम् ८
तत्र शूराः समाख्याता बहवः पुरुषर्षभाः
नामभिः कर्मभिश्चैव वृष्ण्यन्धकमहारथाः ९
तेषां कर्मावदातानि त्वयोक्तानि द्विजोत्तम
तत्र तत्र समासेन विस्तरेणैव चाभिभो १०
न च मे तृप्तिरस्तीह कीर्त्यमाने पुरातने
एकश्च मे मतो राशिर्वृष्णयः पाण्डवास्तथा ११

Branch 28F: Itihāsa Harivaṃśha

Ending:

न च विरमति विप्रपूजनान्न च विनिवर्तति यज्ञशीलनात्
न च विषयपरिरक्षणाच्चयुतोऽसौ न च परिगर्हति वपुष्टमां च ४१
विधिविहितमशक्यमन्यथा हि कर्तुं यदृषिरचिन्त्यतपाः पुराब्रवीत्सः
इति नरपतिरात्मवांस्तदासौ तदनुविचिन्त्य बभूव वीतमन्युः ४२
इदं महाकाव्यमृषेर्महात्मनः पठन्नृणां पूज्यतमो भवेन्नरः
प्रकृष्टमायुः समवाप्य दुर्लभं लभेत सर्वज्ञफलं च केवलम् ४३
शतक्रतोः कल्मषविप्रमोक्षणं पठन्निदं मुच्यति कल्मषान्नरः
तथैव कामान्विविधान्समश्नुते समाप्तकामश्च चिराय नन्दति ४४
यथा हि पुष्पप्रभवं फलं द्रुमात्ततः प्रजायन्ति पुनश्च पादपाः
तथा महर्षिप्रभवा इमा गिरः प्रवर्धयन्ते तमृषिं प्रवर्तिताः ४५
पुत्रानपुत्रो लभते सुवर्चसश्च्युतः पुनर्विन्दति चात्मनः स्थितिम्
व्याधिं न चाप्नोति चिरं च बन्धनं क्रियां च पुण्यां लभते गुणान्वितः ४६
पतिमुपलभते च सत्सु कन्या श्रवणमुपेत्य शुभा मुनेस्तु वाचः
जनयति च सुतान्गुणैरुपेतान्रिपुजनमर्दनवीर्यशालिनश्च ४७
विजयति वसुधां च क्षत्रवृत्तिर्धनमतुलं लभते द्विषज्जयं च
विपुलमपि धनं लभेच्च वैश्यः सुगतिमियाच्छ्रवणाच्च शूद्रजातिः ४८
पुराणमेतच्चरितं महात्मनामधीत्य बुद्धिं लभते च नैष्ठिकीम्
विहाय दुःखानि विमुक्तसङ्गः स वीतरागो विचरेद्वसुंधराम् ४९
इत्येतदाख्यानमुदाहृतं वः प्रतिस्मरन्तो द्विजमण्डलेषु
स्थैर्येण जातेन पुनः स्मरन्तः सुखं भवन्तो विचरन्तु लोकम् ५०
इति चरितमिदं महात्मनामृषिकृतमद्भुतवीर्यकर्मणाम्
कथितमिदं हि समासविस्तरैः किमपरमिच्छसि किं ब्रवीमि ते ५१
इति श्रीहरिवंशे अष्टादशोत्तरशततमोऽध्यायः ११८
समाप्तं भविष्यपर्व । समाप्तो हरिवंशः

Reference: Vaidya, Parashuram Lakshman, *The Harivaṃśa, being the Khila or supplement to the Mahābhārata*, (Poona: Bhandarkar Oriental Research Institute, 1969).

Branch 29A: Purāṇa (01) Bhāgavata Mahāpurāṇa
Structure: Twelve Skandhas
Beginning:
श्रीमद्भागवतमहापुराणम् । प्रथमः स्कन्धः । अथ प्रथमोऽध्यायः
जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि १
धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् २
निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम्
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ३
नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः
सत्रं स्वर्गाय लोकाय सहस्रसममासत ४
त एकदा तु मुनयः प्रातर्हुतहुताग्नयः
सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ५
ऋषय ऊचुः
त्वया खलु पुराणानि सेतिहासानि चानघ
आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ६
यानि वेदविदां श्रेष्ठो भगवान्बादरायणः
अन्ये च मुनयः सूत परावरविदो विदुः ७
वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात्
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ८
तत्र तत्राञ्जसाऽऽयुष्मन्भवता यद्विनिश्चितम्
पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ९

Branch 29A: Purāṇa (01) Bhāgavata Mahāpurāṇa

Ending:

तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् १५
निम्नगानां यथा गङ्गा देवानामच्युतो यथा
वैष्णवानां यथा शंभुः पुराणानामिदं तथा १६
क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा
तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः १७
श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ।
तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृणवन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः १८
कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा
योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतस्
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि १९
नमस्तस्मै भगवते वासुदेवाय साक्षिणे
य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे २०
योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे
संसारसर्पदष्टं यो विष्णुरातममूमुचत् २१
भवे भवे यथा भक्तिः पादयोस्तव जायते
तथा कुरुष्व देवेश नाथस्त्वं नो यतः प्रभो २२
नामसङ्कीर्तनं यस्य सर्वपाप प्रणाशनम्
प्रणामो दुःखशमनस्तं नमामि हरिं परम् २३
इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्त्र्यां पारमहंस्यां
संहितायां द्वादशस्कन्धे त्रयोदशोऽध्यायः १३
इति द्वादशः स्कन्धः समाप्तः ।

Reference: Goswami, C.L., *Srīmad Bhāgavata Mahāpurāṇa with Sanskrit text and English translation*, 2 vols., (Gorkhapur: Gita Press, 1982).

## Branch 29A: Purāṇa (02) Padma Purāṇa

Structure: Seven Khaṇḍas

Beginning:

श्रीपद्मपुराणम् सृष्टिखण्डम् प्रथमोऽध्यायः श्रीविष्णवेनमः
स्वच्छंचंद्रावदातंकरिकरमकरक्षोभसंजातफेनं
ब्रह्मोद्भूतिप्रसक्तैर्व्रतनियमपरैः सेवितंविप्रमुख्यैः
कारालंकृतेनत्रिभुवनगुरुणाब्रह्मणादृष्टिपूतं
संभोगाभोगरम्यंजलमशुभहरंपौष्करं वःपुनातु १
सूतमेकांतमासीनंव्यासशिष्यंमहामतिः
लोमहर्षणनामावाउग्रश्रवसमाहतत् २
ऋषीणामाश्रमांस्तातगत्वाधर्मान्समासतः
पृच्छतांविस्तराद्ब्रूहियन्मत्तःश्रुतवानसि ३
वेदव्यासान्मयापुत्रपुराणान्यखिलानिच
तवाख्यातानिप्राप्तानिमुनिभ्योवदविस्तरात् ४
प्रयागेमुनिवर्यैश्चयथापृष्टःस्वयंप्रभुः
पृष्टेनचानुशिष्टास्तेमुनयोधर्मकांक्षिणः ५
देशंपुण्यमभीप्संतोविभुनाचहितैषिणा
सुनाभंदिव्यरूपंचसत्यगंशुभविक्रमं ६
अनौपम्यमिदंचक्रंवर्तमानमतंद्रिताः
पृष्टतोयातनियमात्पदंप्राप्स्यथयद्धितम् ७
गच्छतोधर्मचक्रस्ययत्रनेमिर्विशीर्यते
पुण्यःसदेशोमंतव्यइत्युवाचस्वयंप्रभुः ८
उक्त्वाचैवमृषीन्सर्वानदृश्यत्वमगात्पुनः
गंगावर्तसमाहारोनेमिर्यत्रव्यशीर्यत ९
ईजिरेदीर्घसत्रेणऋषयोनैमिषेतदा
तत्रगत्वातुतान्ब्रूहिपृच्छतोधर्मसंशयान् १०
उग्रश्रवास्ततोगत्वाज्ञानविन्मुनिपुंगवान्
अभिगम्योपसंगृह्यनमस्कृत्वाकृतांजलि ११
तोषयामासमेधावीप्रणिपातेनतानृषीन्

Branch 29A: Purāṇa (02) Padma Purāṇa

Ending:

व्यास उवाच-
यत्किंचित्कुरुतेकर्ममर्त्योधर्मंकलौयुगे ४६
तदर्पयेन्महाविष्णौभक्तिभावसमन्वितः
विष्णौसमर्पितंकर्मसर्वमेवाक्षयंभवेत् ४७
व्यासउवाच-
इतितेकथितंसर्ववृत्तंब्राह्मणसत्तम
यच्छ्रुत्वाभक्तिभावेननरोमोक्षमवाप्नुयात् ४८
सूतउवाच-
एवंप्रबोधितस्तेनजैमिनिः परमात्मना
क्रियायोगरतोभूत्वाजगामपरमंपदम् ४९
इमंक्रियायोगसारंव्यासेनोक्तंमहात्मना
येपठंतिजनाभक्त्याशृण्वंतिचमुमुक्षवः ५०
तेसर्वेपातकैर्घोरैर्बहुजन्मार्जितैरपि
विमुक्ताःपरमांमुक्तिंलभंतेनात्रसंशयः ५१
यद्यदिष्टंपठंत्येतच्छृण्वन्तिचमुमुक्षवः
लभंतेतत्तदेवाशुप्रसादात्कमलापतेः ५२
श्लोकार्द्धंश्लोकमेकंवाश्लोकपादमथापिवा
नरःपठित्वा श्रुत्वाचलभतेवांछितंफलम् ५३
लिखित्वालेखयित्वावायः शास्त्रमिदमर्चयेत्
सविष्णुपूजनस्यैवफलंप्राप्नोतिमानवः ५४
इदमतिशयगुह्यंनिःसृतंव्यासवक्त्राद्द्रुद्रिर्चिरतरपुराणंप्रीतिदंवैष्णवानाम्
चिरममरवराद्यैर्वंदितांघ्रेर्मुरारेःसकलभुवनभर्त्तुश्चक्रिणः प्रीतयेऽस्तु ५५
इति श्रीपद्मपुराणेक्रियायोगसारखण्डेव्यासजैमिनिसंवादेयुगधर्मनिरूपण
पूर्वकंपुराणमाहात्म्यवर्णननामषड्विंशतितमोऽध्यायः २६

Reference: Vyasa, Krsnadvaipayana, *Padma Puranam*, (Calcutta: More Pracya Sodha Sanisthana, 1957).

# Branch 29A: Purāṇa (03) Brahma Purāṇa

Structure: 246 Chapters.

Beginning:

ब्रह्मपुराणम् प्रथमोऽध्यायः तत्रादौ नैमिषारण्यवर्णनम्
यस्मात्सर्वमिदं प्रपञ्चरचितं मायाजगज्जायते
यस्मिंस्तिष्ठति याति चान्तसमये कल्पानुकल्पे पुनः
यं ध्यात्वा मुनयः प्रपञ्चरहितं विन्दन्ति मोक्षं ध्रुवं
तं वन्दे पुरुषोत्तमाख्यममलं नित्यं विभुं निश्चलम् १
यं ध्यायन्ति बुधाः समाधिसमये शुद्धं वियत्संनिभम्
नित्यानन्दमयं प्रसन्नममलं सर्वेश्वरं निर्गुणम्
व्यक्ताव्यक्तपरं प्रपञ्चरहितं ध्यानैकगम्यं विभुम्
तं संसारविनाशहेतुमजरं वन्दे हरिं मुक्तिदम् २
सुपुण्ये नैमिषारण्ये पवित्रे सुमनोहरे
नानामुनिजनाकीर्णे नानापुष्पोपशोभिते ३
सरलैः कर्णिकारैश्च पनसैर्धवखादिरैः
आम्रजम्बूकपित्थैश्च न्यग्रोधैर्देवदारुभिः ४
अश्वत्थैः पारिजातैश्च चन्दनागुरुपाटलैः
बकुलैः सप्तपर्णैश्च पुंनागैर्नागकेशरैः ५
शालैस्तालैस्तमालैश्च नारिकेलैस्तथार्जुनैः
अन्यैश्च बहुभिर्वृक्षैश्चम्पकाद्यैश्च शोभिते ६
नानापक्षिगणाकीर्णे नानामृगगणैर्युते
नानाजलाशयैः पुण्यैर्दीर्घिकाद्यैरलंकृते ७
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च जातिभिः
वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः ८
संपन्नैर्गोकुलैश्चैव सर्वत्र समलंकृते
यवगोधूमचणकैर्माषमुद्गतिलेक्षुभिः ९
चीनकाद्यैस्तथा मेध्यैः शस्यैश्चान्यैश्च शोभिते
तत्र दीप्ते हुतवहे हूयमाने महामखे १०
यजतां नैमिषेयाणां सत्रे द्वादशवार्षिके

Branch 29A: Purāṇa (03) Brahma Purāṇa

Ending:

वैश्यैश्चानुदिनं विशुद्धकुलजैः शूद्रैस्तथा धार्मिकैः
श्रोतव्यं त्विदमुत्तमं बहुफलं धर्मार्थमोक्षप्रदम् ३५
धर्मे मतिर्भवतु वः पुरुषोत्तमानां
स ह्येक एव परलोकगतस्य बन्धुः
अर्थाः स्त्रियश्च निपुणैरपि सेव्यमाना
नैव प्रभावमुपयान्ति न च स्थिरत्वम् ३६
धर्मेण राज्यं लभते मनुष्यः
स्वर्गं च धर्मेण नरः प्रयाति
आयुश्च कीर्तिं च तपश्च धर्मं
धर्मेण मोक्षं लभते मनुष्यः ३७
धर्मोऽत्र मातापितरौ नरस्य
धर्मः सखा चात्र परे च लोके
त्राता च धर्मस्त्विह मोक्षदश्च
धर्मादृते नास्ति तु किंचिदेव ३८
इदं रहस्यं श्रेष्ठं च पुराणं वेदसंमितम्
न देयं दुष्टमतये नास्तिकाय विशेषतः ३९
इदं मयोक्तं प्रवरं पुराणं
पापापहं धर्मविवर्धनं च
श्रुतं भवद्भिः परमं रहस्यम्
आज्ञापयध्वं मुनयो व्रजामि ४०

इति श्रीमहापुराणे आदिब्राह्मे रोमहर्षणमुनिसंवादे पुराणप्रशंसनं नाम
षट्चत्वारिंशदधिकद्विशततमोऽध्यायः २४६
समाप्तमिदमादिब्राह्माभिधं महापुराणम्
ॐतत्सद्ब्रह्मार्पणमस्तु

Reference: *Brahmamahāpurāṇam*, (Delhi: Nag, 1985).

Branch 29A: Purāṇa (04) Viṣhṇu Purāṇa

Structure: Six Khaṇḍas

Beginning:

विष्णुपुराणम् । प्रथमः खण्डः । प्रथमोऽध्यायः ।
ॐ नमो भगवते वासुदेवाय ।
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज १
पदक्षर ब्रह्म य ईश्वरः पुमान् गुणोर्म्मिसृष्टिस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः २
प्रणम्य विष्णुं विश्वेशं ब्रह्मादीन् प्रणिपत्य च ।
गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसम्मितम् ३
इतिहासपुराणज्ञं वेदवेदाङ्गपारगम् ।
धर्मशास्त्रादितत्त्वज्ञं वशिष्ठतनयात्मजम् ४
पराशरं मुनिवरं कृतपूर्वाह्णिकक्रियम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ५
त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो ।
धर्मशास्त्राणि सर्व्वाणि वेदाङ्गानि यथाक्रमम् ६
त्वत्प्रसादान्मुनिश्रेष्ठ मामन्ये नाकृतश्रमम् ।
वक्ष्यन्ते सर्वशास्त्रेषु प्रायशो येऽपि विद्विषः ७
सोऽहमिच्छामि धर्म्मज्ञ श्रोतुं त्वत्तो यथा जगत्
बभूव भूयश्च यथा महाभाग भविष्यति ८
यन्मयञ्च जगद्ब्रह्मन् यतश्चैतच्चराचरम्
लीनमासीद्यथा यत्र लयमेष्यति यत्र च ९
यत्प्रमाणानि भूतानि देवादीनाञ्च सम्भवम्
समुद्रपर्वतानां च संस्थानञ्च तथा भुवः १०
सूर्य्यादीनाञ्च संस्थानं प्रमाणं मुनिसत्तम
देवादीनां तथा वंशान् मनून् मन्वन्तराणि च ११
कल्पान् कल्पविकल्पांश्च चतुर्युगविकल्पितान्
कल्पान्तस्य स्वरूपञ्च युगधर्मांश्च कृत्स्नशः १२

Branch 29A: Purāṇa (04) Viṣhṇu Purāṇa

Ending:

यज्ञैर्यज्ञविदो यजन्ति सततं यज्ञेश्वरं कर्म्मिणो
यं यं ब्रह्ममयं परापरमयं ध्यायन्ति च ज्ञानिनः ।
यञ्च प्राप्य न जायते न म्रियते नो वर्द्धते हीयते
नैवासन्न च सद्भवत्यति ततः किं वा हरेः श्रूयताम् ५६
कव्यं यः पितृरूपधृग्विधिहुतं हव्यञ्च भुङ्क्ते प्रभुर्देवत्वे भगवाननादिनिधनः
स्वाहास्वधासंज्ञितम् ।
यस्मिन् ब्रह्मणि सर्व्वशक्तिनिलये यानानि नो मानिनाम्
निष्ठायै प्रभवन्ति हन्ति कलुषे श्रोत्रं स यातो हरिः ५७
नान्तोऽस्ति यस्य न च यस्य समुद्भवोऽस्ति
वृद्धिर्न यस्य परिणामविवर्जितस्य ।
नापक्षयञ्च समुपैत्यविकल्पवस्तु यस्तं नतोऽस्मि पुरुषोत्तममाद्यमीशम् ५८
तस्यैव योऽनुगुणभुग्बहुधैक एव
शुद्धोऽप्यशुद्ध इव मूर्त्तिविभागभेदैः ।
ज्ञानान्वितः सकलसत्त्वविभूतिकर्त्ता
तस्मै नतोऽस्मि पुरुषाय सदाव्ययाय ५९
ज्ञानप्रवृत्तिनियमैक्यमयाय पुंसो
भोगप्रदानपटवे त्रिगुणात्मकाय ।
अव्याकृताय भवभावनकारणाय
वन्दे स्वरूपमभवाय सदाजराय ६०
व्योमानिलाग्निजलभूरचनामयाय शब्दादिभोगविषयोपनयक्षमाय ।
पुंसः समस्तकरणैरुपकारकाय व्यक्ताय सूक्ष्मविमलाय सदा नतोऽस्मि ६१
इति विविधमजस्य यस्य रूपं प्रकृतिपरात्ममयं सनातनस्य ।
प्रदिशतु भगवानशेषपुंसां हरिरपजन्मजरादिकां स सिद्धिम् ६२
समाप्तमिदं श्रिविष्णुपुराणम् ।

Reference: Wilson, H.H., *The Viṣṇu Purāṇa: A system of Hindu mythology and tradition*, 2 vols. (Delhi: Nag, 1980).

Branch 29A: Purāṇa (05) Śhiva Purāṇa
Structure: Seven Saṃhitās, and a total of 416 chapters
Beginning:

श्री शिवपुराण । विद्येश्वरसंहिता ।
आद्यन्तमंगलमजातसमानभावनार्यतमीशमजरामरमात्मदेवम् ।
पंचाननं म्प्रबलपंचविनोदशीलंसं भावयेमनसिशंकरमम्बिकेशम् ॥
धर्मक्षेत्रे महाक्षेत्रे गंगाकालिन्दिसंगमे
प्रयागे परमे पुण्ये ब्रह्मलोकस्य वर्त्मनि १
मुनयः शंशितात्मनः सत्यव्रतपरायणाः
महौजसो महाभागा महासत्रं वितेनिरे २
तत्र सत्रं समाकर्ण्य व्यासशिष्यो महामुनिः
आजगाम मुनीन्द्रष्टुं सूतः पौराणिकोत्तमः ३
तं दृष्ट्वा सूतमायांतं हर्षिता मुनयस्तदा
चेतसा सुप्रसन्नेन पूजां चक्रुर्य थाविधि ४
ततो विनयसंयुक्ताः प्रोचुः सांजलयश्च ते
सुप्रसन्ना महात्मनः स्तुतिं कृत्वा यथाविधि ५
रोमहर्षन सर्वज्ञ भवान्वै भाग्यगौरवात्
पुराणविद्यामखिलां व्यासात्प्रत्यर्थमीयिवान् ६
तस्मादाश्चर्य्यभूतानां कथानां त्वं हि भाजनम्
रत्नानामुरुसाराणां रत्नाकार इवार्णवः ७
यच्च भूतं च भव्यं च यच्चान्यद्वस्तु वर्तते
न त्वयाऽविदितं किंचित्त्रिषु लोकेषु विद्यते ८
त्वं मद्दिष्टवशादस्य दर्शनार्थमिहागतः
कुवन्किमपि नः श्रेयो न वृथा गंतुमर्हसि ९
तत्त्वं श्रुतं स्म नः सर्वं पूर्वमेव शुभाशुभम्
न तृप्तिमधिगच्छामः श्रवणेच्छा मुहुर्मुहुः १०
इदानीमेकमेवास्ति श्रोतव्यं सूत सन्मते
तद्रहस्यमपि ब्रूहि यदि तेऽनुग्रही भवेत् ११
प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः

Branch 29A: Purāṇa (05) Śhiva Purāṇa

Ending:

न लिप्यते च पापौघैः पद्मपत्रं यथांभसा ३६
यस्मिन्देशे वसेन्नित्यं शियोगरतो मुनिः
सौऽपि देशो भवेत्पूतः स पूत इति किं पुनः ३७
तस्मात्सर्वं परित्यज्य कृतमन्यद्विचक्षणः
सर्वदुःखप्रहाणाय शिवयोग समभ्यसेत् ३८
एतच्छिवपुराणां हि समाप्तं हितमादरात्
पठितव्यं श्रोतव्यं च तथैव हि ३९
नास्तिकाय न वक्तव्यमश्रद्धाय शठाय च
अभक्ताय महेश तथा धर्मध्वजाय च ४०
एतच्छ्रुत्वा ह्येकवार भवेत्पापं हि भस्मसाम्
अभक्तो भक्तिमाप्नोति भक्तो भक्तिसवद्धिभाक् ४१
पुनः श्रुते च सद्भक्तिर्मुक्तिः स्याच्च श्रुते पुनः
तस्मात्पुनः पुनश्चैव श्रोतव्य हि मुमुक्षभिः ४२
पचवृत्तिः प्रकर्तव्य पुराणास्यास्य सद्धिया
परं फल समुद्दिश्य तत्प्राप्नोति न संशयः ४३
पुरातनाश्च राजानो विप्रा वैश्याश्च सत्तमा
सप्तकृत्वस्तदावृत्याऽलभंत शिवदशनम् ४४
श्रोष्यत्यथापि यश्चेदं मानवो भक्तितत्पर
इह भुक्त्वाऽखिलान्भोगानते मुक्तिं लभेच्च सः ४५
एतच्छिवपुराणं हि शिवस्यातिप्रियं परम् ।
भुक्तिमुक्तिप्रद ब्रह्मसंमितं भक्तिवर्द्धनम् ४६
एतच्छिवपुराणस्य वक्तुः श्रोतुश्च सर्वदा ।
समणः ससुतः साबः शं करोतु स शकरः ४७
श्री शिवपुराण समाप्तं ॥

Reference: Āchārya, Rāma Sharma, *ŚrīŚiva Purāṇa* , (Mathura: Rashtriya Press, 1972).

## Branch 29A: Purāṇa (06) Nārada Purāṇa
Structure: Two main divisions and a total of 204 chapters.
Beginning:

श्रीनारदीयमहापुराणम्
अथ प्रथमोऽध्यायः
ॐ श्रीगुरुभ्यो नमः ॐ श्री गणेशाय नमः
ॐ नमो भगवते वासुदेवाय
ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
देवीं सरस्वतीं चैव ततो जयमुदीरयेत्
ॐ वेदव्यासाय नमः

वृन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम्
उपेन्द्रं सांद्रकारुण्यं परानन्दं परात्परम् १
ब्रह्मविष्णुमहेशाख्या यस्यांशा लोकसाधकाः
तमादिदेवं चिद्रूपं विशुद्धं परमं भजे २
शौनकाद्या महात्मान ऋषयो ब्रह्मवादिनः
नैमिषाख्ये महारण्ये तपस्तेपुर्मुमुक्षवः ३
जितेन्द्रिया जिताहाराः सन्तः सत्यपराक्रमाः
यजन्तः परया भक्त्या विष्णुमाद्यं सनातनम् ४
अनीर्ष्याः सर्वधर्मज्ञा लोकानुग्रहतत्पराः
निर्म्ममा निरहंकाराः परस्मिन्रतमानसाः ५
न्यस्तकामा विवृजिनाः शमादिगुणसंयुताः
कृष्णाजिनोत्तरीयास्ते जटिला ब्रह्मचारिणः ६
गृणन्तः परमं ब्रह्म जगच्चक्षुःसमौजसः
धर्मशास्त्रार्थतत्त्वज्ञास्तेपुर्नैमिषकानने ७
यज्ञैर्यज्ञपतिं केचिज्ज्ञानैर्ज्ञानात्मकं परे
केचिच्च परया भक्त्या नारायणमपूजयन् ८
एकदा ते महात्मानः समाजं चक्रुरुत्तमाः
धर्मार्थकाममोक्षाणामुपायाञ्ज्ञातुमिच्छवः ९
षड्विंशतिसहस्राणि मुनीनामूर्द्ध्वरेतसाम्

Branch 29A: Purāṇa (06) Nārada Purāṇa

Ending:

यतो वाचो निवर्तन्ते न मनो यत्र संविशेत्
तद्विद्यादात्मनो रूपं ह्यरूपस्य चिदात्मनः ५२
यस्य सत्यतया सत्यं जगदेतद्विकाशते
विचित्ररूपं वन्दे तं निर्गुणं तमसः परम् ५३
आदौ मध्ये चाप्यजनश्चान्ते चैकाक्षरो विभुः
विभाति नानारूपेण तं वन्देऽह निरञ्जनम् ५४
निरञ्जनात्समुत्पन्नं जगदेतच्चराचरम्
तिष्ठत्यप्येति वा यस्मिंस्तत्सत्यं ज्ञानमद्वयम् ५५
शिवं शैवा वदन्त्येनं प्रधानं साङ्ख्यवेदिनः
योगिनः पुरुषं विप्राः कर्म मीमांसका जनाः ५६
विभुं वैशेषिकाद्याश्च चिच्छक्तिं शक्तिचिन्तकाः
ब्रह्माद्वितीयं तद्वन्दे नानारूपक्रियास्पदम् ५७
भक्तिर्भगवतः पुंसां भगवद्रूपकारिणी
तां लब्ध्वा चापरं लाभं को वाञ्छति विना पशुम् ५८
भगवद्विमुखा ये तु नराः संसारिणो द्विजाः
तेषां मुक्तिर्भवाटव्या नास्ति सत्सङ्गमन्तरा ५९
साधवः समुदाचाराः सर्वलोकहितावहाः
दीनानुकम्पिनो विप्राः प्रपन्नास्तारयन्ति हि ६०
यूयं धन्यतमा लोके मुनयः साधुसम्मताः
यन्मुहुर्वासुदेवस्य कीर्तिं पल्लवनूतनाम् ६१
धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिर्लोकमङ्गलम्
यत्स्मारितो हरिः साक्षात्सर्वकारणकारणम् ६२

ॐ इति श्रीबृहन्नारदीयपुराणे बृहदुपाख्याने उत्तरभागे महापुराणे
एतत्पुराणश्रवणादिफलनिरूपणं नाम द्व्यशीतितमोऽध्यायः ८२

Reference: *Nāradīya Mahāpurāṇa,* (Delhi: Nag Publishers, 1984).

## Branch 29A: Purāṇa (07) Agni Purāṇa

Structure: 383 chapters and 11,457 verses

Beginning:

अग्निपुराणम् प्रथमोऽध्यायः ग्रन्थ-प्रस्तावना ।

श्रियं सरस्वतिं गौरीं गणेशं स्कन्दमीश्वरम् ।
ब्रह्माणं वह्निमिन्द्रादीन्वासुदेवं नमाम्यहम् १
नैमिषे हरिमीजाना ऋषयः शौनकादयः ।
तीर्थयात्राप्रसङ्गेन स्वागतं सूतमब्रुवन् २
ऋषय ऊचुः
सूत त्वं पूजितोऽस्माभिः सारात्सारं वदस्व नः ।
येन विज्ञानमात्रेण सर्व्वज्ञत्वं प्रजायते ३
सूत उवाच
सारात्सारो हि भगवान् विष्णुः सर्गादिकृद्विभुः ।
ब्रह्माहमस्मि तं ज्ञात्वा सर्व्वज्ञात्वं प्रजायते ४
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
द्वे विद्येवेदितव्ये हि इति चाथर्वणी श्रुतिः ५
अहं शुक्रश्च पैलाद्या गत्वा वदरिकाश्रमम् ।
व्यासं नत्वा पृष्टवन्तः सोऽस्मान् सारमथाब्रवीत् ६
व्यास उवाच
शुकाद्यैः शृणु सूत त्वं वशिष्ठो मां यथाऽब्रवीत् ।
ब्रह्मसारं हि पृच्छन्तं मुनिभिश्च परात्परम् ७
वसिष्ठ उवाच
द्वैविध्यं ब्रह्मा वक्ष्यामि शृणु व्यासाखिलानुगम् ।
यथाऽग्निर्मां पुरा प्राह मुनिभिर्दैवतैः सह ८
पुराणं परमाग्नेयं ब्रह्मविद्याक्षरं परम् ।
ऋग्वेदाद्यपरं ब्रह्म सर्वदेवसुखावहम् ९
अग्निनोक्तं पुराणं यदाग्नेयं ब्रह्मसम्मितम्
भुक्तिमुक्तिप्रदं दिव्यं पठतां शृणवतां नृणाम् ११
वसिष्ठ उवाच

Branch 29A: Purāṇa (07) Agni Purāṇa

Ending:

वेदान्तं ब्रह्मविज्ञानं योगी ह्यष्टाङ्ग ईरितः ।
स्तोत्रं पुराणमाहात्म्यं विद्या ह्यष्टादश स्मृताः ३८३-६२
ऋग्वेदाद्याः परा ह्यत्र पराविद्याक्षरं परं ।
सप्रपञ्चं निष्प्रपञ्चं ब्रह्मणो रूपमीरितं ३८३-६३
इदं पञ्चदशसाहस्त्रं शतकोटिप्रविस्तरं ।
देवलोके दैवतैश्च पुराणं पठ्यते सदा ३८३-६४
लोकानां हितकामेन संक्षिप्योद्‌गीतमग्निना ।
सर्वं ब्रह्मेति जानीध्वं मुनयः शोनकादयः ३८३-६५
शृणुयाच्छ्रावयेद्वापि यः पठेत्पाठयेदपि ।
लिखेल्लेखापयेद्वापि पूजयेत्कीर्त्तयेदपि ३८३-६६
पुराणपाठकञ्चैव पूजयेत् प्रयतो नृपः ।
गोभूहिरण्यदानाद्यैर्वस्त्रालङ्कारतर्पणैः ३८३-६७
तं संपूज्य लभेच्चैव पुराणश्रवणात् फलं ।
पुराणान्ते च वै कुर्य्यादवश्यं द्विजभोजनं ३८३-६८
निर्म्मलः प्राप्तसर्व्वार्थः सकुलः स्वर्गमाप्नुयात् ।
शरयन्त्रं पुस्तकाय सूत्रं वै पत्रसञ्चयं ३८३-६९
पट्टिकाबन्धवस्त्रादि दद्याद् यः स्वर्गमाप्नुयात् ।
यो दद्याद्ब्रह्म्लोकी स्यात् पुस्तकं यस्य वै गृहे ३८३-७०
तस्योत्पातभयं नास्ति भुक्तिमुक्तिमवाप्नुयात् ।
यूयं स्मरत चाग्नेयं पुराणं रूपमैश्वरं
सूतो गतः पूजितस्तैः शौनकाद्या हरिं ययुः ३८३-७१
इत्यादिम्हापुराणे आग्नेये आग्नेयपुराणमाहात्म्यं नाम
त्र्यशीत्यधिकत्रिशततमोऽध्यायः ।
समाप्तमाग्नेयं पुराणम्

Reference: Sharma, R.N., ed., *The Agnimahāpurāṇam,* (Delhi: Nag, 1985).

Branch 29A: Purāṇa (08) Mārkaṇḍeya Purāṇa
Structure: 137 Chapters.
Beginning:
मार्कण्डेय पुराणं । प्रथमोऽध्यायः । ॐ नमो भगवते वासुदेवाय ।
यद्योगिभिर्भवभयार्त्तिविनाशयोग्यमासाद्य वन्दितमतीव विविक्तचित्तैः ।
तद्वः पुनातु हरिपादसरोजयुग्ममाविर्भवत्क्रमविलङ्घितभूर्भुवःस्वः १
पायात् स वः सकलकल्मषभेददक्षः
क्षीरोदकुक्षिफणिभोगनिविष्टमूर्त्तिः ।
श्वासावधूतसलिलोत्कणिकाकरालः
सिन्धुः प्रनृत्यमिव यस्य करोति सङ्गात् २
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
तपःस्वाध्यायनिरतं मार्कण्डेयं महामुनिं ।
व्यासशिष्यो महातेजा जैमिनिः पर्य्यपृच्छत १
भगवन् भारताख्यानं व्यासेनोक्तं महात्मना
पूर्णमस्तमलैः शुभ्रैर्नानाशास्त्रसमुच्चयैः २
जातिशुद्धिसमायुक्तं साधुशब्दोपशोभितं ।
पूर्व्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितं ३
त्रिदशानां यथा विष्णुर्द्विपदां ब्राह्मणो यथा
भूषणानाञ्च सर्वेषां यथा चूडामणिर्वरः ४
यथायुधानां कुलिशमिन्द्रियाणां यथा मनः
तथेह सर्व्वशास्त्राणां महाभारतमुत्तमं ५
अत्रार्थश्चैव धर्मश्च कामो मोक्षाश्च वर्ण्यते
परस्परानुबन्धाश्च सानुबन्धाश्च ते पृथक् ६
धर्मशास्त्रमिदं श्रेष्ठमर्थशास्त्रमिदं परं
कामशास्त्रमिदं चाग्र्यं मोक्षशास्त्रं तथोत्तमं ७
चतुराश्रमधर्माणामाचारस्थितिसाधनं
प्रोक्तमेतन्महाभाग वेदव्यासेन धीमता ८
तथा तात कृतं ह्येतद्व्यासेनोदारकर्मणा

Branch 29A: Purāṇa (08) Mārkaṇḍeya Purāṇa

Ending:

सप्तत्रिंशदधिक शततमोऽध्यायः
मार्कण्डेय उवाच
दमेन राज्ञा इत्युक्ते पितुः शत्रुः पलायितः
मत्पिता तापसोऽन्यश्च तप्यतां निर्भयं महत्
पलायनपरान् दृष्ट्वा किञ्चिन्नोक्तं दमेन तान् १
मार्कण्डेय उवाच
एतत्सर्व्वमुपाख्यानं धर्म्म्यं स्वर्गापवर्गदं
यः शृणोति पठेद्वापि सिद्धं तस्य समीहितं २
आधिव्याधिजदुःखेन कदाचिन्नाभियुज्यते
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ३
सन्तः सुजनमित्राणि भवन्ति हितबुद्धयः
नारयः संभविष्यन्ति दस्यवो वा कदाचन ४
सदर्थो मिष्टभोगी च दुर्भिक्षैर्नावसीदति
परदारपरद्रव्यपरहिंसादिकिल्बिषैः ५
मुच्यतेऽनेकदुःखेभ्यो नित्यञ्चैवोरगोत्तम
ऋद्धिर्वृद्धिः स्मृतिः शान्तिः श्रीःपुष्टिस्तुष्टिरेव च
नित्यं तस्य भवेद्विप्र यः शृणोति कथामिमां ६
मार्कण्डेयपुराणमेतदखिलं शृण्वन्नशोच्यः पुमान्
यो वा सम्यगुदीरयेत् रसमयं शोच्यो न सोऽपि द्विज ।
योगज्ञानविशुद्धसिद्धिसहितः स्वर्गादिलोकेऽप्यसौ
शक्राद्यैश्च सुरादिभिः परिवृतः स्वर्गे सदा पूज्यते ७
पुराणमेतच्छ्रुत्वा च ज्ञानविज्ञानसंयुतं ।
विमानवरमारुह्य स्वर्गलोके महीयते ८
इति श्रीमार्कण्डेयपुराणं समाप्तं १३७

Reference: Banerjea, K. M., *The Mārcandeya Purāna*, (Calcutta: Bishop's College Press, 1855).

## Branch 29A: Purāṇa (09) Vārāha Purāṇa

Structure: 218 Chapters, a little more than 10,000 verses

Beginning:

वाराहपुराणम् । प्रथमोऽध्यायः ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
नमस्तस्मै वराहाय लीलयोद्धरते महीम् ।
खुरमध्यगतो यस्य मेरुः खणखणायते १
दंष्ट्राग्रेणोद्धृता गौरुदधिपरिवृता पर्वतैर्निम्नगाभिः
साकं मृत्पिण्डवत्प्राग्बृहदुरुबपुषाऽनन्तरूपेण येन ।
सोऽयं कंसासुरारिर्मुरनरकदशास्यान्तकृत्सर्वसंस्थः
कृष्णो विष्णुः सुरेशो नुदतु मम रिपूनादिदेवो वराहः २
सूत उवाच
यस्मिन् काले क्षितिः पूर्वं कल्प्लवाराहरूपिणा ।
उद्धृता विभुना शक्त्या पप्रच्छ परमेश्वरम् ३
धरण्युवाच
कल्पे कल्पे भवानेव मां समुद्धरति प्रभो ।
न चाहं वेद ते मूर्तिमादिसर्गेषु केशव ४
वेदेषु चैव नष्टेषु मत्स्यो भूत्वा रसातले ।
प्रविश्य तानथोत्कृष्य ब्रह्मणे दत्तवानसि ५
अन्यत्सुरासुरमिते त्वं समुद्रस्य मन्थने
धृतवानसि कौर्म्येण मन्दरं मधुसूदन ६
पुनर्वराहरूपेण आगच्छन्तीं रसातलम्
उज्जहारैकदंष्ट्रेण भगवन्वै महार्णवात् ७
अन्यद्धिरण्यकशिपुर्वरदानेन दर्पितः
आबाधमानः पृथिवीं स त्वया विनिपातितः ८
पुनर्निःक्षत्रिया देव त्वया चापि पुरा कृता
जामदग्न्येन रामेण त्वया भूत्वा सकृत्प्रभो ९
पुनश्च रावणो रक्षः क्षपितं क्षात्रतेजसा

Branch 29A: Purāṇa (09) Vārāha Purāṇa

Ending:

कपिलस्यापि महिमा तथा गोवर्धनस्य च ३८
तथा आख्यायिकायुक्तं विश्रान्तेश्च ततः परम्
गोकर्णस्य च माहात्म्यं सरस्वत्यास्तथैव च ३९
यमुनोद्भेदमहिमा कालिञ्जरसमुद्भवः
गङ्गोद्भेदस्य महिमा शापः शाम्बस्य वै तथा ४०
मधुकप्रतिमायाश्च स्थापनं संप्रकीर्त्तितम्
शैलार्चास्थापनं चापि मृण्मयार्चास्थितिस्तथा ४१
ताम्रार्चास्थापनं चापि कांस्यार्चास्थापनं तथा
रौप्यार्चास्थापनं चाथ सौवर्णप्रतिमास्थितिः ४२
श्राद्धोत्पत्तिस्ततः प्रोक्तं पिण्डं संकल्प एव च
पिण्डोत्पत्तिस्ततः प्रोक्ता पितृयज्ञविनिर्णयः ४३
मधुपर्कदानफलं संसारचक्रवर्णनम्
दुष्कृतकर्मकरणं सुखवर्णनमेव च ४४
कृतान्तदूतकथनं यातनारूपमेव च
वर्णनं नरकाणां च किङ्कराणां च वर्णनम् ४५
तथा कर्मविपाकश्च यादृशं कर्म तादृशम्
पापकर्मस्य कथनं दूतप्रेषणकर्म च ४६
शुभाशुभस्य कथनं शुभकर्मफलोदयम्
लोभनं पुरुषस्यापि निमेराख्यानमद्भुतम् ४७
प्रबोधिनीकथां दिव्यां गोकर्णेशसमुद्भवाम् ।
नन्दिनो वरदाने च जलेशशैलयोस्तथा ४८
शृङ्गेश्वरस्य महिमा एवं वृत्तान्तरसंग्रहः ।
एतच्छ्रुत्वाप्नुयान्मर्त्यो वराहश्रवणात्फलम् ४९
इत्यनुक्रमणिका नाम अष्टादशाधिकद्विशततमोऽध्यायः ।

Reference: Bhattacharya, Ahibhushan, tr., *The Varaha Purana: with English translation* (Varanasi: All-India Kashiraj Trust, 1981).

## Branch 29A: Purāṇa (10) Liñga Purāṇa

Structure: PūrvaArdha and an Uttara Ardha, with 108 and 55 chapters respectively

Beginning:

लिङ्गपुराणम्
श्रीगणेशाय नमः ॥
ॐ नमः शिवाय
नमो रुद्राय हरये ब्रह्मणे परमात्मने
प्रधानपुरुषेशाय सर्गस्थित्यंतकारिणे १
नारदोभ्यर्च्य शैलेशे शंकरं संगमेश्वरे
हिरण्यगर्भे स्वर्लीने ह्यविमुक्ते महालये २
रौद्रे गोप्रक्षके चैव श्रेष्ठे पाशुपते तथा
विघ्नेश्वरे च केदारे तथा गोमा युकेश्वरे ३
हिरण्यगर्भे दंद्रेशे ईशान्ये च त्रिविष्टपे
शुक्रेश्वरे यथान्यायं नैमिषं प्रययौ मुनिः ४
नैमिषेयास्तदा दृष्ट्वा नारदं दृष्टमा नसाः
समभ्यर्च्यासनं तस्मै तद्योग्यं समकल्पयन् ५
सोपि दृष्टो मुनिवरैर्दत्तं भेजे तदासनम्
संपूज्यमानो मुनिभिः सुखासीनो वरासने ६
चक्रे कथां विचित्रार्थां लिंगमाहात्म्यमाश्रिताम्
एतस्मिन्नेव काले तु सूतः पौराणिकः स्वयम् ७
जगाम नैमिषं धीमान् प्रणामार्थं तपस्विनाम्
तस्मै साम च पूजां च यथावच्चक्रिरे तदा ८
नैमिषेयास्तु शिष्याय कृष्णद्वैपायनस्य तु
अथ तेषां पुराणस्य शुश्रूषा समपद्यत ९
दृष्ट्वा तमतिविश्वस्तं विद्वांसं रोमहर्षणम्
अपृच्छंश्च ततः सूतमृषिं सर्वे तपोधनाः १०
पुराणसंहितां पुण्यां लिंगमाहात्म्यसंयुताम्
नैमिषेया ऊचुः
त्वया सूत महाबुद्धे कृष्णद्वैपायनो मुनिः ११

Branch 29A: Purāṇa (10) Liñga Purāṇa

Ending:

अथ ते मुनयः सर्वे नैमिषेयाः समाहिताः ३७
प्रणेमुर्देवमीशानं प्रीतिकंटकितत्वचः
शाखां पौराणिकीमेवं कृत्वैकादशिकां प्रभुः ३८
ब्रह्मा स्वयंभूर्भगवानिदं वचनमब्रवीत्
लैंगमाद्यंतमखिलं यः पठेच्छृणुयादपि ३९
द्विजेभ्यः श्रावयेद्वापि स याति परमां गतिम्
तपसा चैव यज्ञेन दानेनाध्ययनेन च ४०
या गतिस्तस्य विपुला शास्त्रविद्या च वैदिकी
कर्मणा चापि मिश्रेण केवलं विद्ययापि वा ४१
निवृत्तिश्चास्य विप्रस्य भवेद्भक्तिश्च शाश्वती
मयि नारायणे देवे श्रद्धा चास्तु महात्मनः ४२
वंशस्य चाक्षया विद्या चाप्रमादश्च सर्वतः
इत्याज्ञा ब्रह्मणस्तस्मात्तस्य सर्वं महात्मनः ४३
ऋषयः प्रोचुः
ऋषेः सूतस्य चास्माकमेतेषामपि चास्य च
नारदस्य च या सिद्धिस्तीर्थयात्रास्तस्य च ४४
प्रीतिश्च विपुला यस्मादस्माकं रोमहर्षण ४५
सा सदास्तु विरूपाक्षप्रसादात्तु समंततः
एवमुक्तेषु विप्रेषु नारदो भगवानपि ४६
कराभ्यां सुशुभाग्राभ्यां सूतं पस्पर्शिवांस्त्वचि ।
स्वस्त्यस्तु सूत भद्रं ते महादेवे वृषध्वजे ४७
श्रद्धा तवास्तु चास्माकं नमस्तस्मै शिवाय च ४८
इति श्री लिङ्गमहापुराणे उत्तरभागे पंचपंचाशत्तमोध्यायः समाप्तः ५५
समाप्तं चैतल्लैंगोत्तरार्धम् । श्रीभवानीशंकरार्पणमस्तु । समाप्तोऽयं ग्रन्थः

Reference: Shastri, J.L., Ed., *Linga Purāna of Sage Kṛṣṇa Dvaipāyana Vyāsa*, (Delhi, Motilal Banarsidass, 1985).

## Branch 29A: Purāṇa (11) Brahma Vaivarta Purāṇa

Structure: Four *Khaṇḍas*

Beginning:

श्रीमद्द्वैपायनमुनिप्रणीतं ब्रह्मवैवर्तपुराणम् । तत्राऽऽदिमं ब्रह्मखण्डम् ।
अथ प्रथमोऽध्यायः ।
गणेशब्रह्मेशसुरेशशेषाः सुराश्च सर्वे मनवो मुनीन्द्राः
सरस्वतीश्रीगिरिजादिकाश्च यं नमन्ति देव्यः प्रणमामि तं विभुम् १
स्थूलास्तनूर्विदधतं त्रिगुणं विराजं विश्वानि लोमविवरेषु महान्तमाद्यम् ।
सृष्ट्युन्मुखः स्वकलयाऽपि ससर्ज सूक्ष्मं नित्यं समेत्य हृदि यस्तमजं भजामि २
ध्यायन्ते ध्याननिष्ठाः सुरनरमनवो योगिनो योगरूढाः
सन्तः स्वप्नेऽपि सन्तं कतिकतिजनिभिर्यं न पश्यन्ति तप्त्वा ।
ध्याये स्वेच्छामयं तं त्रिगुणपरमहो निर्विकारं निरीहं
भक्त्या ध्यानैकहेतोर्निरुपमरुचिरश्यामरूपं दधानम् ३
वन्दे कृष्णं गुणातीतं परं ब्रह्माच्युतं यतः ।
आविर्बभूवुः प्रकृतिब्रह्मविष्णुशिवादयः ४
ॐ नमो भगवते वासुदेवाय ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् १
अमृतपरमपूर्वं भारतीकामधेनुं श्रुतिगणकृतवत्सो व्यासदेवो दुदोह ।
अतिरुचिरपुराणं ब्रह्मवैवर्तमेतत्पिबत पिबत मुग्धा दुग्धमक्षय्यमिष्टम् २
भारते नैमिषारण्ये ऋषयः शौनकादयः ।
नित्यां नैमित्तिकीं कृत्वा क्रियामूषुः कुशासने ३
एतस्मिन्नन्तरे सौतिमागच्छन्तं यदृच्छया
प्रणतं सुविनीतं तं विलोक्य ददुरासनम् ४
तं संपूज्यातिथिं भक्त्या शौनको मुनिपुंगवः
पप्रच्छ कुशलं शान्तं शान्तः पौराणिकं मुदा ५
वर्त्मायासविनिर्मुक्तं वसन्तं सुस्थिरासने
सस्मितं सर्वतत्त्वज्ञं पुराणानां पुराणवित् ६

Branch 29A: Purāṇa (11) Brahma Vaivarta Purāṇa

Ending of Khaṇḍa 3:

पार्वतीशिवसांनिध्ये सुखं तस्थौ गणेश्वरः ४०
इदं गणपतेः खराडं यः शृणोति समाहितः
स राजसूययज्ञस्य फलमाप्नोति निश्चितम् ४१
अपुत्रो लभते पुत्रं श्रीगणेशप्रसादतः
धीरं वीरं च धनिनं गुणिनं चिरजीविनम् ४२
यशस्विनं पुत्रिणं च विद्वांसं सुकवीश्वरम्
जितेन्द्रियाणां प्रवरं दातारं सर्वसंपदाम् ४३
सुशीलं च सदाचारं प्रशंस्यं वैष्णवं लभेत्
अहिंसकं दयालुं च तत्त्वज्ञानविशारदम् ४४
भक्त्या गणेशं संपूज्य वस्त्रालंकारचन्दनैः
श्रुत्वा गणपतेः खराडं महावन्ध्या प्रसूयते ४५
मृतवत्सा काकवन्ध्या ब्रह्मन्पुत्रं लभेद्ध्रुवम्
अदूष्यदूषणपरा शुद्धा चैव लभेत्सुतम् ४६
सपूर्णं ब्रह्मवैवर्तं श्रुत्वा यल्लभते फलम्
तत्फलं लभते मर्त्यः श्रुत्वेदं खराडमुत्तमम् ४७
वाञ्छां कृत्वा तु मनसि शृणोति परमास्थितः
तस्मै ददाति सर्वेष्टं शूरश्रेष्ठो गणेश्वरः ४८
श्रुत्वा गणपतेः खराडं विघ्ननाशाय यत्नतः ।
स्वर्णयज्ञोपवीतं च श्वेतच्छत्रं च माल्यकम् ४९
प्रदीयते वाचकाय स्वस्तिकं तिल्लड्डुकान् ।
परिपक्वफलान्येव देशकलोद्भवानि च ५०
इति श्रीब्रह्मवैवर्ते महापुराणे गणपतिखराडे नारदनारायणसंवादे
परशुरामागमगनैतत्खराडश्रवणफलवर्णनं नाम षट्चत्वारिंशोऽध्यायः ४६
समाप्तमिदं श्रीब्रह्मवैवर्तपुराणस्य तृतीयं महागणपतिखराडम्

Reference: Jha, Tariṇīśa, *Brahmavaivarta Purāṇam*, (Prayāga: Hindī Sāhitya Sammelana, 1981).

## Branch 29A: Purāṇa (12) Bhaviṣhya Purāṇa

Structure: 3 Main Divisions

Beginning:

भविष्यमहापुराणम् । ब्राह्मपर्व । अथ प्रथमोऽध्यायः ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति २
मूकङ्करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ३
पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ४
यो गोशतं कनकशृङ्गमयं ददाति विप्राय वेदविदुषे च बहुश्रुताय ।
पुण्यां भविष्यसुकथां शृणुयात्समग्रां पुण्यं समं भवति तस्य च तस्य चैव ५
कृत्वा पुराणानि पराशरात्मजः सर्वाण्यनेकानि सुखावहानि ।
तत्रात्मसौख्याय भविष्यधर्मान् कलौ युगे भावि लिलेख सर्वम् ६
तत्रापि सर्वर्षिवरप्रमुख्यैः पराशराद्यैर्मुनिभिः प्रणीतान् ।
स्मृत्युक्तधर्मागमसंहितार्थान् व्यासः समासादवदद्भविष्यम् ७
अल्पायुषो लोकजनान्समीक्ष्य विद्याविहीनान्पशुवत्सुचेष्टान्
तेषां सुखार्थं प्रतिबोधनाय व्यासः पुराणं प्रथितं चकार ८
जयति भुवनदीपो भास्करो लोककर्त्ता
जयति च शितिदेहः शार्ङ्गधन्वा मुरारिः ॥
जयति च शशिमौली रुद्रनामाभिधेयो
जयति च स तु देवो भानुमांश्चित्रभानुः १
श्रियावृतं तु राजानं शतानीकं महाबलम्
अभिजग्मुर्महात्मानः सर्वे द्रष्टुं महर्षयः २
भृगुरत्रिर्वसिष्ठश्च पुलस्त्यः पुलहः क्रतुः

Branch 29A: Purāṇa (12) Bhaviṣhya Purāṇa

Ending:

स च हंसो हरिः साक्षाच्छतसूर्यसमप्रभः
शुक्रं प्रह्लादप्रमुखान्स्तेजसा तापयिष्यति ३०
तदा पराजिता दैत्यास्त्यक्त्वा गां दुःखिता भृशम्
वितले च गमिष्यन्ति महादेवेन रक्षिताः ३१
पुनस्ते सकला देवा निर्भया निरुपद्रवाः
वैवस्वतस्य तनयं चाभिषेक्ष्यन्ति भूपदे ३२
दिव्यवर्षशतायुश्च स इक्ष्वाकुर्भविष्यति
वर्षाणां च प्रमाणेन नृणामायुश्चतुश्शतम् ३३
इति ते कथितं सर्वं यत्पृष्टोऽहं मनो त्वया
चतुर्युगानां चरितं नृपाणां च पृथक् पृथक् ३४
चतुष्पादा हि धर्मस्य ज्ञानं ध्यानं शमो दमः
आत्मज्ञानं स वै ज्ञानं ध्यानमध्यात्मचिन्तनम्
मनः स्थिरत्वं च शमो दमस्त्विन्द्रियनिग्रहः ३५
चतुर्लक्षाब्दकान्येव द्वात्रिंशच्च सहस्रकम्
तत्सङ्ख्यया हि धर्मस्य पादश्चैकः प्रकीर्तितः ३६
प्राह्णमध्याह्नसायाह्नं त्रिसन्ध्यं च भवेत्सदा ।
एकैकेन पदा तस्य विराजो भुवि वर्तते ३७
यदा धर्मो भवेद्वृद्धस्तदायुश्चैव वर्द्धते ।
सप्तश्लोकसहस्राणि खण्डेऽस्मिन्कथितानि हि ॥
अतश्चोत्तरखण्डं हि वर्णयामि मनो शृणु ३८
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
कलियुगीयेतिहाससमुच्चयवर्णनं नाम षड्विंशोऽध्यायः २६
इति श्रीभविष्ये महापुराणे तृतीयं प्रतिसर्गपर्वचतुर्युगखण्डापरपर्यायं
समाप्तम् ३

Reference: Sharma, R.N., *The Bhaviṣya Mahāpurāṇam*, (Delhi: NAG, 1984).

## Branch 29A: Purāṇa (13) Vāmana Purāṇa

Structure: Pūrva Bhāga with 6,000 verses in 69 chapters

Beginning:

अथ श्रीवामनपुराणम् ।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
त्रैलोक्यराज्यमाक्षिप्य बलेरिन्द्राय यो ददौ ।
श्रीधराय नमस्तस्मै छद्मवामनरूपिणे १
पुलस्त्यमृषिमासीनमाश्रमे वाग्विदां वरम् ।
नारदः परिपप्रच्छ पुराणं वामनाश्रयम् २
कथं भगवता ब्रह्मन् विष्णुना प्रभविष्णुना ।
वामनत्वं धृतं पूर्वं तन्ममाचक्ष्व पृच्छतः ३
कथं च वैष्णवो भूत्वा प्रह्लादो दैत्यसत्तमः ।
त्रिदशैर्युयुधे सार्धमत्र मे संशयो महान् ४
श्रूयते च द्विजश्रेष्ठ दक्षस्य दुहिता सती ।
शंकरस्य प्रिया भार्या बभूव वरवर्णिनी ५
किमर्थं सा परित्यज्य स्वशरीरं वरानना ।
जाता हिमवतो गेहे गिरीन्द्रस्य महात्मनः ६
पुनश्च देवदेवस्य पत्नीत्वमगमच्छुभा ।
एतन्मे संशयं छिन्धि सर्ववित्त्वं मतोऽसि मे ७
तीर्थानां चैव माहात्म्यं दानानां चैव सत्तम
व्रतानां विविधानां च विधिमाचक्ष्व मे द्विज ८
एवमुक्तो नारदेन पुलस्त्यो मुनिसत्तमः
प्रोवाच वदतां श्रेष्ठो नारदं तपसो निधिम् ९
पुलस्त्य उवाच
पुराणं वामनं वक्ष्ये क्रमान्निखिलमादितः
अवधानं स्थिरं कृत्वा शृणुष्व मुनिसत्तम १०
पुरा हैमवती देवी मन्दरस्थं महेश्वरम्
उवाच वचनं दृष्ट्वा ग्रीष्मकालमुपस्थितम् ११

Branch 29A: Purāṇa (13) Vāmana Purāṇa

Ending:

कोकामुखे यत्प्रवदन्ति विप्राः प्रयागमासाद्य च माघमासे ६
स तत्फलं प्राप्य च वामनस्य संकीर्तयन् नान्यमनाः पदं हि
गच्छेन्मया नारद तेऽद्य चोक्तं यद्राजसूयस्य फलं प्रयच्छेत् ७
यद् भूमिलोके सुरलोकलभ्ये महत्सुखं प्राप्य नरः समग्रम्
प्राप्नोति चास्य श्रवणान्महर्षे सौत्रामणेर्नास्ति च संशयो मे ८
रत्नस्य दानस्य च यत्फलं भवेद्यत्सूर्यस्य चेन्दोर्ग्रहणे च राहोः
अन्नस्य दानेन फलं यथोक्तं बुभुक्षिते विप्रवरे च साग्निके ९
दुर्भिक्षसंपीडितपुत्रभार्ये ज्ञातौ सदा पोषणतत्परे च
देवाग्निविप्रर्षिरते च पित्रोः सुते तथा भ्रातरि ज्येष्ठके च ॥
दत्ते फलं तत् प्रवदन्ति देवाः स तत् फलं लभते चास्य पाठात् १०
चतुर्दशं वामनमाहुरग्र्यं श्रुते च यस्याघचयाश्च नाशम्
प्रयान्ति नास्त्यत्र च संशयो मे महान्ति पापान्यपि नारदाशु ११
पाठात्संश्रवणाद्विप्र श्रावणादपि कस्यचित्
सर्वपापानि नश्यन्ति वामनस्य सदा मुने १२
इदं रहस्यं परमं तवोक्तं न वाच्यमेतद्धरिभक्तिवर्जिते
द्विजस्य निन्दारतिहीनदक्षिणे सहेतुवाक्यावृतपापसत्त्वे १३
नमो नमः कारणवामनाय नित्यं यो वदेन्नियतं द्विजः
तस्य विष्णुः पदं मोक्षं ददाति सुरपूजितः १४
वाचकाय प्रदातव्यं गोभूस्वर्णविभूषणम् ।
वित्तशाठ्यं न कर्तव्यं कुर्वन् श्रवणनाशकम् १५
त्रिसंध्यं च पठन् शृणवन् सर्वपापप्रणाशनम् ।
असूयारहितं विप्र सर्वसम्पत्प्रदायकम् १६
इति श्रीवामनपुराणे एकोनसप्ततितमोऽध्यायः ६९
इति श्रीवामनपुराणं समाप्तम्

Reference: Gupta, Anand Swarup, *The Vāmana Purāṇa*, (Varanasi: All-India Kashiraj Trust, 1967).

## Branch 29A: Purāṇa (14A)    Brahmāṇḍa Purāṇa

Structure: Three Main Divisions, with a total of 156 chapters.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीरामचन्द्राय नमः । अथ ब्रह्माण्डमहापुराणं पूर्वभागप्रारम्भः ।
नमोनमः क्षये सृष्टौ स्थितौ सत्त्वमयाय वा ।
नमो रजस्तमःसत्त्वत्रिरूपाय स्वयंभुवे १
जितं भगवता तेन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना २
ब्रह्माणं लोककर्त्तारं सर्वज्ञमपराजितम् ।
प्रभुं भूतभविष्यस्य साम्प्रतस्य च सत्पतिम् ३
ज्ञानमप्रतिमं तस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्य्यं चैव धर्मश्च सद्भिः सेव्यं चतुष्टयम् ४
इमान्नरस्य वै भावान्नित्यं सदसदात्मकान् ।
अविंशकः पुनस्तान्वै क्रियाभावार्थमीश्वरः ५
लोककृल्लोकतत्त्वज्ञो योगमास्थाय योगवित् ।
असृजत्सर्वभूतानि स्थावराणि चराणि च ६
तमहं विश्वकर्माणं सत्पतिं लोकसाक्षिणम् ।
पुराणाख्यानजिज्ञासुर्गच्छामि शरणं विभुम् ७
पुराणं लोकतत्त्वार्थमखिलं वेदसंमितम्
प्रशशंस स भगवान् वसिष्ठाय प्रजापतिः ८
तत्त्वज्ञानामृतं पुण्यं वसिष्ठो भगवानृषिः
पौत्रमध्यापयामास शक्तेः पुत्रं पराशरम् ९
पराशरश्च भगवान् जातूकर्ण्यमृषिं पुरा
तमध्यापितवान्दिव्यं पुराणं वेदसंमितम् १०
अधिगम्य पुराणं तु जातूकर्ण्यो विशेषवित्
द्वैपायनाय प्रददौ परं ब्रह्म सनातनम् ११
द्वैपायनस्ततः प्रीतः शिष्येभ्यः प्रददौ वशी
लोकतत्त्वविधानार्थं पंचभ्यः परमाद्भुतम् १२

Branch 29A: Purāṇa (14A) Brahmāṇḍa Purāṇa

Ending:

अरुणा जयिनी पश्चात्तथा सर्वेश्वरी मता
कौलिनीति समुक्तानि तासां नामानि सूरिभिः ४१
चक्रेश्वरीं न्यसेच्चक्रं समर्प्य व्याप्य वर्ष्मणि
हृदि त्रिकोणं संभाव्य दिक्षु प्रागादितः क्रमात् ४२
तद्बहिर्विन्नयसेद्धीमानायुधानां चतुष्टयम्
न्यसेदग्न्यादिकोणेषु मध्ये पीठचतुष्टयम् ४३
मध्यवृत्तं न्यसित्वा च नित्याषोडशकं न्यसेत्
कामेश्वरी तथा नित्या नित्या च भगमालिनी ४४
नित्यक्लिन्ना तथा नित्या नित्या भेरुण्डनी मता
वह्निवासिनिका नित्या महावज्रेश्वरी तथा ४५
नित्या च दूती नित्या च त्वरिता तु ततः परम्
कुलसुन्दरिका नित्या कुल्या नित्या ततः परम् ४६
नित्या नीलपताका च नित्या तु विजया परा
ततस्तु मङ्गला चैव नित्यपूर्वा प्रचक्ष्यते ४७
प्रभामालिनिका नित्या चित्रा नित्या तथैव च ।
एतास्त्रिकोणान्तरेण पादतो हृदि विन्यसेत् ४८
नित्या प्रमोदिनी चैव नित्या त्रिपुरसुन्दरी ।
तन्मध्ये विन्यसेदेवीमखण्डजगदात्मिकाम् ४९
चक्रेश्वरीं हृदि न्यस्य कृत्वा चक्रं समुद्धृतम् ।
प्रदर्श्य मुद्रां योन्याख्यां सर्वानन्दमनुं जपेत् १५०
इत्यात्मनस्तु चक्रस्य चक्रदेवी भविष्यति १५१
इति श्रीब्रह्मांडमहापुराणे उत्तरभागे हयग्रीवागस्त्यसंवादे ललितोपाख्याने
चतुश्चत्वारिंशोऽध्यायः ४४ समाप्तं ललितोपाख्यानम् ।
समाप्तमिदं ब्रह्माण्डमहापुराणम्

Reference: Śāstrī, Jagadīśa, *Śrī Vyāsa Maharṣiproktaṃ Brahmāṇḍapurāṇam*, (Delhi: Motilal Banarsidass, 1983).

## Branch 29A: Purāṇa (14B) Vāyu Purāṇa

Structure: Two divisions and a total of 111 chapters.

Beginning:

वायुपहापुराणम् । श्रीगणेशाय नमः ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति ॥
प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययम् ।
महादेवं महात्मानं सर्वस्य जगतः पतिम् १
ब्रह्माणं लोककर्त्तारं सर्वज्ञमपराजितम् ।
प्रभुं भूतभविष्यस्य साम्प्रतस्य च सत्पतिम् २
ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यञ्चैव धर्मश्च सहसिद्धिचतुष्टयः ३
य इमान् पश्यते भावान्नित्यं सदसदात्मकान् ।
आविशन्ति पुनस्तं वै क्रियाभावार्थमीश्वरम् ४
लोककृल्लोकतत्त्वज्ञो योगमास्थाय तत्त्ववित् ।
असृजत् सर्वभूतानि स्थावराणि चराणि च ५
तमजं विश्वकर्माणं चित्पतिं लोकसाक्षिणम् ।
पुराणाख्यानजिज्ञासुर्व्रजामि शरणं प्रभुम् ६
ब्रह्मवायुमहेन्द्रेभ्यो नमस्कृत्य समाहितः ।
ऋषीणाञ्च वरिष्ठाय वसिष्ठाय महात्मने ७
तन्नप्त्रे चातियशसे जातूकर्णाय चर्षये
वसिष्ठाय च शुचये कृष्णद्वैपायनाय च ८
पुराणं सम्प्रवक्ष्यामि ब्रह्मोक्तं वेदसम्मितम्
धर्मार्थन्यायसंयुक्तैरागमैः सुविभूषितम् ९
असीमकृष्णे विक्रान्ते राजन्येऽनुपमत्विषि
प्रशासतीमां धर्मेण भूमिं भूमिपसत्तमे १०
ऋषयः संशितात्मानः सत्यव्रतपरायणाः

Branch 29A: Purāṇa (14B) Vāyu Purāṇa

Ending:

गयायाञ्च वृषोत्सर्गात्त्रिः सप्तकुलमुद्धरेत् ७०
यत्र तत्र स्थिता देवा ऋषयोऽपि जितेन्द्रियाः
आद्यं गदाधरं ध्यात्वा श्राद्धपिण्डादिदानतः ७१
कुलानां शतमुद्धृत्य ब्रह्मलोकं नयेत् पितृन्
गया गयो गया दित्यो गायत्री च गदाधरः ७२
गया गयासुरश्चैव षड्गया मुक्तिदायकाः
गयाख्यानमिदं पुण्यं यः पठेत्सततं नरः ७३
शृणुयाच्छ्रद्धया यस्तु स याति परमां गतिम्
पाठयेद्वा गयाख्यानं विप्रेभ्यः पुण्यकृन्नरः ७४
गयाश्राद्धं कृतं तेन कृतं तेन सुनिश्चितम्
गयाया महिमानञ्च ह्यभ्यसेद्यः समाहितः ७५
तेनेष्टं राजसूयेन अश्वमेधेन नारद
लिखेद्वा लेखयेद्वापि पूजयेद्वापि पुस्तकम् ७६
तस्य गेहे स्थिरा लक्ष्मीः सुप्रसन्ना भविष्यति
उपाख्यानमिदं पुण्यं गृहे तिष्ठति पुस्तकाम् ७७
सर्पाग्निचौरजनितं भयं तत्र न विद्यते
श्राद्धकाले पठेद्यस्तु गयामाहात्म्यमुत्तमम् ७८
विधिहीनन्तु तत्सर्वं पितॄणान्तु गयासमम्
यानि तीर्थानि त्रैलोक्ये तानि दृष्टानि तत्र वै
येन ज्ञातं गयाख्यानं श्रुतं वा पठितं मुने ७९सूत उवाच । सनत्कुमारो मुनिपुङ्गवाय पुण्यां कथाञ्चाथ निवेद्य भक्त्या । स्वमाश्रमं पुण्यवनै रुपेतं विसृज्य संगीतगुरुं जगाम ८० इति श्रीमहापुराणे वायुप्रोक्ते गयामहात्म्यं नाम पञ्चाशत्तमोऽध्यायः ५० समाप्तमिदं वायुपुराणम् ।

Discussion: Vāyu Purāṇa is a variant of Brahmāṇḍa Pūrāṇa.

Reference: *The Vāyumahāpurāṇam*, (Delhi: Nag, 1983).

## Branch 29A: Purāṇa (15) Skanda Purāṇa

Structure: 94,000 verses, in seven *Khaṇḍas*

Beginning:

अथ श्रीस्कान्दे महापुराणे प्रथमं माहेश्वरखण्डं प्रारभ्यते ।
श्रीगणेशाय नमः । ॐ नमो भगवते वासुदेवाय ।
ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १
व्यास उवाच
यस्याज्ञया जगत्स्रष्टाविरिंचिः पालको हरिः ।
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने १
तीर्थानामुत्तम तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ।
तत्रैव नैमिपारण्ये शौनकाद्यास्तपोधनाः ।
दीर्घसत्रं प्रकुर्वंतः सत्रिणः कर्मचेतसः २
तेषां संदर्शनौत्सुक्यादागतो हि महा तपाः ।
व्यासशिष्यो महाप्राज्ञो लोमशोनाम नामतः ३
तत्रागतं ते ददृशुर्मुनयो दीर्घसत्रिणः ।
उत्तस्थुर्युगपत्सर्वे सार्घ्यहस्ताः समुत्सुकाः ४
दत्त्वार्घ्यपाद्यं सत्कृत्य मुनयो वीतकल्मषाः ।
तं पप्रच्छुर्महाभागाः शिवधर्मं सविस्तरम् ५
ऋषय ऊचुः ।
कथयस्व महाप्राज्ञ देवदेवस्य शूलिनः ।
महिमानं महाभाग ध्यानार्चनसमन्वितम् ६
संमार्जने किं फलं स्यात्तथा रंगावलीषु च ।
प्रदाने दर्पणस्याथ तथा वै चामरस्य च ७
प्रदाने च वितानस्य तथा धारागृहस्य च
दीपदाने किं फलं स्यात्पूजायां किं फलं लभेत् ८
कानिकानिच पुण्यानि कथ्यतां शिवपूजने
इतिहासपुराणानि वेदाध्ययनमेव च १०
शिवस्याऽग्रे प्रकुर्वन्ति कारयन्त्यथवा नराः

Branch 29A: Purāṇa (15) Skanda Purāṇa

Ending:

पापं प्रशममायाति सर्वतीर्थफलं लभेत् २०
अमृतेनोदरस्थेन म्रियन्ते सर्वदेवताः
कण्ठस्थितविषेणापि यो जीवति स पातु वः २१
व्यास उवाच
इत्युक्त्वोपरते सूते शौनकादिमहर्षयः
संपूज्य विधिवत्सूतं प्रशस्याथाभ्यनन्दयन् २२
ऋषय ऊचुः
कथितो भवता सर्गः प्रतिसर्गस्तथैव च
वंशानुवंशचरितं पुराणानामनुक्रमः २३
मन्वन्तरप्रमाणं च ब्रह्माण्डस्य च विस्तरः
ज्योतिश्चक्रस्वरूपं च यथावदनुवर्णितम् २४
धन्याः स्म कृतकृत्याः स्म वयं तव मुखाम्बुजात्
स्कान्दं महापुराणं हि श्रुत्वा सुतातिहर्षिताः २५
वयं महर्षयो विप्राः प्रदद्मोऽद्य तवाऽऽशिषः
व्यासशिष्य महाप्राज्ञ चिरं जीव सुखी भव २६
इति दत्त्वाऽऽशिषस्तस्मै दत्त्वा वासोविभूषणम् ।
विसृज्य लोमशं सूतं यज्ञकर्माण्यथाचरन् २७
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां सप्तमं प्रभासखण्डे चतुर्थे द्वारकामाहात्म्ये स्कान्दमहापुराणश्रवणपठनप्लस्तकप्रदानपौराणिक-व्यासपूजनमाहात्म्यवर्णनपूर्वकं समस्तस्कान्दमहापुराणग्रन्थसमाप्त्युप-संहारमूतसत्कारवृत्तान्तवर्णनंनाम चतुश्चत्वारिंशत्तमोऽध्यायः ४४
इति श्रीस्कान्दे महापुराणे सप्तमे प्रभासखण्डे चतुर्थं द्वारकामाहात्म्यं सम्पूर्णम् । ७ - ४ ।
इति श्रीस्कान्दे महापुराणे सप्तमं प्रभासखण्डं सम्पूर्णम् ।

Reference: Tagare, G.V., *The Skanda-Purāṇa*, (Delhi: Motilal Banarsidass, 1992).

## Branch 29A: Purāṇa (16) Garuḍa Purāṇa

Structure: Two Main Divisions, a total of 311 chapters, and about 8,000 verses.

Beginning:

श्रीकृष्णद्वैपायनव्यासमहामुनिप्रणीतं श्रीगरुडमहापुराणम् । पूर्वार्द्धम् ।
प्रथमोऽध्यायः ।
अजमजरमनन्तं ज्ञानरूपं महान्तं शिवममलमनादिं भूतदेहादिहीनम् ।
सकलकरणहीनं सर्वभूतस्थितं तं हरिममलममायं सर्वगं वन्द एकम् १
नमस्यामि हरिं रुद्रं ब्रह्माणञ्च गणाधिपम् ।
देवीं सरस्वतीञ्चैव मनोवाक्कर्मभिः सदा २
सूतं पौराणिकं शान्तं सर्वशास्त्रविशारदम् ।
विष्णुभक्तं महात्मानं नैमिषारण्यमागतम् ३
तीर्थयात्राप्रसङ्गेन उपविष्टं शुभासने ।
ध्यायन्तं विष्णुमनघं तमभ्यर्च्यास्तुवन् कविम् ४
शौनकाद्या महाभागा नैमिषीयास्तपोधनाः ।
मुनयो रविसङ्काशाः शान्ता यज्ञपरायणाः ५
ऋषय ऊचुः ।
सूत जानासि सर्वं त्वं पृच्छामस्त्वामतो वयम् ।
देवतानां हि को देव ईश्वरः पूज्य एव कः ६
को ध्येयः को जगत्स्रष्टा जगत्पाति च हन्ति कः ।
कस्मात् प्रवर्त्तते धर्मो दुष्टहन्ता च कः स्मृतः ७
तस्य देवस्य किं रूपं जगत्सर्गः कथं मतः
कैर्व्रतैः स तु तुष्टः स्यात् केन योगेन वाप्यते ८
अवताराच के तस्य कथं वंशादिसम्भवः
वर्णाश्रमादिधर्माणां कः पाता कः प्रवर्त्तकः ९
एतत्सर्वं तथाऽन्यच्च ब्रूहि सूत महामते
नारायणकथाः सर्वाः कथयास्माकमुत्तमाः १०
सूत उवाच
पुराणं गारुडं वक्ष्ये सारं विष्णुकथाश्रयम्
गरुडोक्तं कश्यपाय पुरा व्यासाच्छ्रुतं मया ११

Branch 29A: Purāṇa (16) Garuḍa Purāṇa

Ending:

ऋषयः सर्वमेतत्तु जन्तूनां प्रभवादिकम्
मया प्रोक्तं हि वै मुक्त्यै प्रेतस्य चौर्ध्वदैहिकम्
निदानं वच्मि लोकानां हिताय परमौषधम् ४३
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ४४
विष्णुर्माता पिता विष्णुर्विष्णुः स्वजनबान्धवः
येषामेवं स्थिरा बुद्धिर्न तेषां दुर्गतिर्भवेत् ४५
मङ्गलं भगवान्विष्णुर्मङ्गलं गरुडध्वजः
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनं हरिः ४६
हरिर्भागीरथी विप्रा विप्रा भागीरथी हरिः
भागीरथी हरिर्विप्राः सारमेतज्जगत्त्रये ४७
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ४८
श्रीभगवानुवाच
इति सूतमुखोद्गीर्णां सर्वशास्त्रार्थमण्डनीम्
वैष्णवीं वाक्सुधां पीत्वा ऋषयस्तुष्टिमाप्नुयुः ४९
प्रशशंसुस्तथान्योन्यं सूतं सर्वार्थदर्शिनम्
प्रहर्षमतुलञ्चापुः शौनकाद्या महर्षयः ५०
सर्वेषां मङ्गलं भूयात्सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ५१
इति गरुडपुराणे प्रेतकल्पे प्रजानां हितमभिहितमादौ सूतपुत्रेण पुण्यम् ।
क्रतुकरणगतानां नैमिषे सन्मुनीनां श्रवणगतमकुर्वन् किं विजानाति मर्त्यः
इति श्रीगारुडे महापुराणे प्रेतकल्पे पञ्चत्रिंशोऽध्यायः ३५
समाप्तमिदमुत्तरखण्डम् । समाप्तोऽयं ग्रन्थः

Reference: Pandey, Ramtej, *Garuḍapurāṇa of Kṛṣṇadvaipāyana Vyāsa*, (Varanasi: Chowkhamba Vidyabhawan, 1986).

## Branch 29A: Purāṇa (17) Kūrma Purāṇa

Structure: Pūrvārdha and an Uttarārdha, and approximately 6000 verses.

Beginning:

कूर्मपुराणम् । पूर्वभागः । प्रथमोऽध्यायः ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
नमस्कृत्याप्रमेयाय विष्णवे कूर्मरूपिणे ।
पुराणं सम्प्रवक्ष्यामि यदुक्तं विश्वयोनिना १
सत्रान्ते सूतमनघं नैमिषेया महर्षयः ।
पुराणसंहितां पुण्यां पप्रच्छू रोमहर्षणम् २
त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ३
तस्य ते सर्वरोमाणि वचसा हृषितानि यत् ।
द्वैपायनस्य तु भवांस्ततो वै रोमहर्षणः ४
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः ।
मुनीनां संहितां वक्तुं व्यासः पौराणिकीं पुरा ५
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति ।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ६
तस्माद्भवन्तं पृच्छामः पुराणं कौर्ममुत्तमं ।
वक्तुमर्हसि चास्माकं पुराणार्थविशारद ७
मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः
प्रणम्य मनसा प्राह गुरुं सत्यवतीसुतम् ८
रोमहर्षण उवाच
नमस्कृत्य जगद्योनिं कूर्मरूपधरं हरिम्
वक्ष्ये पौराणिकीं दिव्यां कथां पापप्रणाशिनीम् ९
यां श्रुत्वा पापकर्मापि गच्छेत परमां गतिम्
न नास्तिके कथां पुण्यामिमां ब्रूयात् कदाचन १०
श्रद्दधानाय शान्ताय धार्मिकाय द्विजातये
इमां कथामनुब्रूयात् साक्षान्नारायणेरिताम् ११

Branch 29A: Purāṇa (17) Kūrma Purāṇa

Ending:

स प्रेत्य गत्वा निरयान् शुनां योनिं व्रजत्यधः १३९
नमस्कृत्य हरिं विष्णुं जगद्यौनिं सनातनम्
अध्येतव्यमिदं शास्त्रं कृष्णाद्वैपायनं तथा १४०
इत्याज्ञा देवदेवस्य विष्णोरमिततेजसः
पाराशर्यस्य विप्रर्षेर्व्यासस्य च महात्मनः १४१
श्रुत्वा नारायणाद्देवान्नारदो भगवानृषिः
गौतमाय ददौ पूर्वं तस्माच्चैव पराशरः १४२
पराशरोऽपि भगवान् गङ्गाद्वारे मुनीश्वराः
मुनिभ्यः कथयामास धर्मकामार्थमोक्षदम् १४३
ब्रह्मणा कथितं पूर्वं सनकाय च धीमते
सनत्कुमाराय तथा सर्वपापप्रणाशनम् १४४
सनकाद्भगवान् साक्षाद्देवलो योगवित्तमः
अवाप्तवान् पञ्चशिखो देवलादिदमुत्तमम् १४५
सनत्कुमाराद्भगवान् मुनिः सत्यवतीसुतः
लेभे पुराणं परमं व्यासं सर्वार्थसञ्चयम् १४६
तस्माद्व्यासादहं श्रुत्वा भवतां पापनाशनः
ऊचिवान्वै भवद्भिश्च दातव्यं धार्मिके जने १४७
तस्मै व्यासाय गुरवे सर्वज्ञाय महर्षये ।
पाराशर्याय शान्ताय नमो नारायणात्मने १४८
यस्मात् सञ्जायते कृत्स्नं यत्र चैव प्रलीयते ।
नमस्तस्मै परेशाय विष्णवे कूर्मरूपिणे १४९
इति श्रीकौर्मे महापुराणे उत्तरभागे प्रतिसर्गादिकथनं नाम
चतुश्चत्वारिंशोऽध्यायः ४४
समाप्त उत्तरभागः । इति कूर्मपुराणं समाप्तम्

Reference: Rāmaśaṃkarabhaṭṭācārya, *Kūrmapurāṇam*, (Vārāṇasī: Iṇḍolāṅjikala Bukahāusa, 1967).

Branch 29A: Purāṇa (18) Matsya Purāṇa
Structure: 14,062 verses in 291 chapters.
Beginning:
श्रीमद्द्वैपायनमुनिप्रणीतं मत्स्यपुराणम् । अथ प्रथमोऽध्यायः
प्रचण्डताण्डवाटोपे प्रक्षिप्ता येन दिग्गजाः
भवन्तु विघ्नभङ्गाय भवस्य चरणाम्बुजाः १
पातालादुत्पतिष्णोर्मकरवसतयो यस्य पुच्छाभिघाता-
दूर्ध्वं ब्रह्माण्डखण्डव्यतिकरविहितव्यत्ययेनाऽऽपतन्ति ।
विष्णोर्मत्स्यावतारे सकलवसुमतीमण्डलं व्यश्नुवाना-
स्तस्यास्योदीरितानां ध्वनिरपहरतादश्रियं वः श्रुतीनाम् ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् २
अजोऽपि यः क्रियायोगान्नारायण इति स्मृतः
त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयंभुवे ३
सूतमेकाग्रमासीनं नैमिषारण्यवासिनः
मुनयो दीर्घसत्रान्ते पप्रच्छुर्दीर्घसंहिताम् ४
प्रवृत्तासु पुराणीषु धर्म्यासु ललितासु च
कथासु शौनकाद्यास्तु अभिनन्द्य मुहुर्मुहुः ५
कथितानि पुराणानि यान्यस्माकं त्वयाऽनघ
तान्येवामृतकल्पाणि श्रोतुमिच्छामहे पुनः ६
कथं ससर्ज भगवील्लोकनाथश्चराचरम्
कस्माच्च भगवान्विष्णुर्मत्स्यरूपत्वमाश्रितः ७
भैरवत्वं भवस्यापि पुरारित्वं च केन हि
कस्य हेतोः कपालित्वं जगाम वृषभध्वजः ८
सर्वमेतत्समाचक्ष्व सूत विस्तरशः क्रमात्
त्वद्वोक्येनामृतस्येव न तृप्तिरिह जायते ९
सूत उवाच
पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः
मात्स्यं पुराणमखिलं यज्जगाद गदाधरः १०

Branch 29A: Purāṇa (18) Matsya Purāṇa

Ending:

प्रतिमालक्षणं तद्वद्देवताराधनं ततः २७
प्रासादलक्षणं तद्वन्मण्डपानां तु लक्षणम्
भविष्यद्राजनिर्देशो महादानानुकीर्तनम्
कल्पानुकीर्तनं तद्वद्ग्रन्थानुक्रमणी तथा २८
एतत्पवित्रमायुष्यमेतत्कीर्तिविवर्धनम्
एतत्पवित्रं कल्याणं महापापहरं शुभम् २९
अस्मात्पुराणात्सुकृतं नराणां तीर्थावलीनामवगाहनानाम्
समस्तधर्माचरणोद्भवानां सदैव लाभश्च महाफलानाम् ३०
एतत्पुराणं परमं सर्वदोषविघातकम्
मत्स्यरूपेण हरिणा कथितं मनवेऽर्णवे ३१
अस्मात्पुराणादपि पादमेकं पठेत्तु यः सोऽपि विमुक्तपापः
नारायणस्याऽऽस्पदमेति नूनमनङ्गवद्दिव्यवपुः सुखी स्यात् ३२
पुराणमेतत्सकलं रहस्यं श्रद्धान्वितः पुण्यमिदं शृणोति
स चाश्वमेधावभृथप्रभावं फलं समाप्नोति हरप्रसादात् ३३
शिवं विष्णुं समभ्यर्च्य ब्रह्माणं सदिवाकरम्
श्लोकं श्लोकार्धपादं वा श्रद्धया यः शृणोति वा
श्रावयेद्वाऽपि धर्मज्ञस्तत्फलं शृणुत द्विजाः ३४
ब्राह्मणो लभते विद्यां क्षत्रियो लभते महीम्
वैश्यो धनमवाप्नोति सुखं शूद्रस्तु विन्दति ३५
आयुष्मान्पुत्रवांश्चैव लक्ष्मीवान्पापवर्जितः
श्रुत्वा पुराणमखिलं शत्रुभिश्चापराजितः ३६
इति श्रीमात्स्ये महापुराणेऽनुक्रमणिका नामैकनवत्यधिकद्विशततमोऽध्यायः
२९१ आदितः श्लोकानां समष्टयङ्काः १४०६२
इति श्रीमद्द्वैपायनमुनिप्रणीतं मत्स्यपुराणं समाप्तम्

Reference: *Śrīmaddvaipāyanamunipraṇītaṃ Matsyapurāṇam*, (Ānandāśrama Press, 1981).

## Branch 29B: Upapurāṇa (01) Ādi Purāṇa

Structure: 29 chapters

Beginning:

आदिपुराणम् । प्रथमो ध्यायः । ॐ नमो भगवते वासुदेवाय ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् १
आदि पुराण माहात्म्य
रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौप्रजानां प्रलये तमस्पृशे ।
रवीन्दुनेत्राय च लोकसाक्षिणे चिन्मात्ररूपाय परात्मरूपिणे १
ब्रह्मेति यस्य निगमैर्विवृतञ्चिदंशो मायेश्वरः पुरुषरूपधरो यदंशः ।
प्राणो दक्षो बलधियां परमो विशुद्धः आनन्दसत्यवपुषे प्रणमामि तस्मै २
जीवो रहस्येव विधाय पापं न निष्कृतिं प्रैति हि विश्वमूर्त्तेः ।
सदात्मरूपोऽन्तरतो हि शश्वत् पापञ्च पश्यत्यथ पुण्यकृत्यम् ३
पापात्मभिस्तन्निभृते कृतेऽपि पापेऽनुतापा नलतस्त एव ।
दग्धा भवेयुः सततं नु येन नमामि तं सत्पुरुषं परेशम् ४
अविद्यान्धा अरे जीवाः प्राणवायुः कदा तु वः ।
निर्गमिष्यति सहसा नास्ति तस्य विनिश्चयः ५
नीति वचनामृतम्
आयुर्हरति वै पुंसामुद्यन्नस्तञ्च यन्नविः ।
असदालापतापैश्च क्षीणंक्षीणं प्रतिक्षणम् ६
अतो भगवतो विष्णोः पुण्श्लोकस्य पावनम् ।
साफल्यमायुषः कुर्य्यात्पीत्वा तु चरितामृतम् ७
अज्ञानान्धजनानां यो मोहान्धतमसं मुनिः
निराचिकीर्पुर्वासव्यां व्यासरूपेण गर्भतः ८
पवित्रे रत्नगर्भाया अवतीर्य युगे युगे
वेदमंत्रपुराणादिपूर्णेन्दुं काशयत्युत ९
कवीश्वरं तं हि वन्दे प्रवरं वै तपस्विनाम्
तत्त्वज्ञानवतां श्रेष्ठं कृष्णद्वैपायनं मुनिम् १०
वेदवृक्षं प्रविभज्य स्वशिष्येभ्यः प्रदाय च

Branch 29B: Upapurāṇa (01) Ādi Purāṇa

Ending:

आनीयाङ्कमथो चुम्बन्वदनं मुदितः परम् ४८
अक्षतञ्च समालोक्य निजभाग्यमतर्कयत्
गोपाः परस्परं प्रोचुरद्भुतं किमभूदिह ४९
द्रुमयोः पतनं कस्मात्सहसा समपद्यत
बालकोऽसौ मृत्युमुखे पतितो विधिनावितः ५०
इति मीमांसमानेषु गोपेषु पतितौ द्रुमौ
तानूचुर्बालकास्तत्र नन्दादीञ्शुद्धबुद्धयः ५१
उलूखलं कर्पयता कृष्णेनेमौ निपातितौ
ताभ्यां विनिर्गतौ देवौ कृष्णानुसदृशौ शुभौ ५२
स्तुत्वा नत्वा उपामन्त्र्य गतावात्मनिकेतनम्
बालानां वचनं केचिज्जगृहुर्नेति केचन ५३
स्मृत्वा पूर्वकृतं कर्म केचित्सत्यं च मेनिरे
सन्दिग्धचेतसः केचिद्बभूवुस्ते ब्रजौकसः ५४
नन्दाद्या व्रजगोपाश्च यशोदाद्याश्च गोपिकाः
पश्यन्तो मां कुशलिनं मोदमापुरसीमकम् ५५
नन्दो महामनास्तत्र द्विजानाहूय श्रद्धया
ददौ दानानि सुभृशं ब्राह्मणेभ्यः समंततः ५६
यशोदा पूर्ववत्त्रस्ता रक्षाविधिमकारयत् ५७
इदं मया ते कथितं महाद्भुतं वाल्ये वयस्यैश्चरितं मया यत् ।
शृणोति यः श्रावयते च भक्ति रनुग्रहो मे भवतीह तस्मिन् ५८
इति श्रीसकलपुराणसारभूते श्रीआदिपुराणे वैयासिके नारदशौनकसंवादे
यमलार्जुनमोक्षवर्णनं नामैकोनत्रिंशोऽध्यायः २९
समाप्तञ्चेदमादिपुराणम्

Ādi Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Dubey, Jagdish Narayan, *Ādi-Purānam*, (Varanasi: Sudarshan Book Agencies, 1990).

## Branch 29B: Upapurāṇa (02) Narasiṃha Purāṇa

Structure: 68 chapters

Beginning:

श्रीनरसिंहपुराणम् प्रथमोऽध्यायः

श्रीलक्ष्मीनृसिंहाय नम्नः । श्रीवेदव्यासाय नमः ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्

देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १

तप्तहाटककेशान्तज्वलत्पावकलोचन

वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते २

पान्तु वो नरसिंहस्य नखलाङ्गूलकोटयः

हिरण्यकशिपोर्वक्षःक्षेत्रासृक्कर्दमारुणाः ३

हिमवद्वासिनः सर्वे मुनयो वेदपारगाः

त्रिकालज्ञा महात्मानो नैमिषारण्यवासिनः ४

येऽर्बुदारण्यनिरताः पुष्करारण्यवासिनः

महेन्द्राद्रिरता ये च ये च विन्ध्यनिवासिनः ५

धर्मारण्यरता ये च दण्डकारण्यवासिनः

श्रीशैलनिरता ये च कुरुक्षेत्रनिवासिनः ६

कौमारपर्वते ये च ये च पम्पानिवासिनः

एते चान्ये च बहवः सशिष्या मुनयोऽमलाः ७

प्राघमासे प्रयागं तु स्नातुं तीर्थ समागताः

तत्र स्नात्वा यथान्यायं कृत्वा कर्म जपादिकम् ८

नत्वा तु माधवं देवं कृत्वा च पितृतर्पणम्

दृष्ट्वा तत्र भरद्वाजं पुण्यतीर्थनिवासिनम् ९

तं पूजयित्वा विधिवत्तेनैव च सुपूजिताः

आसनेषु विचित्रेषु वृष्यादिषु यथाक्रमम् १०

भरद्वाजेन दत्तेषु आसीनास्ते तपोधनाः

कृष्णाश्रिताः कथाः सर्वे परस्परमथाब्रुवन् ११

कथान्तेषु ततस्तेषां मुनीनां भावितात्मनाम्

आजगाम महातेजास्तत्र सूतो महामतिः १२

Branch 29B: Upapurāṇa (02) Narasiṃha Purāṇa

Ending:

इत्येतत् सर्वमाख्यातं पुराणं नारसिंहकम्
सर्वपापहरं पुण्यं सर्वदुःखनिवारणम् १
समस्तपुण्यफलदं सर्वयज्ञफलप्रदम्
ये पठन्त्यपि शृण्वन्ति श्लोकं श्लोकार्धमेव वा २
न तेषां पापबन्धस्तु कदाचिदपि जायते
विष्णवर्पितमिदं पुण्यं पुराणं सर्वकामदम् ३
भक्त्या च वदतामेतच्छृण्वतां च फलं शृणु
शतजन्मार्जितैः पापैः सद्य एव विमोचिताः ४
सहस्रकुलसंयुक्ताः प्रयान्ति परमं पदम्
किं तीर्थैर्गोप्रदानैर्वा तपोभिर्वा किमध्वरैः ५
अहन्यहनि गोविन्दं तत्परत्वेन शृण्वताम्
यः पठेत्प्रातरुत्थाय यदस्य श्लोकविंशतिम् ६
ज्योतिष्टोमफलं प्राप्य विष्णुलोके महीयते
एतत्पवित्रं पूज्यं च न वाच्यमकृतात्मनाम् ७
द्विजानां विष्णुभक्तानां श्राव्यमेतन्न संशयः
एतत्पुराणश्रवणमिहामुत्र सुखप्रदम् ८
वदतां शृण्वतां सद्यः सर्वपापप्रणाशनम्
बहुनात्र किमुक्तेन भूयो भूयो मुनीश्वराः ९
श्रद्धयाश्रद्धया वापि श्रोतव्यमिदमुत्तमम्
भारद्वाजमुखाः सर्वे कृतकृत्वा द्विजोत्तमाः १०
सूतं हृष्टाः प्रपूज्याथ सर्वे स्वस्वाश्रमं ययुः ११
इति श्रीनरसिंहपुराणे सूतभरद्वाजादिसंवादे

Narasiṃha Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: *The Narasiṁhapurānam*, (Delhi: Nag Publishers, 1987).

## Branch 29B: Upapurāṇa (03) Viṣhṇudharmāḥ
Structure: 105 Chapters
Beginning:

विष्णुधर्माः

ॐ नमो भगवते वासुदेवाय
नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १
द्वैपायनौष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शुभं च
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन २

अथ प्रथमोऽध्यायः

कृताभिषेकंतनयं राज्ञः पारीक्षितस्य ह
द्रष्टुमभ्याययुः प्रीत्या शौनकाद्या महर्षयः १
तानागतान्स राजर्षिः पाद्यार्घ्यादिभिरर्चितान्
सुखोपविष्टान्विश्रान्तान्कृतसंप्रश्नसत्कथान् २
तत्कथाभिः कृताह्लादः प्रणिपत्य कृताञ्जलिः
शतानीकोऽथ पप्रच्छ नारायणकथां पराम् ३
राजोवाच
यमाश्रित्य जगन्नाथं मम पूर्वपितामहाः
विपक्षापहृतं राज्यमवापुः पुरुषोत्तमाः ४
द्रौणिब्रह्मास्त्रनिर्दग्धो मम येन पितामहः
परीक्षित्प्राणसंयोगं देवदेवेन लम्भितः ५
तस्य देवस्य माहात्म्यं देवर्षिसिद्धमनुजैः
श्रुतं सुबहुशो मया स्तुतस्याशेषजन्मनः ६
कः स्तोतुमीशस्तमजं यस्यैतत्सचराचरम्
अव्ययस्याप्रमेयस्य ब्रह्माण्डमुदरे शयम् ७
रुद्रः क्रोधोद्भवो यस्य प्रसादाच्च पितामहः
तस्य देवस्य कः शक्तः प्रवक्तुं वा विभूतयः ८

Branch 29B: Upapurāṇa (03) Viṣhṇudharmāḥ

Ending:

पुण्डरीकस्य यज्ञस्य स प्राप्नोति फलं नरः १०१
मधुमाधवसंज्ञे तु यः शृणोति नरस्त्विमान्
सोऽश्वमेधक्रतोर्भूप प्राप्नोत्यविकलं फलम् १०२
शृण्वन्नेतान्निदाघे च धर्मान्धर्मभृतां वर
वाजपेयस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् १०३
वर्षासु चेमान्यो धर्मान्संशृण्वन्वसुधाधिप
राजसूयक्रतोः पुण्यमखिलं समवाप्नुयात् १०४
शरत्काले च संशृण्वन्धर्मानेतान्नरर्षभ
प्राप्नोति गोसवफलं सम्यक् श्रद्धासमन्वितः १०५
ऋतुष्वेतेष्वेतदेव पठतामपि पार्थिव
फलं भवति दुष्टेषु ग्रहेष्वेते शुभप्रदाः १०६
कपिलानां शतस्योक्तं यत्फलं ज्येष्ठपुष्करे
भूयो भूयस्तदाप्नोति पारणे पारणे गते १०७
भक्त्या पठति यश्चैतान्देवस्य पुरतो हरेः
सोऽर्चयत्यवनीपाल ज्ञानयज्ञेन केशवम् १०८
सर्वाबाधास्तथा पापमखिलं मनुजेश्वर
विष्णुधर्मा व्यपोहन्ति संस्मृताः पठिताः श्रुताः १०९
एतत्ते सर्वमाख्यातं रहस्यं परमं हरेः
नातः परतरं किंचिच्छ्राव्यं शुतिसुखावहम् ११०
अत्रोक्तविधियुक्तस्य पुरुषस्य विपश्चितः
न दुर्लभं नरव्याघ्र परमं ब्रह्म शाश्वतम् १११

इति विष्णुधर्मेषु शास्त्रमाहात्म्यं परामृतं धर्मोत्तमं परिसमाप्तमिति

The Viṣṇudharma Purāṇa is listed as an Upapurāṇa in the list found in *Bṛhaddharma Purāṇa* I: 25. 23-26.

Reference: Gruenendahl, Reinhold, ed., *Viṣṇudharmāḥ*: *Precepts for the Worship of Viṣṇu,* 3 vols., (Wiesbaden: Otto Harrassowitz, 1983-1989).

## Branch 29B: Upapurāṇa (04) Vishṇudharmottara Purāṇa

Structure: 807 chapters divided between three *Khaṇḍas*

Beginning:

श्रीगणेशाय नमः ॐ श्रीनारायणाय नमः
अथ श्रीविष्णुधर्मोत्तरप्रारम्भः
नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् १
कृतवर्मा तथा भोजः श्वेतो माहिष्मतीपतिः
कुलिन्दः सर्वदमनो मालविश्चन्द्रवर्द्धनः २
वत्सनाभश्च बाणश्च नन्दीशो दरसत्पतिः
प्रतिसारश्चित्रधनुस्सर्वो वायुरथस्तथा ३
द्रविडः कुसुमापीड ओत्रश्च समरप्रियः
शम्भुः किरातराजश्चश्रौरसो नन्दिवरधनः ४
वटुमूलश्च तूनेशः शाल्वश्च जनमेजयः
सुह्मराराजो दधीकर्णो बाह्लीको दमनस्तथा ५
हिरण्यनाभः कौसल्योदाशार्हो विजयस्तथा
एते चान्ये च राजानः शतशो बहुदक्षिणाः ६
सम्पूर्णचन्द्रवदना गजराजकरोरवः
उपासांचक्रिरे वज्रं सिंहासनगतानृपाः ७
बहुभिर्भूमिपालैश्च तथा वज्रेण धीमता
युधिष्ठिरेण च सदा शोभिता शुशुभे सभा ८
राजानस्ते ततो दृष्ट्वा ऋषीन्दुर्लभदर्शनान्
ब्रह्मलोकस्थमात्मानममन्यन्त यशोभृतः ९
ऊचुस्ते प्रणयाद्वाक्यं वज्रं भूरिसहस्रदम्
यथा त्रेतायुगे राजन् द्वापरे च यथा नृपाः
ब्राह्मणाब्रह्मकल्पाश्च तथैव सुसमागताः १०
अस्मिंस्तिष्ये च संप्राप्ते तव राजन् प्रसादतः
राजन् कृष्णसगोत्रोऽसि तेनेयन्ते सभा नृप ११
उपास्यते महाभागैर्ब्रह्मकल्पैस्तपोधनैः

Branch 29B: Upapurāṇa (04) Vishṇudharmottara Purāṇa

Ending:

निःश्रेयसं तद्भगवानाचष्टां तद्भगवान्विदतां निरस्य पाप्मानं निरस्य कल्मषं शश्वच्छान्तिमुपनय श्रेय उपनय स्वस्तिमुपनय ग्राशिषमुपनय ब्रह्म प्रपद्ये त्वां विष्णो भगवन्पुराडरीकाक्षज्ञानैश्वर्यशक्तिबलतेजोगुणात्मक परमपुरुष परममङ्गल्य पद्मनाभ हयशिरः ग्रादिवराह नरसिंह वामन त्रिविक्रम राम राम वासुदेव सङ्कर्षण प्रद्युम्नानिरुद्ध पुरुष सत्याश्रुत वासुदेव ग्रादिमध्य-निधनकचेष्टित चेष्टात्ममायाहोरात्रयतिमाञ्जिष्ठशुक्लवासः सुपर्ण ताल-मकरध्वजपरमविद्याकर्मकालनाभ स्वस्त्यस्मभ्यं स्वस्ति प्रजाभ्यः ॥

त्वमेव मंत्रं त्वं रक्षा त्वमौषधमनुत्तमम्
त्रिविधादपि दुःखान्मां प्रचोदय जगत्पते १
ब्रह्मन्प्रपद्ये त्वां विष्णो शरणागतवत्सल
तदा शुद्धो महामतिर्भवदुःखविनिर्गतः २
इत्युक्तः स च राजेन्द्र ऋषिणा दिव्यचक्षुषा
नमस्कृत्य ऋषेः पादौ सगणः सह राजभिः
प्रदक्षिणमुपाकृत्य प्रविवेश पुरं स्वकम् ३
ऋषयस्तेऽप्यनुज्ञाता मार्कराडेयेन धीमता
नमस्कृत्य हरिं देवं स्वाश्रमं जग्मिरे तदा ४
राजापि वज्रो धर्मात्मा मार्कराडेयेन भाषितम्
पुरानं चिन्तयन्नित्यं नारायणपरायणः
राज्यं च प्राशिषन्नित्यं प्रजा धर्मेण पालयन् ५
इति श्रीविष्णुमहापुराणे द्वितीयभागे श्रीविष्णुधर्मोत्तरे तृतीयखराडे
मार्कराडेयवज्रसंवादे श्रीनरसिंहस्तोत्रवर्णनं नाम
पञ्चपञ्चाशदुत्तरत्रिशततमोऽध्यायः ३५५
इति श्रीविष्णुधर्मोत्तरं समाप्तम् । समाप्तं चेदं विष्णुमहापुराणम् ।

The Viṣṇudharmottara Purāṇa is listed as an Upapurāṇa in the list found in *Bṛhad-dharma Purāṇa* I: 25. 23-26

Reference: *The Viṣṇudharmottarapurāṇam*, (Delhi: Nag Publishers, 1998).

## Branch 29B: Upapurāṇa (05) Kriyāyogasāropapurāṇa

Structure: 26 Chapters

Beginning:

अथ श्रीपाद्मे महापुराणे सप्तमं क्रियाखंडं प्रारभ्यते ।श्रीगणेशाय नमः ।
अथ क्रियायोगसारखण्डमारभ्यते ।
लक्ष्मीनाथपदारविंदयुगुलंब्रह्मेश्वराद्यामरश्रेणिनिम्रशिरोलिमालिभ्रमलंवंदा-
महेसंततम् ।
भक्त्या योगिमनस्तडागसुषमासंदोहपुष्यत्तमं
गङ्गाम्भोमकरंदबिन्दुनिकरंसंसारदुःखापहम् १
योमूर्तीर्बहुधाविधायभगवान्रक्षन्नशेषंजगद्
यत्पादार्चनतत्परानहिपुनर्मज्जंतिविश्वार्णवे ।
सर्वप्राणिहृदंबुजेषुवसतिर्यस्यप्रभोःसंततं
रम्यक्रोडवपुर्धरायहरयेदेवायतस्मै नमः २
वेदेभ्यउद्धृत्यसमस्तधर्मान्योयंपुराणेषुजगाददेवः ।
व्यासस्वरूपेणजगद्धितायवंदेतमेतंकमलासमेतम् ३
एकदामुनयःसर्वेसर्वलोकहितैषिणः ।
सुरम्येनैमिषारण्येगोष्ठींचक्रुर्मनोरमाम् ४
तत्रांतरेमहातेजाव्यासशिष्योमहायशाः ।
सूतः शिष्यगणैर्युक्तःसमायातोहरिंस्मरन् ५
तमायांतंसमालोक्यसूतंशास्त्रार्थपारगम् ।
नेमुःसर्वेसमुत्थायशौनकाद्यास्तपोधनाः ६
सोपितान्सहसाभक्त्यामुनीन्परमवैष्णवान् ।
ननामदंडवद्भूमौ सर्वधर्मविदांवरः ७
वरासनेमहाबुद्धिस्तैर्दत्तेमुनिसत्तमैः
उवासहमुनिर्मध्येसर्वैःशिष्यगणैर्वृतः ८
तत्रोपविष्टंतंसूतंशौनकोमुनिसत्तमः
बद्धाञ्जलिरिमांवाचमुवाचविनयान्वितः ९
शौनकउवाच
महर्षेसूतसर्वज्ञकलिकालेसमागते

Branch 29B: Upapurāṇa (05) Kriyāyogasāropapurāṇa

Ending:

व्यास उवाच
यत्किंचित्कुरुते कर्ममर्त्योधर्मं कलौयुगे ४६
तदर्पयेन्महाविष्णौ भक्तिभावसमन्वितः
विष्णौ समर्पितं कर्मसर्वमेवाक्षयं भवेत् ४७
व्यास उवाच
इति ते कथितं सर्वं वृत्तं ब्राह्मणसत्तम
यच्छ्रुत्वाभक्तिभावेननरोमोक्षमवाप्नुयात् ४८
सूत उवाच
एवंप्रबोधितस्तेनजैमिनिः परमात्मना
क्रियायोगरतोभूत्वाजगामपरमंपदम् ४९
इमं क्रियायोगसारं व्यासेनोक्तं महात्मना
ये पठंति जनाभक्त्याशृणवंति च मुमुक्षवः ५०
ते सर्वे पातकैर्घोरैर्बहुजन्मार्जितैरपि
विमुक्ताः परमां मुक्तिं लभंते नात्र संशयः ५१
यद्यदिष्टं पठंत्येतच्छृणवन्ति च मुमुक्षवः
लभंते तत्तदेवाशुप्रसादात्कमलापते ५२
श्लोकार्द्धं श्लोकमेकंवाश्लोकपादमथापिवा
नरः पठित्वाश्रुत्वाचलभते वांछितं फलम् ५३
लिखित्वाले खयित्वावायःशास्त्रमिदमर्चयेत्
सविष्णुपूजनस्यैवफलंप्राप्नोतिमानवः ५४
इदमतिशयगुह्यंनिःसृतंव्यासवक्त्राद्रविरतरपुराणंप्रीतिदंवैष्णवानाम् ।
चिरममरवराद्यैर्वैदितांघ्रेर्मुरारेः सकलभुवनभर्त्तुश्चक्रिणःप्रीतयेऽस्तु ५५
इति श्रीपद्मपुराणे क्रियायोगसारखण्डेव्यासजैमिनिसंवादेयुगधर्मनिरूपण-
पूर्वकं पुराणमाहात्म्यवर्णननामषड्विंशतितमोऽध्यायः २६ शुभंभवतु ।

The Viṣṇudharmottara Purāṇa is listed as an Upapurāṇa in the list found in *Bṛhad-dharma Purāṇa* I: 25. 23-26.

Reference: *Padmamahāpurāṇa*, Uttara Kriyā Bhāga, (Delhi: Nag, 1984).

## Branch 29B: Upapurāṇa (06) Kalki Purāṇa

Structure: Three Divisions called Aṃśhas, with a total of 35 chapters.

Beginning:

कल्किपुराणम् । प्रथम अंश । प्रथमोऽध्यायशः--अ ।
सेन्द्रा देवगणा मुनीश्वरजना लोकाः सपालाः सदा
स्वं स्वं कर्म्म सुसिद्धये प्रतिदिनं भक्त्या भजन्त्युत्तमाः ।
तं विघ्नेशमनन्तमच्युतमजं सर्व्वज्ञसर्व्वाश्रयम् ।
वन्दे वैदिकतान्त्रिकादिविविधैः शास्त्रैः पुरो वन्दितम् १
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् २
यद्दोर्दण्डकरालसर्पकवलज्वलाज्वालद्विग्रहाः
नेतुः सत्करवालदण्डदलिता भूपाः क्षितिक्षोभकाः ।
शश्वत् सैन्धववाहनो द्विजजनिः कल्किः परात्मा हरिः
पायात्सत्ययुगादिकृत्स भगवान्धर्म्मप्रवृत्तिप्रियः ३
इति सूतवचः श्रुत्वा नैमिषारण्यवासिनः ।
शौनकाद्या महाभागाः पप्रच्छुस्तं कथामिमाम् ४
हे सूत सर्व्वधर्म्मज्ञ लोमहर्षणपुत्रक ।
त्रिकालज्ञ पुराणज्ञ वद भागवतीं कथाम् ५
कः कलिः कुत्र वा जातो जगतामीश्वरः प्रभुः ।
कथं वा नित्यधर्म्मस्य विनाशः कलिना कृतः ६
इति तेषां वचः श्रुत्वा सूतो ध्यात्वा हरिं प्रभुम् ।
सहर्षपुलकोद्भिन्नसर्व्वाङ्गः प्राह तान्मुनीन् ७
सूत उवाच ।
शृणुध्वमिदमाख्यानं भविष्यं परमाद्भुतम् ।
कथितं ब्रह्मणा पूर्व्वं नारदाय विपृच्छते ८
नारदः प्राह मुनये व्यासायामिततेजसे
स व्यासो निजपुत्राय ब्रह्मराताय धीमते ९
स चाभिमन्युपुत्राय विष्णुराताय संसदि
प्राह भागवतान्धर्मानष्टादशसहस्रकान् १०

Branch 29B: Upapurāṇa (06) Kalki Purāṇa

Ending:

ये भक्त्यात्र पुराणसारममलं श्रीविष्णुभावाप्लुतं
शृणवन्तीह वदन्ति साधुसदसि क्षेत्रे सुतीर्थाश्रमे
दत्त्वागां तुरगं गजं गजवरं स्वर्णं द्विजायादरात्
वस्त्रालङ्करणैः प्रपूज्य विधिवन्मुक्तास्तु एवोत्तमाः ३१
श्रुत्वा विधानं विधिवद्ब्राह्मणो वेदपारगः
क्षत्रियो भूपतिर्वैश्यो धनी शूद्रो महान्भवेत् ३२
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्
विद्यार्थी लभते विद्यां पठनाच्छ्रवणादपि ३३
इत्येतत्पुण्यमाख्यानं लोमहर्षणजो मुनिः
श्रावयित्वामुनीन्भक्त्या ययौ तीर्थाटनादृतः ३४
शौनको मुनिभिः सार्द्धं सूतमामन्त्र्यधर्मवित्
पुण्यारण्ये हरिं ध्यात्वा ब्रह्म प्राप सहर्षिभिः ३५
लोमहर्षणजं सर्वपुराणज्ञं यतव्रतम्
व्यासशिष्यं मुनिवरं तं सूतं प्रणमाम्यहम् ३६
आलोक्य सर्वशास्त्राणि विचार्य च पुनः पुनः
इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ३७
वेदे रामायणे चैव पुराणे भारते तथा
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ३८
सजलजलददेहो वातवेगैकवाहः
करधृतकरवालः सर्वलोकैकपालः ।
कलिकुलवनहन्ता सत्यधर्मप्रणेता
कलयतुकुशलंवः कल्किरूपः स भूपः ३९
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांश एकविंशोऽध्याः २१

Listed as an "Ati-Purāṇa," in the list of 72 Purāṇas and Upapurāṇas presented by Śhivānanda Nauṭiyāla, in the introduction to *Skandapuranantargata Kedarakhandam: Hindi Anuvada Sahita*, (Prayaga: Hindi Sahitya Sammelana, 1994).

Reference: Ksemaraja, Srikrsnadasa and Misra, Baladev Prasad, eds., *Sri-Kalkipuranam*, (Delhi : Nag Publishers, 1986).

## Branch 29B: Upapurāṇa (07) Śhivadharma Purāṇa

Structure: Twelve Chapters

Beginning:

नमस्तुङ्गशिरश्चुम्बि चन्द्रचामरचारवे
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥
सर्व्वाकारमशेषस्य जगतः सर्व्वदाशिषम्
गोब्राह्मणनृपाणाञ्च शिव स्त्रवतु सर्व्वतः ॥
शिवमादौ शिवं मध्ये शिवमन्ते च सर्व्वदा
सर्व्वेषां शिवभक्तानां मनुजानाञ्च न नः ---॥
मेरुपृष्ठे सुखासीनं ऋृषिसङ्घैः समावृतम्
लोकानुग्रहकं शान्तं सर्व्वज्ञं नन्दिकेश्वरम्
तेषां मध्ये समुत्थाय मुनिर्ब्रह्मसुतोत्तमः
सनत्कुमारः सुतपाः पृच्छति स्म यथाविधि ॥
भगवन् सर्व्वधर्म्मज्ञ शिवधर्म्मपरायण
श्रोतुकामाः परन्धर्म्ममिमे सर्व्वे समागताः ॥
अग्निष्टोमादयो यज्ञा बहुवित्तक्रियान्विताः
नात्यन्तफलभूयिष्ठा बह्वायाससमन्विताः ॥
न शक्यन्ते यतः कर्त्तुमल्पवित्तैर्द्विजादिभिः
मुखोपायमतो ब्रूहि सर्व्वकामार्थसाधकम् ॥
हिताय सर्व्वमर्त्त्यानां शिवधर्मं सनातनम्
नन्दिकेश्वर उवाच
श्रूयतामभिधास्यामि सुखोपायं महत् ---
परमं सर्व्वधर्म्माणां शिवधर्म्मं शिवात्मकम् ॥
शिवेन कथितं पूर्व्वम् पार्व्वत्याः षण्मुखस्य च
--- नां देवमुख्यानां अस्माकञ्च विशेषतः ॥
अज्ञानार्णवमग्नानां सर्व्वेषामात्मना विना
शिवधर्म्मोऽत्र यः श्रीमानुद्धारार्थमुदाहृतः ॥
यैरयं शान्तचेतस्कैः शिवभक्तैः शिवार्थिभिः
संसेव्यते परो धर्म्मस्ते --- नात्र संशयः

Branch 29B: Upapurāṇa (07) Śhivadharma Purāṇa

Continuing:

एककालं द्विकालञ्च त्रिष्कालं चापि नित्यशः
ये स्मरन्ति विरूपाक्षं विज्ञेयास्ते गणेश्वराः ॥
कीर्त्तयिष्यन्ति ये रुद्रं सकृदप्याशु तेनराः
सर्व्वपापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ॥
येऽर्च्चयन्ति सदा रुद्रं न ते प्रकृति ---
इत्युक्तो वः समासेन शिवधर्मोऽखिलक्रमात्
निर्द्दिष्टः प्रथमेऽध्याये शेषोऽस्यैव प्रविस्तरः ॥
यस्त्विमं पठते नित्यं शृणुयाद्वापि भक्तितः
स मुक्तः सर्व्वपापैस्तु शिवलोके महीयते ॥
डाकिन्यो विविधाकाराः रक्षान्सि प्रेतनायकाः
न तस्य पीडां कुर्व्वन्ति तथान्येऽपि विहिन्सकाः ॥
धनमायुर्यशो विद्यां प्रभावमतुलं लभेत्
शुभेनोपचयं यान्ति नित्यपूर्णमनोरथाः ॥
इति शिवर्धर्म्मे नन्दिकेश्वरप्रोक्ते प्रथमोऽध्यायः ।
सनत्कुमार उवाच
निर्ज्जरत्वविधिं पुरायं श्रोतुमिच्छामि तत्त्वतः
तत्प्रसादाद्विशेषेण भगवन्नन्दिकेश्वर ॥
यत्पुरायं स्थापिते लिङ्गे कृते चैव शिवालये

Ending:

ॐ उग्राय वायुमूर्त्तये नमः ॐ रुद्रायाग्निमूर्त्तये नमः ॐ भवाय जलमूर्त्तये नमः ॐ सर्व्वाय क्षितिमूर्त्तये नमः ॐ पशुपतये यजमानमूर्त्तये नमः ॐ भीमाय आकाशमूर्त्तये नमःमूर्त्तयोऽष्टौ शिवस्यैताः पूर्व्वादिक्रमयोगतः आग्नेयान्तः प्रयोज्य --- शिवाङ्गप्रपूजनम् ॥

Śhivadharma Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Shāstrī, Mahāmahopādhyāya Haraprasad, ed., *A descriptive catalogue of Sanskrit Manuscripts in the Government Collection under the Care of the Asiatic Society of Bengal*, Vol. V, Purāṇa Manuscripts, (Calcutta: Baptist Mission Press,

Branch 29B: Upapurāṇa (08) Śhivadharmottara Purāṇa

Structure: Twelve Chapters.

Beginning:

ॐ नमः शिवाय

नमोऽस्तु तस्मै सकलेन्दुधारिणे फणीन्द्ररत्नद्युतिकण्ठरागिणे ।
हराय शुभ्राभकपालमालिने विभिन्नदैत्यस्फुरितैकशूलिने ॥
ज्ञानशक्तिधरं शान्तं कुमारं शङ्करात्मजं
देवारिस्कन्दनं स्कन्दमगस्तिः परिपृच्छति
भगवद्दर्शनात्तुल्यमनुजस्यापि सद्गतिः
सप्त जन्मानि विप्रस्तु स्वर्गाद्भ्रष्टः प्रजायते ॥
तेनासि नाथ भूतानां सर्व्वेषामनुकम्पकः
अतः सर्व्वहितं धर्म्मं संक्षेपात् प्रब्रवीहि मे ॥
धर्म्मा बहुविधा देव्याः देवेन कथिताः किल
ते च श्रुतास्त्वया सर्व्वे पृच्छामि त्वामहं ततः ॥
किं प्रधानाः शिवधर्माः शिववाक्यञ्च कीदृशम्
लिङ्गेऽर्च्चितः शिवः केन विधिना संप्रसीदति ॥
विद्यादानञ्च दानानां सर्व्वेषामुत्तमं किल
तच्च श्रुतौ द्विजेन्द्राणां नान्येषां समुदाहृतम्
तत्पुण्यं सर्व्ववर्णानां जायते केन कर्म्मणा ॥
ज्ञेयं कतिविधं तच्च विद्यादानमनुत्तमम्
कानि पुण्यानि कृत्वेह गृहिणः स्वर्गिणः पुनः ॥
मनुष्यलोके सम्भूता योगं विन्दन्ति शाम्भवम्
कर्म्मयज्ञस्तपोयज्ञः स्वाध्यायोध्यानमेव च ॥
ज्ञानयज्ञश्च पञ्चैते महायज्ञाः प्रकीर्त्तिताः
एषाञ्च पञ्चयज्ञानामुत्तमः कतमः स्मृतः ॥
एतद्यज्ञरतानाञ्च प्रदाने कीदृशं फलम्
धर्म्माधर्म्मप्रभेदाश्च कियन्तः परिकीर्त्तिताः ॥
तत् साधनाः कतिविधाः गतयश्च तदात्मिकाः
स्वर्गनारकिनां पुंसामायातानां पुनः क्षितौ

Branch 29B: Upapurāṇa (08) Śhivadharmottara Purāṇa

Continuing:

कानि चिह्नानि जायन्ते भुक्तशेषेण कर्म्मणा ॥
संसारसागराद्धोरात् धर्म्माधर्म्मोर्म्मिसङ्कुलात् ।
गर्भादिदुःखफेनाढ्यान्मुच्यन्ते देहिनः कथम् ॥
इति शिवधर्म्मोत्तरे षडङ्गविधिर्नाम प्रथमोऽध्यायः समाप्तः

Excerpt from Chapter 5:

अथ धर्म्माः शिवेनोक्ताः शिवधर्म्मागमोत्तरे
ज्ञेया बहुविधास्ते च कर्म्मयोगप्रभेदतः ॥
हिंसादोषविनिर्म्मुक्ताः क्लेशायासविवर्ज्जिताः
सर्व्वभूतहिताः शुद्धाः सुसूक्ष्माः सुमहत्फलाः ॥
अनन्तशाखाकलिला शिवमूले च संस्थिताः
सर्व्वे सर्व्वगुणोपेताः शिवधर्म्माः सनातनाः ॥

Ending:

परमेशप्रसादेन मुच्यते नात्र संशयः
यस्मादेवं अतः कुर्यात् शिवपुस्तकवाचनम् ॥
भोगापवर्गफलदं शिवभक्तो दिने दिने
न मारी न च दुर्भिक्षं न रक्षांसि न चेतयः ॥
नाकाले म्रियते राजा पीड्यते न च शत्रुभिः
शृणोति यत्र सततं शिवधर्म्मं नराधिपः ॥
तत्र देशे भवेन्नित्यं सर्व्वेषां देहिनां शिवम्
इति शिवधर्मोत्तरे द्वादशमोऽध्यायः समाप्तम्
शिवधर्मोत्तरं शास्त्रं समाप्तमिति

The Śivadharmottara Purāṇa is the latter half of the Śivadharma Purāṇa; it is sometimes considered an independent work, but it is not listed in any of the lists of Upapurāṇas.

Reference: Shāstrī, Mahāmahopādhyāya Haraprasad, ed., *A descriptive catalogue of Sanskrit Manuscripts in the Government Collection under the Care of the Asiatic Society of Bengal*, Vol. V, Purāṇa Manuscripts, (Calcutta: Baptist Mission Press, 1928).

## Branch 29B: Upapurāṇa (09) Parāśharopapurāṇa

Structure: 18 chapters and 1008 verses.

Beginning:

श्रीगणेशाय नमः श्रीसाम्बसदाशिवाय नमः
सौरमण्डलमध्यस्थं साम्बं संसारभेषजम्
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् १
मेरुशृङ्गे समासीनं संसारोदधितारकम्
शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् २
पप्रच्छ परमं गुह्यं भक्त्या परमया मुदा
भवपाशेन बद्धानां भवपाशविमोचनम् ३
पराशरोऽपि भगवान् भवानीपतिवल्लभः
प्राह कारुणिकः श्रीमान् ध्यात्वा साम्बं त्रिलोचनम् ४
श्रीपराशर उवाच
पुरा पुराणमखिलं व्यासः सत्यवतीसुतः
कृत्वा शिवप्रसादेन मुनीनां भावितात्मनाम् ५
दर्शयित्वा मुनीन्द्रैस्तु सुप्रसन्नैर्महात्मभिः
पूजितो भवदत्यर्थं पुरजित्पादवल्लभः ६
अस्मिन्नवसरे श्रीमान् महाकारुणिकोत्तमः
महादेवो महादेव्या सह सन्निहितोऽभवत् ७
तं दृष्ट्वा देवदेवेशं त्रिनेत्रं चन्द्रशेखरम्
प्रणम्य मुनयः सर्वे दण्डवत्पृथिवीतले ८
प्रदक्षिणत्रयं कृत्वा प्रपूज्य परमेश्वरम्
प्रदक्षिणत्रयं कृत्वा प्रपूज्य परमेश्वरम्
तुष्टुवुर्हृष्टमनसो विस्मिता विवशाः शुक ९
मुनय ऊचुः
शिवाय सत्यविज्ञानमहानन्दस्वरूपिणे
स्वविलक्षणहीनाय स्वयंवेद्याय ते नमः १०
स्वात्मभूतमहामायाशक्तिवैभवसाक्षिणे
स्त्रष्ट्रे भर्त्रे च संहर्त्रे सर्वस्य जगतः सदा ११

Branch 29B: Upapurāṇa (09) Parāśharopapurāṇa

Ending:

पराशरो मुनिः श्रीमानालोक्य शुकमास्तिकम् १२५
भवानीसहितं देवं भवरोगविनाशनम्
लम्बोदरं गणाध्यक्षं शक्तिपाणिं च षण्मुखम् १२६
नन्दीशं शिवभक्तांश्च प्रणम्य भुवि दण्डवत्
सादरं लोकरक्षार्थमिदं वचनमब्रवीत् १२७
महादेवः परं तत्त्वं विद्या वेदान्तवाक्यजा
विद्याङ्गेषु समस्तेषु वरिष्ठं भस्मधारणम् १२८
गुरुः संसारिणां नृणां संसारोदधितारकः ।
श्रद्धा धर्मस्य मोक्षस्य कारणं सकलस्य च १२९
इतः परं न वक्तव्यमणुमात्रमपि द्विज
श्रोतव्यं च तथा नास्ति शुक सत्यं न संशयः १३०
महादेवप्रसादेन पाराशरसमाह्वयम्
मया पराशरेणैव पुराणमिदमीरितम् १३१
व्यासपुत्रः शुकः श्रुत्वा पाराशर्यं पराशरात्
पुराणं दण्डवद्भूमौ प्रणाममकरोद् गुरोः १३२
नमो रुद्राय देवाय स्वतन्त्रायाखिलात्मने
प्रधानपुरुषेशाय जगत्सर्गादिहेतवे १३३
या विभाति सदा साक्षि स्वरूपेण स्वभावतः
तां नमाम्यादरेणैव शिवामानन्ददायिनीम् १३४
अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितम्
इदमष्टादशाध्यायैः निशोऽत्रैव च दर्शितः १३५
इत्युपपुराणे पाराशरे अष्टादशोऽध्यायः १८ इति पाराशरोपपुराणं समाप्तम्

Parāśharopapurāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Tripāṭhi, Kapiladeva, *Pārāśaropapurāṇam : samīkṣātmakaṃ sampādanam* ( Vārāṇasyām: SampūrṇāndaSaṃskṛtaViśvavidyālayaḥ, 1990).

# Branch 29B: Upapurāṇa (10) Nāndī Purāṇa

Structure: Two Main Divisions, 67 Chapters Total

Beginning:

श्री नांदीमुख पूज्या श्री वक्रांग्यै भगवत्यै नमः ।

मंगलाचरणम् । गणपतिः

शुक्लाबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

जगदंबा

बालार्क मण्डलाभासां चतुर्बाहुं त्रिलोचनां ।
पाशांकुश धनुर्बाण धारयन्तीं शिवां भजे ॥

शिवः

करचरणं कृतं वाक्कायजं कर्मजंवा ।
श्रवण नयनजं वा मानसं वाऽपराधं ॥
विहित मविहितंवा सर्व मे तत्क्षमस्व ।
जय जय करुणाब्धे श्री महादेवशंभो ॥

विष्णुः

सच्चिदानंद रूपाय जगदंकुर हेतवे ।
सदोदिताय पूर्णाय नमोऽनंताय विष्णवे ॥

सूर्यः

हिरण्मयेन पात्रेण सत्यस्याऽपिहितं मुखम् ।
तत्त्वंपूषन्नपावृणु सत्य धर्माय दृष्टये ॥

गुरुनी स्तुति

अज्ञान तिमिरांधस्य ज्ञानांजन शलाकया ।
चक्षुरुन्मिलितं येन तस्मै श्रीगुरवे नमः ॥

परमात्मानी स्तुति

श्रीहरिं परमानंद मुपदेष्टा रमीश्वरम् ।
व्यापकं सर्व लोकानां कारणं तं नमाम्यहम् ॥

दक्षिणामूर्तिः

ईश्वरोगुरु रात्मेति मूर्ति भेद विभागिने ।

Branch 29B: Upapurāṇa (10) Nāndī Purāṇa

Ending:

परस्पर विरोधेन नभवंति कदाचन
अटयत् कलौ महामध्ये सदाचार प्रवर्तकः १०३
तेषां च सत्कुले जन्म स्वयंज्ञाति युगे युगे
ब्रह्मज्ञानी महाविप्रा संप्रयाति शिवालये १०४
कलौयुगे च आकारः आद्यंत विवर्जितः
मध्ये धर्म विजानीयात् इति संज्ञां विधाय च १०५
निवसंति सदाचारे विद्यांचैव भविष्यति
प्रचलंति कियत्कालं क्रतेत्यादि महाफलं १०६
नारदशाप दग्धेन नंदवाणेषु ब्राह्मणि
सौख्यं जायते सापि करकाष्टं विहाय च १०७
भवंति सुखिनः सर्वे रूपयौवन गर्जिताः
करकंकण संयुक्ता हेमभार परिवृत्ताः १०८
दिव्य चीर महाशोभा पदक्षीरोदवाससः
सर्वेशाप विनिर्मुक्ता भर्तृ वाचा परायणाः १०९
नंदवाणस्य माहात्म्यं यःशृणोति स बुद्धिमान्
विद्यार्थी लभते विद्यां धनार्थी धनमाप्नुयात् ११०
मोक्षार्थी लभते मोक्षं नारायण प्रसादतः
अहोनांदीमुखा विप्रा येषांतुष्टो गदाधरः १११
भविष्यंति यथा रूपा प्राप्ते कृतयुगे पुनः

इति श्रीवह्निपुराणे चतुराशीति साहस्त्रयां संहितायां
ब्रह्ममरीचि संवादे ब्रह्मखंडे नांदीमुखवर्णने नंदवाणा माहात्म्ये पुनःकृत
युगावस्था वर्णनं नाम पंचदशोऽध्यायः

Nandi (or Nanda) Purāṇa occurs on a list of the 18 Upapurāṇas found in Parāśara Purāṇa.

Reference: Bola, Vajeśaṁkara Devarāma, ed., *Nāndīpurāṇa: nāndīmukha brāhmaṇajātine śāstrīya itihāsa* [Skt., Guj.](Calcutta : Damodara Viththalarama Parakhani, 1948).

## Branch 29B: Upapurāṇa (11) Sāmba Purāṇa

Structure: 84 Chapters.

Beginning:

अथ साम्बपुराणम् मङ्गलाचरणम्

तिमिरकरिकिरातः प्रत्यहं सप्रभावः
कमलविपिनबन्धुः पुण्यकारुण्यसिन्धुः
भवनभुवनदीपः कुष्ठपापप्रदीपः
सुरभुनिकृतसेवः पातु वो भानुदेवः
सूत उवाच
शृणवन्तु ऋषयः सर्वे साम्बाख्यं पापनाशनम्
पुराणं सर्वरोगघ्नं परं कल्याणदायकम् १
अत्र नानाविधा पूजा सूर्यस्य च महात्मनः
पितुः शापो हि साम्बस्य नारदस्तत्र कारणम् २
शापस्यानुग्रहं चैव तथा पुरनिवेशनम्
मण्डलस्य प्रमाणं हि भ्रमेरारोपणन्तथा ३
तेजसां शातनञ्चैव तथा सूर्यस्तवोऽपि च
सूर्यस्य च ततो नूनं प्रतिमास्थापनन्तथा ४
मगानयनमत्रैव मगमाहात्म्यमेव च
पूजाविधिं रवेस्तत्र पूजा निष्ठा तथैव च ५
मन्त्राभिषेकश्चैव मन्त्रवादस्तथैव च
उत्पत्तिं च लयं चैव भूतसर्गानुवर्णनम् ६
साङ्गोपाङ्गसमाहारः तिथिपूजाप्रवर्तनम्
वश्याकर्षणविद्वेषस्तम्भनोच्चाटनादिकम् ७
प्रतिमालक्षणं चैव पूजावासविधानकम्
मण्डलं निष्क्रियायागसिद्धि योगाश्च साधनम् ८
महामण्डलयागश्च सान्निव्यं द्वादशात्मनः
भ्रमेरारोपणं चैव पुष्पधूपविधिस्तथा ९
प्रोक्षणं पञ्चदानस्य फलं पञ्चप्रकीर्तितम्
वेलाकोणविधानञ्च अर्कधर्मविधिस्तथा १०

Branch 29B: Upapurāṇa (11) Sāmba Purāṇa

Ending:

एतत्सर्वं त्वया ख्यातं बह्वर्थं श्रुति विस्तरम्
यच्छुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ६
सूर्यमुद्दिश्यार्कदेयं पाठकाय महात्मने
येन तुष्येत्तु भगवान् भास्करः पापतस्करः ७
नारद उवाच
शृणु साम्ब महाबाहो कथायामि तवानघ
तमेव सूर्यं विज्ञाय पूजतित्वा यथाविधि ८
गंधपुष्पाक्षतैश्चैव धूपदीपैस्तथोत्तमैः
स्वर्णालंकारवस्त्रैश्च शिरोरत्नविभूषणैः ९
प्रपूज्य सूर्य रूपं तं देयाच कपिला शुभा
गोधूम यवधान्यानि माषमुद्गीस्तिलांस्तथा १०
गजाश्वमहिषोर्दद्याद्रत्नानि विविधानि च
हिरण्यं रजतं चैव कांस्य ताम्रस्य भाजनम् ११
दासदास्यौ तथा दद्याद् भूमिं सस्यवतीं तथा
पट्टवस्त्राण्यनेकानि दद्याद्वै शुद्ध मानसः १२
निक्षुभा च तथा राज्ञी द्वे भार्ये च विवस्वतः
उद्दिश्य तानि देयानि वस्त्रालंकारणानि च १३
एवं यः कुरुते भक्त्या स मर्त्योऽत्र महीतले
पुत्र पौत्रादि संयुक्तो हर्षनिर्भरमानसः १४
भुक्त्वा तु सकलान् भोगान् सूर्यलोके महीयते
अष्टादशपुराणानां श्रवणे यत्फलं लभेत्
तत्फलं समवाप्नोति सत्यं सत्यं वदाम्यहम् १५

इति श्रीसाम्बपुराणे वशिष्ठबृहद्बलसंवादे
चतुरशीतितमोऽध्यायः ८४ शुभं भवतु समाप्तोऽयं ग्रन्थः

Sāmba Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Tripāṭhī, Śrīkṛṣṇamaṇi, *Sāmbapurāṇam*, (Varanasi: Kṛṣṇadāsa Academy, 1983).

Branch 29B: Upapurāṇa (12) Saura Purāṇa
Structure: 69 Chapters.
Beginning:

सौरपुराणं व्यासकृतम्
यस्याज्ञया जगत्स्रष्टा विरञ्चिः पालको हरिः
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने १
तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम्
मुनीनामाश्रयो नित्यं नैमिष्यारण्यमुत्तमम् २
शौनकाद्या महात्मानः शिवभक्ता महौजसः
दीर्घसत्रं प्रकुर्वन्तस्तत्रेशानस्य तुष्टये ३
तस्मिन्तत्रे महाभागो मुनीनां भाग्यगौरवात्
आजगाम मुनीन्द्रष्टुं सूतः पौराणिकोत्तमः ४
तं दृष्ट्वा ते महात्मानो नैमिषारण्यवासिनः
प्रहृष्टाः प्रष्टुमुद्युक्ताः पप्रच्छू रोमहर्षणम् ५
ऋषय ऊचुः -- कथं भगवता पूर्वमादित्येनात्मरूपिणा
पुराणं कथितं सौरं तन्नो वक्तुमिहार्हसि ६
कृष्णद्वैपायनात्साक्षात्पूर्वं हि विदितं त्वया
त्वत्तो नास्ति परो वक्ता पुराणानां महातपः ७
सन्त्यन्ये बहवः शिष्मा अपि तस्य महात्मनः
तथापि शिष्यवात्सल्यात्त्वं पुराणेषु योजितः ८
यान्यन्यानि पुराणानि त्वयोक्तानि महामुने
अलं तैः पार्वतीकान्तभक्तौ भक्तियुतं त्विदम् ९
न यज्ञैर्न तपोभिर्वा न दानैर्न व्रतैस्तथा
शिवभक्तिमृते यस्मान्मुक्तिर्नास्तीति शुश्रुम १०
देवोऽयं भगवान्भानुरन्तर्यामी सनातनः
यो ब्रूते सर्ववस्तूनां तत्त्वं ज्ञात्वैव नान्यथा ११
अतः श्रद्धा हि महती श्रोतुं त्वद्वदनामृतम्
अस्माकं वर्तते सूत रोमहर्षण सुव्रत १२

Branch 29B: Upapurāṇa (12) Saura Purāṇa

Ending:

उभयोश्चैव संयोगः सर्वपापहरः शिवः
इति श्रुत्वा तु देवर्षिर्ब्रह्मणो वचनं तदा ५४
जगाम कर्तुं तीर्थानि शिवभक्तिपुरस्कृतः
एतत्सौरं पुराणं ते यथावत्समुदीरितम् ५५
यच्छ्रुत्वा मनुजः सम्यग्गोसहस्रफलं लभेत्
किं तीर्थैस्तु प्रयागाद्यैः किं यज्ञैर्भूरिदक्षिणैः ५६
यदि श्रुतं श्रद्दधानैः पुराणमिदमुत्तमम्
यत्र देवाधिदेवस्य माहात्म्यं कथ्यते विभोः ५७
गिरीशस्य तु योगीन्द्राः किं तेन सदृशं भवेत्
श्रद्दधानः शिवे भक्तो नियतः शृणुयादिदम् ५८
ब्राह्मणाञ्शिवभक्तांश्च पुरस्कृत्य समाहितः
समाप्य सकलं वेदं पूजयेद्वाचकं नरः ५९
कनकेन सुशुद्धेन तथा चन्दनखण्डकैः
विश्वेश्वरो महादेवः प्रीयतामिति भावतः ६०
दद्यात्स्वर्णं यथाशक्ति वाचकाय सचन्दनम्
यद्येकशी शरमात्राऽपि दत्ता भूमिः शिवार्थिना ६१
सा तारयति दातुर्हि पूर्वजान्सकलानपि
श्रुत्वा ग्रन्थमिमं सम्यग्दद्याद्दानानि शक्तितः ६२
तान्यक्षयफलान्याहुर्मुनयो वेदवादिनः ६३ ३८९९

इति श्रीब्रह्मपुराणोपपुराणे श्रीसौरे सूतशौनकसंवादे
शिवतीर्थकथनं मुनिपत्नीमोहनं नामैकोनसप्ततितमोऽध्यायः ६९
समाप्तमिदं सौरपुराणम्

Saura Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Lele, Kasinatha Sastri, ed., *Saurapurāṇaṃ Vyāsakṛtam*, (Varanasi: Chowkhamba Sanskrit Series Office, 1980).

## Branch 29B: Upapurāṇa (13) Kālikā Purāṇa

Structure: 90 Chapters.

Beginning:

कालिकापुराणम् । प्रथमोऽध्यायः ।
यद्योगिभिर्भवभयार्तिविनाशयोग्यमासाद्य वन्दितमतीवविविक्तचित्तैः
तद्वः पुनातु हरिपादस रोजयुग्ममाविर्भवत् क्रमविलङ्घितभूर्भुवः स्वः १
सा पातु वः सकलयोगिजनस्य चित्तेऽविद्यातमिस्रतरणिर्यतिमुक्तिहेतुः
या चास्य जन्तुनिवहस्य विमोहिनीति माया विभोर्जनुषि शुद्धकुबुद्धिहन्त्री २
ईश्वरं जगतामाद्यं प्रणम्य पुरुषोत्तमम्
नित्यज्ञानमयं बक्ष्ये पुराणं कालिकाह्वयम् ३
मार्कण्डेयं मुनिश्रेष्ठं स्थितं हिमधरान्तिके
मुनयः परिपप्रच्छुः प्रणम्य कमठादयः ४
भगवन् सम्यगाख्यातं सर्वशास्त्राणि तत्त्वतः
वेदान् सर्वांस्तथा साङ्गान् सारभूतं प्रमथ्य च ५
सर्ववेदेषु शास्त्रेषु यो यो नः संशयोऽभवत्
स स च्छिन्नस्त्वया ब्रह्मन् सवित्रेव तमश्चयः ६
जैवातृकाग्र्य भवतः ह्प्रसादाद्विजसत्तम
निःसंशया वयं जाता वेदे शास्त्रे च सर्वशः ७
कृतकृत्या वयं ब्रह्मंस्त्वत्तोऽधीत्य समन्ततः
सरहस्यं धर्मशास्त्रं यदवादि स्वयम्भुवा ८
भूयस्तच्छ्रोतुमिच्छामो हरं काली पुरा कथम्
मोहयामास यतिनं सतीरूपेण चेश्वरम् ९
सर्वदा ध्याननिलयं यमिनं यतिनां वरम्
संक्षोभयामास कथं संसारविमुखं हरम् १०
सती वा कथमुत्पन्ना दक्षदारासु शोभना
कथं हरो मनश्चक्रे दारग्रहणकर्मणि ११
कथं वा दक्षकोपेन त्यक्तदेहा सती पुरा
हिमवत्तनया जाता भूयो वा कथमागता १२
कथमर्धशरीरं साऽहरत स्मररिपोः पुनः

Branch 29B: Upapurāṇa (13) Kālikā Purāṇa

Ending:

तेन गुप्तमिदं सर्वं कामरूपे सुरालये
तमिदानीं समाख्यातं व्यक्तीकृत्य महर्षयः ३२
युस्माभिरपि नो देय गोप्यं लोकेषु सर्वदा
शठाय चलचिंत्ताय नास्तिकायाजितात्मने ३३
भक्तिश्रद्धाविहीनाय न दातव्यं कदाचन
इदं सकृत् पठेद् यस्तु पुराणं कालिकाह्वयम् ३४
स कामानखिलान् प्राप्य शेषेऽमृतमवाप्नुयात्
मन्दिरे लिखितं यस्य पुराणमिदमुत्तमम् ३४
सदा तिष्ठति नो तस्य विघ्नः संजायते द्विजाः
योऽधीतेऽहन्यहन्येतद् गुह्यं तन्त्रमिदं परम् ३६
अधीताः सकला वेदास्तेनेह द्विजसत्तमाः
तस्मान्नैवाधिकोऽन्योऽस्ति कृतकृत्यो विचक्षणः ३७
स सुखी बल्लवाँल्लोके दीर्घायुरपि जायते ३८
यो लोकमीशःसततं बिभर्ति यः पालयत्यन्तकरस्तथान्ते
इदं समस्तं भ्रममभ्रमं वा यदीयरूपं च नमोऽस्तु तस्मै ३९
प्रधानपुरुषो यस्य प्रपञ्चो योगिनां हृदि
यः पुराणाधिपो विष्णुः प्रसीदतु स वः शिवः ४०
यो हेतुरुग्रः पुरुषः पुराणः सनातनः शाश्वत ईश्वरः परः ।
पुराणकृद्वेदपुराणवेद्यः प्रस्तौमि तन्नौमि पुराणशेषे ४१
इति सकलजगद्बिभर्ति यासां मधुरिपुमोहकरी रमास्वरूपा ।
रमयति च हरं शिवास्वरूपा वितरतु वो विभवं शुभानि माया ४२
इति श्रीकालिकापुराणे नवतितमोऽध्यायः ९० इति श्रीकालिकापुराणं

Kālikā Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Shastri, B.N., *The Kālikāpurāṇa, Text, Introduction & Translation in English*, 3 vols., (Delhi: Nag Publishers, 1991).

## Branch 29B: Upapurāṇa (14) Mahābhāgavata Purāṇa

Structure: 81 Chapters.

Beginning:

प्रथमोऽध्यायः । श्रीगणेशाय नमः ।
देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः १
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् २
यामाराध्य विरिञ्चिरस्य जगतः स्रष्टा हरः पालकः
संहर्ता गिरिशः स्वयं समभवद्ध्येया च या योगिभिः ।
यामाद्यां प्रकृतिं वदन्ति मुनयस्तत्त्वार्थविज्ञाः परां
तां देवीं प्रणमामि विश्वजननीं स्वर्गापवर्गप्रदाम् ३
या स्वेच्छयास्य जगतः प्रविधाय सृष्टिं
संप्राप्य जन्म च तथा पतिमाप शम्भुम् ।
उग्रैस्तपोभिरपि यां समवाप्य पत्नीं
शम्भुः पदं हृदि दधे परिपातु सा वः ४
एकदा नैमिषारण्ये शौनकाद्या महर्षयः ।
पप्रच्छुर्मुनिशार्दूलं सूतं वेदविदां वरम् ५
पुराणं साम्प्रतं ब्रूहि स्वर्गमोक्षसुखप्रदम् ।
विस्तृतं परमं यत्र देव्या माहात्म्यमुत्तमम् ६
जायते नवधा भक्तिर्यस्य सश्रवणेन वै
दिव्यज्ञानविहीनानां नृणामपि महामते ७
सूत उवाच
एतदुक्तं महेशेन नारदाय महात्मने
पुराणं परमं गुह्यं महाभागवताह्वयम् ८
तदाह भगवान्व्यासः श्रद्धया भक्तिशालिने
स्वयं जैमिनये पूर्वं पुनस्तद्वो ब्रवीम्यहम् ९
गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन
एतस्य श्रवणे पाठे यत्पुण्य लभते द्विजः १०

Branch 29B: Upapurāṇa (14) Mahābhāgavata Purāṇa

Ending:

साक्षान्महेशतां याति कृतपापशतोऽपि चेत् ३९
यत्र कुत्र च संस्थाय संस्मरेत्परमेश्वरम्
तत्रैव सर्वतीर्थानि निवसन्ति महामते ४०
इति ते कथितं सर्वं यत्पृष्टं मुनिसत्तम
महापापहरं पुण्यं सर्वमङ्गलदं परम् ४१
य इदं शृणुयान्मर्त्यः सश्रद्धः पठतेऽथवा
सर्वपापविनिर्मुक्तः प्रयाति परमं पदम् ४२
व्यास उवाच
एतावदुक्तम् देवेन पृष्टेन मुनिना स्वयम्
खण्डेस्मिञ्जैमिने वाक्यं पुण्यं परमशोभनम् ४३
एतद्यः शृणुयान्मर्त्यः पठेद्वा भक्तिसंयुतः
सोऽन्ते निर्वाणमाप्नोति भुक्त्वा भोगान्मनोगतान् ४४
सुगुप्तमेतत्परमं कथितं शूलपाणिना
महात्मने मुनीन्द्राय नारदाय महामते
यस्य संविद्यते गेहे तमापन्न स्पृशेत्क्वचित् ४५
य इदं परमाख्यानं श्रावयेद्विष्णुसन्निधौ ।
सद्भक्त्या जैमिने तस्य पापं नश्यति तत्क्षणात् ४६
अप्यनेकशतं कोटिजन्मान्तरसुसञ्चितम् ।
एतदाकर्ण्य संत्यज्य पापं मोक्षमवाप्नुयात् ४७
श्रीमहाभागवते उपपुराणे श्रीमहादेवनारदप्रश्नोत्तरकथने
एकाशीतितमोऽध्यायः ।
समाप्तं चेदं महाभागवतं नामोपपुराणम् ॥

Two lists of Upapurāṇas refer to Bhāgavataṃ-dvayam, "the two Bhāgavatas," which according to Hazra in *Studies in the Upapurāṇas*, Vol. 2, are the Devī Bhāgavata and the Mahābhāgavata.

Reference: Kumar, Pushpendra, *The Mahābhāgavata Purāṇa: an Ancient Treatise on Śakti Cult*, (Delhi: Eastern Book Linkers, 1983).

## Branch 29B: Upapurāṇa (15) Devī Bhāgavata Purāṇa

Structure: Twelve *Skandhas.*

Beginning:

श्रीमद्देवीभागवतम् । प्रथमः स्कन्धः । प्रथमोऽध्यायः ।
ॐ सर्वचैतन्यरूपां तामाद्यां देवीं च धीमहि । बुद्धिं या नः प्रचोदयात् १
शौनक उवाच
सूत सूत महाभाग धन्योऽसि पुरुषर्षभ
यदधीतास्त्वया सम्यक्पुराणसंहिताः शुभाः २
अष्टादश पुराणानि कृष्णेन मुनिनाऽनघ
कथितानि सुदिव्यानि पठितानि त्वयाऽनघ ३
पंचलक्षणयुक्तानि सरहस्यानि मानद
त्वया ज्ञातानि सर्वाणि व्यासात्सत्यवतीसुतात् ४
अस्माकं पुण्ययोगेन प्राप्तस्त्वं क्षेत्रमुत्तमम्
दिव्यं विश्वसमं पुण्यं कलिदोषविवर्जितम् ५
समाजोऽयंमुनीनांहिश्रोतुकामोऽस्तिपुण्यदाम्
पुराणसंहितां सूत ब्रूहि त्वं नः समाहितः ६
दीर्घायुर्भव सर्वत्र तापत्रयविवर्जितः
कथयाद्य महाभाग पुराणं ब्रह्मसंमितम् ७
श्रोत्रेन्द्रिययुताः सूत नराः स्वादविचक्षणाः
न शृण्वन्ति पुराणानि वंचिता विधिना हि ते ८
यथा जिह्वेन्द्रियाह्लादः षड्रसैः प्रतिपद्यते
तथा श्रोत्रेंद्रियाह्लादो वचोभिः सुधियांस्मृतः ९
अश्रोत्राः फणिनः कामं मुह्यंति हि नभोगुणैः
सकर्णा ये न शृण्वंति तेप्यकर्णाः कथं न च १०
अतः सर्वे द्विजाः सौम्य श्रोतुकामाः समाहिताः
वर्तंते नैमिषारण्ये क्षेत्रे कलिभयार्दिताः ११
येन केनाप्युपायेन कालातिवाहनं स्मृतम्
व्यसनैरिह मूर्खाणां बुधानां शास्त्रचिंतनैः १२
शास्त्राण्यपि विचित्राणि जल्पवादयुतानि च

Branch 29B: Upapurāṇa (15) Devī Bhāgavata Purāṇa

Ending:
सौरैश्च गाणपत्यैश्च स्वेष्टशक्तेश्च तुष्टये २१
पठितव्यं प्रयत्नेन नवरात्रचतुष्टये
वैदिकैर्निजगायत्रीप्रीतये नित्यशो मुने २२
पठितव्यं प्रत्यनेन विरोधो नात्र कस्यचित्
उपासना तु सर्वेषां शक्तियुक्ताऽस्ति सर्वदा २३
तच्छक्तेरेव तोषार्थं पठितव्यं सदा द्विजैः
स्त्रीशूद्रो न पठेदेतत्कदापि च विमोहितः २४
शृणुयाद्द्विजवक्त्रात्तुनित्यमेवेति च स्थितिः
किं पुनर्बहुनोक्तेन सारं वक्ष्यामि तत्त्वतः २५
वेदसारमिदं पुण्यं पुराणं द्विजसत्तमाः
वेदपाठसमं पाठे श्रवणे च तथैव हि २६
सच्चिदानंदरूपां तां गायत्रीप्रतिपादिताम्
नमामि ह्रींमतीं देवीं धियो यो नः प्रचोदयात्
इति सूतवचः श्रुत्वा नैमिषीयास्तपोधनाः
पूजयामासुरत्युच्चैः सूतं पौराणिकोत्तमम् २८प्रसन्नहृदयाः सर्वे
देवीपादांबुजार्चकाः
निर्वृतिं परमां प्राप्ताः पुराणस्य प्रभावतः २९
नमश्चक्रुः पुनः सूतं क्षमाप्य च मुहुर्मुहुः
संसारवारिधेस्तात प्लवोऽस्माकं त्वमेव हि ३०
इति स मुनिवराणामग्रतः श्रावयित्वा सकलनिगमगुह्यं दौर्गमेतत्पुराणम् ।
नतमथ मुनिसंघं वर्द्धयित्वाऽऽशिषाम्बाचरणकमलभृङ्गो निर्जगामाथ सूतः
इति श्रीदेवीभागवते महापुराणेष्टादशसाहस्त्र्यां संहितायां द्वादशस्कन्धे
चतुर्दशोध्यायः १४ समाप्तोऽयं ग्रन्थः ।

Devī Bhāgavata Purāṇa is listed on five lists of Upapurāṇas, including its own list.

Reference: Pandeya, Ramateja, *Srimaddevībhāgavatam Mahāpurāṇam*, (Varanasi: Chaukhambā Vidyābhavana, 1983).

## Branch 29B: Upapurāṇa (16) Devī Purāṇa
Structure: 128 Chapters
Beginning:
अथ देवीपुराणम् । श्रीगणेशाय नमः । प्रथमोऽध्यायः । ॐ
नमश्चण्डिकायै ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
नमस्कृत्य शिवां देवी सर्वभागवतां शुभाम् ।
पुराणं सम्प्रवक्ष्यामि यथोक्तं ब्रह्मणा पुरा १
ऋषय ऊचुः ।
भगवंस्त्वं समस्तस्य दृष्टादृष्टस्य तत्त्ववित् ।
पुराणार्थ वयं सर्वे आगता भुवि भाविताः २
कथ्यतां यत्र घोराद्या भूताः साम्प्रतदानवाः ।
भविष्याश्च विनाशिष्ये देवी देवनमस्कृता ३
इन्द्रस्य च दिवः प्राप्तिर्हतराज्यस्य दानवैः ।
यथा शक्रो जयं चक्रे देवदेवनमस्कृतः ४
अवतारा मुनिश्रेष्ठ षष्ठिभेदगता यथा ।
पूजयेत् स पृथु राजा देवीं सर्वार्थसाधनीम् ५
यथा मातृसमुत्पती रुरोर्नाशो महात्मनः ।
चामुण्डा येन वा देवी येन वा सर्वमङ्गला ६
निरुक्तानि च नामानि वह्नै सन्तर्पणं यथा ।
वसुधाराविधिस्तात देवतास्थापनादिकम् ७
यत्र मायो महामायो निहतो रामसायकैः
यत्र संस्थापिता देवी बहुधा वसुधातले ८
स्तोत्राणि च विचित्राणि शिवाद्यैः शुभहेतुभिः
कृतानि बहुभेदानि तथा माहात्म्यवर्णना ९
शिवस्य च तथा स्तोत्रं यामलं विष्णुब्रह्मणोः
कृतं लोकोपकाराय शुक्रेण च महास्तवम् १०
रथयात्रादयः पुण्याः कथा पापप्रणाशणीः

Branch 29B: Upapurāṇa (16) Devī Purāṇa

Ending:

वसन्ते भूष्यते देवी उमा सर्वसुखप्रदा
निदाघे वहिर्लोकन्तु सर्वकामसमन्वितम् ५१
तस्मिन् भोगान् महान् भुक्त्वा देवीलोके महीयते
प्रावृट् काले रुद्रलोकं शृणुयाद्याति पार्थिवः ५२
शरत् सर्वानवाप्नोति कामान्राज्यं नृपोत्तम
त्रिः श्रुत्वा भक्तिमास्थाय मुच्यते सर्वपातकैः ५३
विशुद्धश्च भवेद्वंशः सर्वकामफलावहः
पंच श्रुत्वा महाध्यायी स्वर्गलोके महीयते ५४
मातृसंघं यमो नित्यं तुष्यते अविचारणात्
तस्य भोगं वर्णयितुं मम वाणीं न शक्नुयात् ५५
इहलोके शुभं भुक्त्वा तदन्ते शिवलोकतः
खट्वावधं तथा श्रुत्वा विनायकस्य जन्म च ५६
मातृलोकमवाप्नोति क्रीडते च चिरं सुखी
देवीं सम्पूजयित्वा तु विधिना नृपसत्तम ५७
प्रसादश्च प्रकुर्वीत प्रत्यक्षा च भवेत् शिवा ।
सदाचारः शुभाहारः सर्वसंगविवर्जितः ५८
वाचयन् पुराणमेत्तत्तु सर्वकाममवाप्नुयात् ।
वाचयन् शतमर्धं वा प्रत्यक्षं प्राप्नुयाच्छिवम् ५९
एतच्चाभ्युदयपादं शतैस्त्रिभिर्नरोत्तमैः ।
सहस्त्रैर्द्वादशैर्वत्सकथितं सर्वसिद्धिदम् ६०
ॐ नमो दुर्गायै
इति श्री देवीपुराणे वाचनविधिर्नाम अष्टाविंशत्यधिकशततमोऽध्यायः ।
आद्ये देव्यवतारे देवीपुराणं सम्पूर्णम्

Devī Purāṇa is only found in the list of Upapurāṇas given in *Ekāmra Purāṇa* [1.20b-23].

Reference: Kumar, Pushpendra, *Devī Purāṇam:* First Critical Edition, (New Delhi: Srilabahadurasastrikendriyasamskrtavidyapitham, 1976).

## Branch 29B: Upapurāṇa (17) Devīrahasyam

Structure: 60 chapters in two divisions plus a Pariśiṣhṭa.

Beginning:

श्रीदेवीरहस्यम् श्रीगणेशाय नमः । नमस्त्रिपुरसुन्दर्यै
श्रीभैरव उवाच
अधुना देवि वक्ष्यामि रहस्यं परमाद्भुतम्
यन्न सर्वेषु तन्त्रेषु यामलादिषु भाषितम् १
परादेवीरहस्याख्यं तन्त्रं मन्त्रोच्चविग्रहम्
तत्त्वं श्रीषोडशाक्षर्याः सर्वस्वं मम पार्वति २
अप्रकाश्यमदातव्यं परमोच्चफलप्रदम्
भोगापवर्गदं लोके साधकानां सुखावहम् ३
श्रीदेव्युवाच
भगवन् सर्वतन्त्रज्ञ कौलिकेश्वर शङ्कर
त्वत्प्रसादान्मया ज्ञातं तत्त्वं देव्याः सुदुर्लभम् ४
तन्त्रं मन्त्रात्मकं गुह्यं सूचितं भवता स्वयम्
परादेवीरहस्याख्यं दीक्षापूर्वं वदस्व मे ५
श्रीभैरव उवाच
देवीरहस्यमीशानि शृणु त्वं भक्तिपूर्वकम्
येन श्रवणमात्रेण कोटिपूजाफलं लभेत् ६
अथाहं निर्णयं वक्ष्ये परमं गुरुशिष्ययोः
विचार्य विधिवद्धीमान् दीक्षाकर्म समाचरेत् ७
ब्रह्मादिकीटपर्यन्तं जगत् स्थावरजङ्गमम्
परादेव्या पशुत्वेन मोहितं विगतस्पृहम् ८
तथापि तत्प्रसादेन सेवया तत्पदाब्जयोः
कौलिकः पशुभावेन मुक्तो ज्ञानं भजेत् ततः ९
दीक्षां तस्याः शिवे मन्त्री लब्ध्वा गुरुपदार्चनात्
दीक्षितः स भवेज्ज्ञानी दीक्षाहीनो भवेत् पशुः १०
यस्य दीक्षा शिवे नास्ति जीवनं तस्य निष्फलम्
स जातु नोत्तरेद्देवि निरयाम्बुनिधेः क्वचित् ११

Branch 29B: Upapurāṇa (17) Devīrahasyam

Ending:
गुरुर्देवि परो धर्मो गुरुरेव परा गतिः
गुरुमभ्यर्चयेन्नित्यं येन देवी प्रसीदति २५
इतीदं दशमीतत्त्वं सर्वागमरहस्यकम्
सारात्सारतरं देवि गोपनीयं मुमुक्षुभिः २६
इतीदं परमं तत्त्वं तत्त्वं सर्वस्वमुत्तमम्
दुर्गारहस्यसाराढ्यं गुह्यं गोप्यं च साधकैः २७
इति देवीरहस्याख्यस्तन्त्रोऽयं तन्त्रसागरः
सर्वस्वं मे रहस्यं मे सर्वागमनिधिः परः २८
श्रीदुर्गायास्तत्त्वभूतो मन्त्रराजमयो ध्रुवः
सिद्धिप्रदो महादेवि पूजनीयोऽस्ति साधकैः २९
श्रीदेव्युवाच
भगवन् भवता भक्त्या प्रसादोऽयं मयि कृतः
यत्त्वया वर्णितस्तन्त्रः श्रीदुर्गायाः कुलेश्वर ३०
क्रीतास्मि तव दास्यस्मि भक्तास्मि त्रिपुरान्तक
सर्वथा रक्षणीयास्मि किमन्यत् कथयामि ते ३१
श्रीभैरव उवाच
इदं देवीरहस्याख्यं तन्त्रराजं महेश्वरि
अदातव्यमभक्तेभ्यो दुरात्मभ्यो महेश्वरि ३२
स्वपुत्रेभ्योऽन्यशिष्येभ्यो न देयं तु मुमुक्षुभिः
इदं हि सारं तन्त्राणां तत्त्वं सर्वस्वमुत्तमम् ३३
रहस्यं देवि दुर्गाया गोपनीयं स्वयोनिवत्
इति श्रीरुद्रयामलतन्त्रान्तर्गत-श्रीदेवीरहस्ये दशमीविधिनिरूपणं षष्टितमः
पटलः ६०

*Devīrahasya* is listed by Hazra in *Studies in the Upapurāṇas*, Vol. 2, as one of the Śhakta Upapurāṇas.

Reference: Kak, Ram Chandra, and Shastri, Harabhatta, *Devirahasya and Pariśiṣhṭas*, (Vadodara: Butala Publications, 1941).

## Branch 29B: Upapurāṇa (18) Gaṇeṣa Purāṇa

Structure: Two *Khaṇḍas*, of 92 chapters and 155 chapters, and a total of 11,079 vers-

Beginning:

अथ श्रीगणेशपुराणम् । आरंभ नमस्काराः ।
श्रीगणेशाय नमः । श्रीस्वानंदेशाय ब्रह्मणस्पतेयनमः ।
श्रीमहासिद्धयैनमः । श्रीमहाबुद्धयैनमः । श्रीलक्षायनमः ।
श्रीलाभायनमः । श्रीनग्नभैरवराजायनमः । श्रीमद् गणकाय परंब्रह्मगुर-
वेनमः । श्रीमन् मुद्गलाय परमाचार्याय नमः । श्री भ्रूशूंडी गार्ग्य
ग्रत्समद भृगु व्यासायनमः । श्रीमत् सकलगाणेशगुरुभ्यो आचार्येभ्यश्च
नमोनमः । श्रीब्रह्मभूय महासिद्धिपीठाधीश्वर श्रीमद्गिरिजासुत
योगीन्द्रायनमः । श्रीमद्गाणेश जगद्गुरवे श्रीमद्गणेशयोगीन्द्राचार्यायनमः ।
श्रीमदंकुशधारिणे सद्गुरवे योगीन्द्रायनमः । श्रीसद्गुरू हेरंबराजायनमः ।

अध्याय एक

नमस्तस्मै गणेशाय ब्रह्मविद्या प्रदायिने
यस्यागस्त्यायते नाम विघ्नसागर शोषणे १
ऋषय ऊचुः ।
सूत सूत महाप्राज्ञ वेदशास्त्र विशारद ।
सर्व विद्या निधे त्वत्तो वक्ताऽन्यो नोपलभ्यते ।
जन्मजन्मांतरीयं नः स्थितं पुण्यं महत्तरम् ।
तेन संदर्शनं जातं सर्वज्ञस्य सतस्तव २
वयं धन्य तमा लोके जीवितं नः सुजीवितं
पितरो वेद शास्त्राणि तपास्याश्रम एव च ३
अष्टादश पुराणानि विस्तरा च्छ्राविता निनः
अन्यान्यपि हिनः श्रोतुमिच्छानो वद सत्तम ४
शौनकेये महासत्रे सक्ता द्वादश वार्षिके
त्वत् कथामृत पानान्नो नान्यद्विश्राम कारणम् ५
सूत उवाच
साद्यु पृष्टं महाभागा भवद्भिः पुण्यकर्मभिः
साधूनां समचित्तानां मतिर्लोकोप कारिणी ६

Branch 29B: Upapurāṇa (18) Gaṇeṣa Purāṇa

Ending:

एकांगुष्ठेन यस्तिष्ठेद्वर्षाणामयुतं नरः
दशाध्यायस्तुतेरस्य पुराणस्य तथा फलम् ५७
लभते मानवो भक्त्या निश्चितं नात्र संशयः
आजन्ममरणान्नित्यं शृणुयान्मानवो भुवि ५८
पुराणं तु गणेशस्य चक्रवर्ती भवेतु सः
आजन्ममरणाद्यस्तु काशीवासं करोति यः ५९
तत्पुण्यं लभते मर्त्यो गणेशस्य पुराणतः
सहस्रं माघमासान्वः प्रयागे स्नाति मानवः ६०
तत्फलं लभते मर्त्यःपुराणस्यास्य संस्रवात्
गोमतीसंगमे तद्वत्स्नानं भक्त्या करोति यः ६१
तत्फलं कोटिगुणितं लभते चास्य संस्रवात्
गणेशस्य पुराणं यः शृणुयाद्भक्तिमान्नरः ६२
न भयं तस्य शूलात्तु वज्राच्च चक्रिचक्रतः
इद वः कथितं सर्व पुराणं च सविस्तरम् ६३
संपूर्णो महिमा वक्तुं न शक्यो वर्षकोटिभिः
ब्राह्मणा षण्मुखेनापि शेषेणापि मुनीश्वराः ६४
युष्माभिः परिपृष्टं यत्सर्वपापप्रणाशनम्
सर्वं कामप्रदं भुक्तिमुक्तिदं पुण्यवर्धनम् ६५
गणेशस्य परेशस्य नानालीलाधरस्य च
वक्तृस्रोस्त्रोरघहरं किमन्यच्छ्रोतुमिच्छथ ६६
इति श्रीगणेशपुराणे क्रीडाखण्डे फलश्रुतिनिरूपणं नाम
पंचपंचाशदुत्तरशततमोऽध्यायः १५५
श्रीगजाननार्पणमस्तु । शुभं भवतु ।

Gaṇeṣa Purāṇa is mentioned in a list of Upapurāṇas occurring in the Vāruṇa Upapurāṇa.

Reference: *The Gaṇeśa Purāṇam*, (Delhi: Nag Publishers, 1993).

## Branch 29B: Upapurāṇa (19) Mudgala Purāṇa

Structure: Nine *Khaṇḍas* and 428 chapters

Beginning:

अथ श्रीमन्मौद्गलपुराणप्रारभ्यते ।
ध्याये स्थिरेण चित्तेन गणेशं सर्वसिद्धिदम् ।
बुद्धिप्रकाशकं पूर्णं योगिनां हृदि संस्थितम् १
जितं तेनाखिलं नानाब्रह्मवर्णनवर्णितम् ।
नानाजगत्समूहं वै गणेशेनोभयं कृतम् २
भक्तसंरक्षणार्थाय निर्गुणः सगुणस्तु यः ।
नानावतारवान्सोऽपि नानाभेदधरो बभौ ३
तस्मै नमो गणेशाय नरकुंजररूपिणे ।
सगुणो नररूपो यो निर्गुणो गजवक्त्रकः ४
नमः शिवाय शांताय विष्णवे प्रभविष्णवे ।
सूर्याय शक्तये चैव चतुर्धा ते विभागिने ५
ब्रह्माणं शेषनागं च नरं नारायणं सदा ।
नमामि भावयुक्तोऽहं पुराणपुरुषं परम् ६
देवानां योगिनां चैव महर्षीणां महात्मनाम् ।
व्रजामि शरणं नित्यं पुराणज्ञानसिद्धये ७
पुराकल्पेऽभवन्विप्राः शौनकाद्याः सुसाधनाः
कलिदोषभयात्सर्वे नैमिषारण्यमाश्रिताः ८
तस्मिन्कलियुगावासं ज्ञात्वादौ ब्रह्मणो मुखात्
मुनिधर्मप्रसिद्ध्यर्थं कर्मज्ञानप्रसिद्धये ९
अन्यच्च ब्रह्मणा प्रोक्तं पुराणश्रवणं सदा
कलिदोषहरं पुण्यं तदर्थमभवन्यताः १०
कस्मिंश्चित्समये सूतो लोमहर्षण आययौ
मुनीनां दर्शनार्थाय पुराणज्ञो विचक्षणः ११
नैमिषारण्यशोभां च पश्यंस्तत्र सुविस्मितः
अहो धन्यं महारण्यं कलिदोषविवर्जितम् १२
दृष्टा वै मुनयस्तेन सुप्रसन्नाननाम्बुजाः

Branch 29B: Upapurāṇa (19) Mudgala Purāṇa

Ending:

यद्यदिच्छामहे नाथ तत्तत् सिद्धयतु सर्वदा ५०
गाणपत्यांश्च नः सर्वान् कुरु त्वं सर्वदा परान्
इमान् वरान् गुणाध्यक्ष प्रार्थितान् देव देहि नः ५१
तथेति तानथोक्त्वाऽसौ गणेशो ब्रह्मनायकः
व्यासादींश्च जगादाऽसौ वृणुध्वं वाञ्छितान् वरान् ५२
तैस्तथैव गणाध्यक्षः प्रार्थितो गणपप्रियैः
तथेति तानथोक्त्वा च सूतमूचे च विघ्नपः ५३
वरान् ब्रूहि महाभाग त्वया संश्रावितं परम्
द्विजेभ्यस्तेन संतुष्टो दास्यामि स तथाऽब्रवीत् ५४
तथेति तमथोक्त्वाऽसौ धूम्रवर्णो गजाननः
अंतर्धाय स्वमात्मानं स्वानंदस्थो बभूव ह ५५
सर्वे संतुष्टचित्तास्ते स्वं स्वं स्थानं ययुस्ततः ।
मौद्गलं तत्समाश्रित्य गणेशमभजन् परम् ५६
इमां मुद्गलजां श्लोकैः संहितां वेदबृंहिताम् ।
त्रयोविंशतिसाहस्रैः सार्धैकशतसंयुतैः ५७
अष्टाविंशत्यधिकैश्च अध्यायैश्च चतुः शतैः ।
खण्डैश्च नवभिः पूर्णां सर्वसिद्धिमयीचिताम् ५८
मुद्गलः कथयामास सर्वेषां हितकारणात् ।
शब्दब्रह्मरहस्याख्यां साक्षाद्ब्रह्मप्रदायिनीम् ५९
ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे नवमे खण्डे
योगचरिते योगामृतार्थशास्त्रे दक्षमुद्गलसंवादे पुराणसमाप्तिवर्णनं
नामैकचत्वारिंशोऽध्यायः । श्रीगजाननार्पणमस्तु ।

Listed as an "Ati-Purāṇa," in the list of 72 Purāṇas and Upapurāṇas presented by Śhivānanda Nauṭiyāla, in the introduction to *Skandapuranantargata Kedarakhandam: Hindi Anuvada Sahita*, (Prayaga: Hindi Sahitya Sammelana, 1994).

Reference: *Atha Śrīmudgalapurāṇaṃ Prārabhyate*, (Lakṣmī Nivāsa Hindu Colony: Mudgalapurāṇaprakāśanamaṇḍalam, 1976).

## Branch 29B: Upapurāṇa (20) Kapila Purāṇa

Structure: 21 Chapters

Beginning:

कपिलपुराणम् अथ प्रथमोऽध्यायः

पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः १
शल्यजिदुवाच
मया श्रुतानि क्षेत्राणि पुण्यान्यघहराणि च
इदानीं श्रोतुमिच्छामि क्षेत्राण्युत्कलदेशके २
तेषु क्षेत्रेषु यत्पुण्यं यत्तीर्थं याश्च देवताः
यदाश्रयं च मान्यांस्तान् सर्वान् त्वं कथय त्वयम् ३
त्वत्प्रसादाद्भविष्यामि कृतार्थोऽहं महामुने
सर्वाभिर्देवताभिस्त्वं वन्द्यः पूज्यतमः प्रभो ४
त्वं हि सर्वाणि जानासि पुराणाष्टदशानि च
सर्वशास्त्राणि जानासि सर्वज्ञस्त्वं महामुने ५
कपिल उवाच
कथयामि रहस्यं त्वां शृणुष्वैकमना नृप
येषां स्मरणमात्रेण कल्मषा यान्ति वै क्षयम् ६
वर्षाणां भारतं श्रेष्ठं देशानामुत्कलः स्मृतः
उत्कलेन समो देशो देशो नास्ति महीतले ७
अत्रैवोदाहरन्तीममितिहासं पुरातनम्
ऋषीणां चैव सम्वादं भारद्वाजेन धीमता ८
पुष्करे च वने पुण्ये तिष्ठन्तो मुनिपुङ्गवाः
भरद्वाजमिदं प्रोचुस्ते सर्वे च हतांहसः ९
ऋषय ऊचुः
यस्मिन्पुण्यवने विद्वन् यत् पुण्यं समुदाहृतम्
पापानां चैव यद् भोग्यं तत् सर्वं कथयस्व नः १०
भरद्वाज उवाच
अस्मिन् पुण्यवने विप्रा ये वसन्ति नरोत्तमाः

Branch 29B: Upapurāṇa (20) Kapila Purāṇa

Ending:

शङ्खचक्राङ्कितं देहं तुलसीदामभूषितम्
श्रीमहादेव उवाच
काम क्रोधपरित्यक्तं चिह्नं वैष्णवसंज्ञकम् २०
एषां कौपीनकं श्रेष्ठं मुखे च मधुरं वचः
सर्वदानन्दहृदयं चिह्नं वैष्णवसंज्ञकम् २१
आनन्दाश्रुसमायुक्तमुच्चैर्गोविन्दकीर्तनम्
असङ्गस्य परित्यागश्चिह्नं वैष्णवसंज्ञकम् २३
सर्वस्वं नाम बुद्धित्वं सर्वसत्त्वसुखावहम्
दयासत्यसमायुक्तं चिह्नं वैष्णवसंज्ञकम् २४
निर्ममं निरहङ्कारं देवताब्राह्मणार्चनम्
सतां सम्प्रीतिजननं चिह्नं वैष्णवसंज्ञकम् २५
एवं वैष्णवचिह्नानि यस्य सन्ति स वैष्णवः
अन्ये ये दम्भिका लुब्धा तेषां लिङ्गं न कारणम् २६
इत्युक्त्वा भगवान् शम्भुर्गौरीक्रीडागुहान्तरम्
प्रतीहारी त्वसौ नन्दी तत्रास्ते धृतदण्डकः २७
नन्दिकेश्वरसम्वादमेवं देवेन शम्भुना
सर्वशान्तिकरं पुण्यं गुह्यं ते कथितं मया २८
अवैष्णवे न वाच्यस्तु देवब्राह्मणनिन्दकैः
ज्ञानयोगो मनोमले न वाच्यं संशयात्मनि २९
य इदं परमं गुह्यं ज्ञानयोगं पठेन्नरः
शृणुयादपि यो भक्त्या स शान्तिमधिगच्छति ३०

इति श्रीकपिलपुराणे उत्कलक्षेत्रोपाख्याने चतुःक्षेत्रमाहात्म्यं
नामैकविंशतितमोऽध्यायः

Kāpila Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Tripathi, Shrikrishnamani, ed., *Kapilapuranam (A critical edition)*, (Varanasi: Chaukhamba Surbharati Prakashan, 1981).

## Branch 29B: Upapurāṇa (21) Bṛihaddharma Purāṇa

Structure: Three *Khaṇḍas*, with a total of 74 chapters.

Beginning:

बृहद्धर्मपुराणम् । ॐ नमो भगवते वासुदेवाय । प्रथमोऽध्यायः ।
ॐ भूर्भुवस्वरिति तत्सवितुर्व्वरेण्यं
भर्गो निसर्गविमलं परमस्य विष्णोः ।
देवस्य धीमहि धियोऽधिगतं वयं यो
यत्नान्न ईहितमतींस्तु प्रचोदयाद् ॐ १
पवित्रे नैमिषक्षेत्रे विमले साधुसेविते ।
सुगन्धिमन्दशीतेन वायुना सुमनोहरे २
नानाद्रुमलताकीर्णे नानापुष्पसमाकुले ।
मयूरैः कोकिलैर्हंसैर्भ्रमरैरुपकूजिते ३
तथान्यैः पक्षिभिश्चैव गोमृगादिभिरेव च ।
शान्तस्वभावैर्व्याघ्राद्यैरावृते नैमिषे वने ४
दीर्घसत्रमुपासीनानृषीन् सावसरांस्ततः ।
यदृच्छया समायातः सूतो बदरिकाश्रमात् ५
तं दृष्ट्वा सूतमायातं मुनयः शौनकादयः ।
स्वागतासनपाद्याद्यैर्मुदिताः समपूजयन् ।
तमूचुश्च महात्मानं सूतं पौराणिकोत्तमम् ६
मन्ये व्याससमीपात्त्वं समागच्छसि सम्प्रति
वद तर्हि कथाः पुण्याव्यासेनोक्ता महामते ८
कः श्रोता तत्र किं वासौ प्रोक्तवान् शक्तिपुत्रजः
तत्त्वमाचक्ष्वानुपूर्व्या श्रुतवानसि चेत्तथा ९
सूत उवाच
नमो वः सत्यमेवाहं प्राप्तो बदरिकाश्रमात्
भवतां निकटं तत्र कथाः पुण्याः श्रुता अपि १०
व्यासो जाबालिना पृष्टः कथा धर्मार्थसंहिताः
प्रत्यवोचच्छृण्वताञ्च मुनीनां मम च द्विजाः ११
प्रावर्त्तयत् तथा पुण्यं पुराणं धर्मसंज्ञितम्

Branch 29B: Upapurāṇa (21) Bṛihaddharma Purāṇa

Ending:

एवं वृत्ते सङ्कराणां वृत्त्यादिपरिकल्पने
कृताञ्जलिपुटा भूत्वा सङ्करा वाक्यमब्रुवन् ७२
सङ्करा ऊचुः
अस्माकं वैदिकं स्मार्त्तं तथागमिकमेव च
कार्यिष्यति को विप्रः कथं नो निर्वृतिर्भवेत् ७३
ब्राह्मणा ऊचुः
विंशतीनान्तु जातीनां पुरोधाः श्रोत्रिया वयम् ७४
अन्येषां षोडशानान्तु पुरोधाः पतितो द्विजः
तज्जातितुल्यतां यायाद्ब्रह्मबन्धुर्भवेदपि ७५
व्यास उवाच
इत्येवं स्त्यापयामासुरलङ्घ्यशासना द्विजाः
समाचरन् सङ्कराश्च ब्राह्मणैरुदितं यथा ७६
राजा स्वस्थमना भूत्वा ब्राह्मणान् समपूजयत्
पूजितास्तु गता विप्रा यथास्थानं मुदान्विताः ७७
राजा च पृथुनामा स हीनशस्यां धरां तदा
दुदोह येन शस्यादि वत्सदोहकभेदतः ७८
सर्वे प्रलेभिरे सर्व्वं व्रीहिछन्दोविषादिकम् ।
एतत्ते कथितं विप्र यत्पृष्टोऽहमिह त्वया ७९
सङ्कराणामुपाख्यानं पृथुकीर्त्तिः सुपुष्कला ।
एतच्छ्रवणपाठस्य फलं पुण्यकरं मतम् ८०
इति श्रीबृहद्धर्म्मपुराणे उत्तरखण्डे जातिसाकर्य्यं नाम चतुर्दशोऽध्यायः
समाप्तञ्चेदं पुराणम्

Bṛhaddharma Purāṇa lists itself as an Upapurāṇa. Also listed as an "Ati-Purāṇa," in the list of 72 Purāṇas and Upapurāṇas presented by Śhivānanda Nauṭiyāla, in the introduction to *Skandapuranantargata Kedarakhandam: Hindi Anuvada Sahita*, (Prayaga: Hindi Sahitya Sammelana, 1994).

Reference: Sastri, Haraprasad, ed., *Bṛhaddharma Purāṇam*, (Varanasi: Chaukhamba Amarabharati Prakashan, 1974).

## Branch 29B: Upapurāṇa (22) Bhavishyottara Purāṇa

Structure: 208 chapters.

Beginning:

श्रीगणेशाय नमः । श्री सरस्वत्यै नमः । ॐ नमो भगवते वासुदेवाय ।
कल्याणानि ददातु वो गणपतिर्यस्मिन्नतुष्टे सति
क्षोदीयस्यपि कर्मणि प्रभवितुं ब्रह्मापि जिह्मायते ।
भेजे यच्चरणारविन्दमसकृत्सौभाग्यभाग्योदयैस्
तेनैषा जगति प्रसिद्धिमगमद्देवेन्द्रलक्ष्मीरपि १
शश्वत्पुण्यहिरण्यगर्भरसनासिंहासनाध्यासिनी
सेयं वागधिदेवता वितरतु श्रेयांसि भूयांसि वः ।
यत्पादामलकोमलांगुलिनखज्योत्स्नाभिरुद्वेल्लितः
शब्दब्रह्मसुधांबुधिर्बुधमनस्युच्छृंखलं खेलति २
नमस्तस्मै विश्वोदयविलयरक्षाप्रकृतये शिवाय क्लेशौघच्छिदुरपदपद्मप्रणतये
। अमन्दस्वच्छन्दप्रथितपृथुलीलातनुभृते
त्रिवेदीवाचामप्यपथनिजतत्त्वस्थितिकृते ३ यस्य गण्डतले भाति विमला
षट्पदावली ।
अक्षमालेव विमला स नः पायाद्गणाधिपः ४
ॐ नमो वासुदेवाय सशार्ङ्गाय सकेतवे ।
सगदाय सचक्राय सशंखाय नमो नमः ५
नमः शिवाय सोमाय सगणाय ससूनवे सवृषाय सशूलाय सकपालाय
सेन्दवे ६ शिवं ध्यात्वा हरिं स्तुत्वा प्रणम्य परमे ष्ठिनम् ।
चित्रभानुं च भानुं च नत्वा ग्रन्थमुदीरयेत् ७
छत्राभिषिक्तं धर्मज्ञं धर्मपुत्रं युधिष्ठिरम्
द्रष्टुमभ्यागता दृष्टा व्यासाद्याः परमर्षयः ८
मार्कण्डेयः समाण्डव्यः शाण्डिल्यः शाकटायनः
गौतमो गालवो गार्ग्यः शातातपपराशरौ ९
जामदग्न्यो भरद्वाजो भृगुर्भार्गुरिरेव च
उत्तंकः शंखलिखितौ शौनकः शाकटायनिः १०
पुलस्त्यः पुलहो दाल्भ्यो बृहदश्वः सलोमशः

Branch 29B: Upapurāṇa (22) Bhaviṣhyottara Purāṇa

Ending:

व्रतं हि सांभरायिरायं नक्षत्रपुरुषव्रतम् २५
शिवनक्षत्रपुरुषं संपूर्णं येन मुच्यते
कामदानव्रतं नाम वृन्ताकविधिरेव च २६
आदित्यस्य दिने नक्तं संक्रात्युद्यापने फलम्
भद्राव्रतमगस्त्यार्घो नवचन्द्रार्कमेव च २७
अर्घः शुक्रबृहस्पत्योः पंचाशीति व्रतानि च
माघस्नानं नित्यस्नानं रुद्रस्नानविधिस्तथा २८
चंद्रार्कग्रहणे स्नानं विधिश्चान्नाशने तथा
वापीकूपतडागानासुत्सर्गो वृक्षयाजनम् २९
देवपूजादीपदानवृषोत्सर्गविधिस्तथा
फाल्गुन्युत्सवकं नाम तथान्यः सदनोत्सवः ३०
भूतमाता च श्रावरणयां रक्षा बंधविधिस्तथा
विधिस्तथा नवम्यास्तु तथा चन्द्रमहोत्सवः ३१
दीपालिकायां तु होमो लक्षहोमविधिस्तथा ।
कोटिहोमो महाशीतिर्गणनाथस्य शांतिका ३२
तथा नक्षत्रहोमोथ गोदानविधिरेव च ।
गुडधेनुघृतधेनुतिलधेनुव्रतं तथा ३३
जलधेनुविधिः प्रोक्तो लवणस्य तथा परा ।
धेनुः कार्या समं ज्ञात्वा नवनीतस्य चापरा ।
सुवर्णधेनुश्च तथा देवकार्यं चिकीर्षुभिः ३४
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
संक्षिप्तानुक्रमणिकाकथनं नामाष्टोत्तरद्विशततमोऽध्यायः २०८
इति चतुर्थमुत्तरपर्व ४ समाप्तोऽयं भविष्यपुराणग्रन्थः

Bhaviṣyottara Purāṇa is listed as a *Laghu Purāṇa* (short *Purāṇa*) in the list of 72 Purāṇas and Upapurāṇas presented by Śhivānanda Nauṭiyāla, in the introduction to *Skandapuranantargata Kedarakhandam: Hindi Anuvada Sahita*, (Prayaga: Hindi Sahitya Sammelana, 1994).

Reference: *Bhaviṣyamahāpurāṇam*, (Delhi: Nag, 1993).

## Branch 29B: Upapurāṇa (23) Nīlamata Purāṇa

Structure: 1453 verses

Beginning:

नीलमतपुराणम्

ओं स्वस्ति । श्रीगणेशाय नमः । नमो भगवते वासुदेवाय ओम् ।

श्रीनिवासं हरिं देवं वरदं परमेश्वरम्
त्रैलोक्यनाथं गोविन्दं प्रणम्याक्षरमव्ययम् १
परिक्षिद्वंशभृच्छ्रीमान्नृपतिर्जनमेजयः
पप्रच्छ शिष्यं व्यासस्य वैशम्पायनमन्तिकात् २
श्रीजनमेजयः
महाभारतसंग्रामे नानादेशनराधिपाः
महाशूराः समायाताः पितृणां मे महात्मनाम् ३
कथं काश्मीरको राजा नायातस्तत्र कीर्तय
पाण्डवैर्धार्तराष्ट्रैर्वा न वृतः स कथं नृपः ४
कश्मीरमण्डलं चैव प्रधानं जगति स्थितम् ५
वैशम्पायनः
----- वासुदेवं स्वयंवरे ।
जगाम माधवं योद्धुं चतुरंगबलान्वितः ६
तत्र तस्याभवद् युद्धं वासुदेवेन धीमता
यादृशं वासुदेवस्य नरकेन सहाभवत् ७
ततः स वासुदेवेन सुयुद्धे विनिपातितः ८
अन्तर्वत्नीं तस्य पत्नीं वासुदेवोऽभ्यषेचयत्
भविष्यत्पुत्रराज्यार्थं तस्य देशस्य गौरवात् ९
ततः सा सुषुवे पुत्रं बालं गोनन्दसंज्ञितम्
बालभावात् पाण्डुसुतैर्नानीतः कौरवैर्न वा १०
जनमेजयः
देशस्य गौरवं चक्रे किमर्थं द्विजसत्तम
वसुदेवो महात्मा यदभ्यषिञ्चत् स्वयं स्त्रियम् ११
वैशम्पायनः

Branch 29B: Upapurāṇa (23) Nīlamata Purāṇa

Ending:

अमृतस्वादुसलिलां नृणां दृष्टिमनोहराम् १४४३
मातेव वरदां देवीमभिगच्छन्ति ये नराः
तेऽभिगच्छन्ति राजेन्द्र प्रतिष्ठां भुवि मानवाः १४४४
समुद्ररूपस्य हरस्य भार्यां हिमालयस्याद्रिपतेस्तनूजाम्
सुस्वादुतोयामृषिवर्यजुष्टां तां त्वं पवित्रां प्रणमस्व राजन् १४४५
सिन्धुस्त्रिकोटी च तथा विशोका पुण्या नदी हर्षपथा शिवा च
पुण्या सुखा चन्द्रवती सुगन्धा पुण्योदका किल्विषनाशिनी च १४४६
कूलारणिःपापहरा च कृष्णा नदी सुपुण्या मधुमत्यथापि
नदी परोष्णी च तथात्र पुण्या प्रयान्ति दिव्यां वरदां वितस्ताम् १४४७
गङ्गा नदी शम्भुजटाकलापे चन्द्रेण देवेन तथा विभिन्ना
प्रोक्ता नृलोके नृप चन्द्रभागा आयाति पुण्यां विततां वितस्ताम् १४४८
तीर्थानि पुण्यानि सरांसि राजन् नद्यस्तडाका विविधाश्च कूपाः
आयान्ति सर्वे वरदां वितस्तां त्रयोदशीं भाद्रपदस्य शुक्लाम् १४४९
कस्यास्ति शक्तिर्नृप तेऽत्र वक्तुं देवीगुणान्वर्षशतैरनेकैः
भक्त्या मयोक्तां च निशम्य कांचिद्भक्तिं कुरुष्वात्र सदा नृवीर १४५०
श्रुत्वा वितस्तामाहात्म्यं मुच्यते सर्वकिल्विषैः
श्रुत्वा नीलमतं सर्वं दशधेनुफलं लभेत् १४५१
इत्येवमुक्तं जनमेजयस्य व्यासस्य शिष्येण महाव्रतेन
क्षिप्तं न यद् ग्रन्थगुरुत्वभीत्या समग्रशास्त्रैःखलु भारते वै १४५२
सर्वत्र नैतद् विषयोपयोग्यं तदा न चक्रे भगवान् महात्मा
अतीव हृद्ये बहुविस्तरेऽपि जनप्रिये भारतपूर्णचन्द्रे १४५३

इति वितस्तामाहात्म्यम्

समाप्तमिदम् नीलमतम् शुभमस्तु

Nīlamata Purāṇa is not found on any list of Upapurāṇas.

Reference: Kumari, Ved, *The Nilamata Purana, vol. II, (A Critical Edition and English Translation)*, (Srinagar: J & K Academy of Art, Culture and Languages, 1973).

## Branch 29B: Upapurāṇa (24) Ekāmra Purāṇa

Structure: Five Parts, with a total of 70 chapters.

Beginning:

एकाम्रपुराणम् । प्रथमोऽध्यायः । ॐ नमो भगवते विघ्नेश्वराय ।
कीर्तिर्यस्य सुरासुरैर्मुनिवरैरागीयते नित्यशो
नाकक्ष्मातलवासिभिः सुरनरैर्विद्याधरैः किन्नरैः ।
पातालेष्वपि कन्दरेषु च महीध्राणां गतैः
पन्नगैर्ब्रह्मोपेन्द्रसवासवान्वितजगत्कर्त्रे नमः शम्भवे १
पुरा सत्ययुगे राजा धर्मध्वज इति श्रुतः ।
सर्वज्ञमिति पप्रच्छ सत्यं सत्यवतीसुतम् २
धर्मध्वज उवाच
वेदव्यास श्रियावास सर्वज्ञ परमार्थद ।
श्रोतुमिच्छाम्यहं किंचिन्नृणाँ सुकृतमद्भुतम् ३
अनायासेन बहुलं पुण्यं यत्र भवेदिह ।
तत्क्षेत्रं वद तीर्थञ्च देवताया अनुग्रहम् ४
वेदव्यास उवाच
शृणु राजन् प्रवक्ष्यामि पुरावृत्तमभूद्यथा ।
सनत्कुमारासितयोः सम्बादमृषिसंसदि ५
मध्यमे पुष्करे ज्येष्ठे वरिष्ठे च तपोवने ।
समागमं मुनीनां च वरेण्यमभवन्नृप ६
मरीचिप्रमुखाः सर्वे मुनयस्तत्र संस्थिताः ।
व्यवस्थिता लिङ्गधर्माः कालत्रयविवेकिनः ७
धर्मस्थानान्यनेकानि प्रोच्चरन्ति पृथक् पृथक्
संदिग्धवेदवाक्यानि निरुक्तिपदनिर्णयम् ८
मुनीनामसितो दिव्यज्ञानिनां शम्भुसेविनाम्
पुरोतोऽथ मुनिश्रेष्ठः कश्यपावरजोऽभवत् ९
ततोऽपृच्छदृषिगणान् प्रणम्य शिरसाञ्जलिः
विज्ञापयामीति पूर्वं शान्तः श्लक्ष्णमुदारधीः १०
असित उवाच

Branch 29B: Upapurāṇa (24) Ekāmra Purāṇa

Ending:

इत्युक्त्वा स महादेवो धृत्वा तत् करपङ्कजम्
वृषे निवेशयित्वा तं खस्थस्तान्नाह शङ्करः ७२
यूयं मुनिकुलाः सर्वे मम नामानुकीर्त्तनात्
मम सायुज्यममलमचिरात् प्राप्स्यथाशु च ७३
इत्युक्त्वान्तर्दधे शम्भु ऋृषिणा स्वगणैः सह
ते च विप्रास्तथा कृत्वा गताः शिवगृहं ततः ७४
य इदं शृणुयाद् दिव्यमेकाम्राख्यं पुराणकम्
स याति भवनं शम्भोर्नान्यथा शृणु भूपते ७५
पठेद्यः परया भक्त्या पाठवेद्वा समाहितः
तस्य पापानि नश्यन्ति ब्रह्महत्यादिकानि च ७६
अथवा बहुनोक्तेन किं ज्ञानेन महीपते
लभेत् फलं ब्रह्मणोक्तं याति सायुज्यमैश्वरम् ७७
शिवमादौ शिवं मध्ये शिवमन्ते प्रतिष्ठितम्
गोब्राह्मणनृपाणां च शिवं भवतु सर्वदा ७८
शशिभतोक्तमदः पुरातनं सकलपापनिसूदनं महत्
विमलतेजसा शृणोति यो निलयमैश्वरं प्रयाति सः ७९
एकस्तेजोभिरेभिः परिहृतविमले ज्योतिषां यो विभाता-
स्त्वष्टौ ते लोकपालाः सुविधृतशिरसा शासने नित्ययुक्ताः ।
स्त्रष्टाव्याभूतसंघाश्चतुरजनि जगत् पञ्चभौतात्मकं यो
योऽसौ मूर्त्तिं विभर्ति द्विगुणितचतुरां पातु वः कृत्तिवासः ८०
इत्येकाम्रपुराणे षट्साहस्त्र्यामैश्वर्यां संहितायां पञ्चमेंऽशे
अनुक्रमफलश्रुतिकथनं नाम सप्ततितमोऽध्यायः ।
समाप्तमिदमेकाम्रपुराणम् ।

Ekāmra Purāṇa is included only in its own list of Upapurāṇas

Reference: Dhal, Upendra Nath, *The Ekāmra Purāṇam, Critical Edition*, (Delhi: Nag Publishers, 1986).

Branch 29B: Upapurāṇa (25) PurāṇaSaṃhitā

Structure: 34 chapters, and 3158 verses.

Beginning:

श्रीपुरुषोत्तमाय कृष्णाय नमः ।
श्रीमद्द्वैपायनप्रणीता पुराणसंहिता ।
शौनक उवाच
सूत सूत महाभाग त्वया भगवता सता
व्यासप्रसादाधिगतशास्त्रसम्बोधनेन च १
अष्टादशपुराणानि सेतिहासानि चानघ
उपक्रमोपसंहारविधिनोक्तानि कृत्स्नशः २
चतुर्दशसहस्रं तु मात्स्यं प्रोक्तमतिस्फुटम्
तत्संख्याकं भविष्यं च प्रोक्तं पंचशताधिकम् ३
मार्कण्डेयं महारम्यं प्रोक्तं नवसहस्रकम्
अथ भागवतं दिव्यमष्टादशसहस्रकम् ४
शतोत्तरं च ब्रह्माण्डं सूर्यसंख्यासहस्रकम्
कथितं ब्रह्मवैवर्तमष्टादशसहस्रकम् ५
सहस्राणि दशैवोक्तं पुराणं वामनाभिधम् ६
तथैवायुतसंख्याकं षट्शताधिकमानिलम्
त्रयोविंशतिसाहस्रं वैष्णवं समुदाहृतम् ७
पंचविंशतिसाहस्रं नारदीयमुदाहृतम्
रुद्रसंख्यासहस्राणि प्रोक्तं लिङ्गाख्यमद्भुतम् ८
एकोनविंशसाहस्रं वैनतेयमुदाहृतम्
सहस्रपंचपंचाशत् पाद्मम्प्रोक्तं सुविस्तरम् ९
सप्तदशसहस्राणि कूर्मं प्रोक्तं मनोहरम्
चतुर्विंशति साहस्रं शौकरं परमाद्भुतम् १०
एकाशीतिसहस्राणि स्कान्दमुक्तं सुविस्तृतम्
एवमष्टादशोक्तानि पुराणानि बृहंति च ११
पुराणेष्वेषु बहवो धर्मास्ते विनिरूपिताः
रागिणां च विरागिणां यतीनां ब्रह्मचारिणाम् १२

Branch 29B: Upapurāṇa (25) Purāṇa Saṃhitā

Ending:

परब्रह्मपदं याति यत्र गत्वा न शोचति ८८
पञ्चकृत्वः श्रुतं हन्ति ब्रह्महत्यां सुदुःसहाम्
ब्राह्मणो ब्रह्मवर्चस्वी क्षत्रियो विजयी रणे
वैश्यस्तु धनलाभाढ्यः शूद्रः सुखमवाप्नुयात् ८९
सिद्धांतपुराणसंहितामेनां योध्यापयति भक्तितः
अधीते वा न हि तयोर्यमादपि भयं भवेत् ९०
पठध्वं मुनयः सर्वे पौराणीं संहितामिमाम्
हित्वा कलिभयं सद्यः कृतकृत्या भविष्यथ ९१
शौनकादिऋषय ऊचुः
अहो सूत महाभाग श्रावितं परमं रहः
स्वस्त्यस्तु ते किमपरं कथ्यते परमार्थतः ९२
न चोपकर्तुं प्रभवो वयमेते मुनीश्वराः
कृष्णकीर्तिसुधा ह्येषा देवानामपि दुर्लभा ९३
पायिता भवता सूत सर्वलोकेषु दुर्लभा ।
कालकर्मभयात्तीर्णाः प्रसादात्तव सुव्रत ९४
जयतु जयतु कृष्णः सच्चिदानन्दमूर्ति-
र्जयतु जयतु कृष्णः सत्स्वरूपश्चिदात्मा ।
जयतु जयतु कृष्णः केवलानन्दमूर्ति-
र्जयतु जयतु कृष्णः स्वामिनीस्नेहसिक्तः ९५
इति श्रीमत्पुराणसंहितायां सिद्धान्तसारे व्यासशिवसंवादे
वासनाजाग्रतिकथनं नाम चतुस्त्रिंशोऽध्यायः ३४
इति श्रीपुराणसंहिता समाप्ता

Not included in any list of Upapurāṇas.

Reference: Priyāchārya, Krishna, ed., *The Purāṇa Saṃhitā, revealed to Veda Vyāsa, including Ālamandāra Saṃhitā, Bṛhatsadāśiva Saṃhitā and Sanatkumāra Saṃhitā*: edited with notes, introduction, etc., (Benaras: Chowkhamba Sanskrit Series Office, 1951).

## Branch 29B: Upapurāṇa (26) Bhārgava Purāṇa

Structure: 40 chapters belonging to the Uttara Khaṇḍa

Beginning:

प्रथमोऽध्यायः
श्रीमते रामानुजाय नमः ।
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नान्निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये १
श्रीशौनकादय ऊचुः
सर्वधर्मार्थतत्त्वज्ञ सर्वशास्त्रविशारद तत्त्वार्थविदुषां श्रेष्ठ सूत द्वैपायनप्रिय २
यानि कर्माणि लोकेषु चरित्राण्यपि शार्ङ्गिणः ।
तव प्रसादादस्माभिः श्रुतानि वदतां वर ३
कृतकृत्या वयं स्याम पवित्रीकृतचेतसः ।
योगिनां तु चरित्राणि भगवद्दास्यभोगिनाम् ४
नोक्तान्यमृतकल्पानि त्वया धर्मोपदेशिना ।
न तृप्तिं यान्ति चेतांसि तस्मात्तानि वदस्व नः ५
सूत उवाच
साधु पृष्टोऽस्मि मुनयो भवद्भिर्मोक्षकाङ्क्षिभिः ।
चिरकालादिदं वक्तुं भवतां वष्टि मे मनः ६
भवन्त एव पृच्छन्ति मामिदं मुनिपुङ्गवाः ।
आसीत्परमहर्षोऽयमधुना मम चेतसि ७
वक्ष्यामि सर्वमेतद्वः शृणुध्वं तत्समाधिना
लोके स्थितानां सर्वेषां क्षेत्राणामुत्तमं वरम् ८
बदर्याख्यं महापुण्यं स्मरणादेव मुक्तिदम्
सर्वर्त्तुकुसुमोपेतं वनराजिविराजितम् ९
प्रफुल्लस्वर्णकमलसरोवरविभासितम्
तस्मिन् दिव्याश्रमे रम्ये चन्द्रकान्तशिलातले १०
समासीनौ जगन्नाथौ नरनारायणावुभौ
भूलोकजनरक्षार्थमवतीर्णौ महामुनी ११
नानाविधाः कथाः सर्वा ब्रुवन्तावासतुस्तथा

Branch 29B: Upapurāṇa (26) Bhārgava Purāṇa

Ending:

यः प्रतिष्ठापयेल्लोके रमते हरिणा समम्
कोमलैस्तुलसीपत्रैर्यः शालग्राममर्चयेत् ५१
गुरुरेव हरिः साक्षात् सन्तुष्टः स्याद् हरिः सदा ५२
क्रुद्धे सति सदा क्रुद्धस्तस्मात्सम्पूजयेद्गुरुम्
त्रिदण्डधारिणं दृष्ट्वा यतिं विज्ञानसाधनम् ५३
प्रणमेत्पूजयेद्यस्तु भगवद्भक्तिमान् भवेत्
वैराग्यज्ञानभक्त्यादिरूपश्रेयःप्रदायकम् ५४
महायोगीशमाहात्म्यमिदं मुक्तिप्रदं नृणाम्
आयुष्यं श्रीकरं भद्रं यशस्यं विजयावहम् ५५
धर्म्यं पवित्रं पापघ्नमारोग्यकरमुत्तमम्
यः श्रावयेत्सदा नृणां स्नातः पुण्यनदीषु सः ५६
सर्वयज्ञफलं लब्ध्वा हरेः प्रियतमो भवेत्
यः पठेच्छृणुयाद्भक्त्या माहात्म्यमिदमुत्तमम् ५७
यं यं चिन्तयते कामं तं तमाप्नोत्यसंशयम्
मुक्तिकामो लभेन्मुक्तिं श्रीकामो लभते श्रियम् ५८
सर्वार्थसिद्धिं सम्प्राप्य लभेदन्ते परं पदम् ।
लिखित्वैतत्पुस्तकं यो वैष्णवाय महात्मने ५९
दद्यात्तस्य गृहे नित्यं श्रीस्तिष्ठत्यनपायिनी ६०
महायोगिनां द्वादशानां चरित्रं परं धाम नाथस्य विष्णोः प्रियं यत् ।
महादीनकालात्सुलग्नप्रकृत्याः सदा श्रोतुकामान् विमुक्तान् करोति ६१
इत्येतदाख्यानमनुत्तमं शुभं योगीश्वराणां महतां मनोहरम् ।
भक्त्या नरो यः शृणुयात्पठेत्सदा सौभाग्यवान्गच्छति तत्परं पदम् ६२
इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डयो नरनारायणसंवादे महायोगिमाहात्म्ये
चत्वारिंशोऽध्यायः ४० श्रीमद्भार्गवोपपुराणं समाप्तम् ।

Bhārgava Purāṇa is found in the traditional list of Upapurāṇas found in Kūrma Purāṇa.

Reference: Śukla, Bṛjeśa Kumāra, *Śrīmadbhārgavopapurāṇam*, (Delhi: Nag, 1997).

## Branch 30A: Smṛiti (01) Aṅgirasa Smṛiti

Structure: 72 verses

Beginning:

आङ्गिरसस्मृतिः । श्रीगणेशायनमः । अथादौ प्रायशित्तविधानवर्णनम् ।
गृहाश्रमेषु धर्मेषु वर्णानामनुपूर्वशः
प्रायश्चित्त विधिं दृष्ट्वा अङ्गिरामुनिरब्रवीत् १
अन्त्यानामपि सिद्धान्नं भक्षयित्वा द्विजातयः
चान्द्रं कृच्छ्रं तदर्द्धन्तु ब्रह्मक्षत्र विशां विदुः २
रजकश्चर्मकारश्च नटोवुरुड एव च
कैवर्त्तभेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ३
अन्त्यजानां गृहे तोयं भाण्डे पर्य्युषितञ्च यत्
प्रायश्चित्तं यदा पीतं तदैव हि समाचरेत् ४
चाण्डालकूपभाण्डेषु त्वज्ञानात् पिवते यदि
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विधीयते ५
चरेत् सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः
तदर्द्धन्तु चरेद्वैश्यः पादं शूद्रेषु दापयेत् ६
अज्ञानात्पिवते तोयं ब्राह्मणस्त्वन्त्यजातिषु
अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति ७
विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन
आचान्त एव शुध्येत अङ्गिरामुनिरब्रवीत् ८
क्षत्रियेण यदा स्पृष्ट उच्छिष्टेन कदाचन
स्नानं जप्यन्तु कुर्वीत दिनस्यार्द्धेन शुध्यति ९
वैश्येन तु यदा स्पृष्टः शुना शूद्रेण वा द्विजः
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति १०
अनुच्छिष्टेन संस्पृष्टौ स्नानं येन विधीयते
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ११
अत ऊर्द्ध्वं प्रवक्ष्यामि नीली वस्त्रस्य वै विधिम्
स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति १२
पालने विक्रये चैव तद्वृत्तेरूपजीवने

Branch 30A: Smṛiti (01) Angirasa Smṛiti

Ending:

पादुकासनमारूढोगेहात् पञ्चगृहं ब्रजेत्
छेदयेत्तस्य पादौ तु धार्मिकः पृथिवीपतिः ६२
अग्निहोत्री तपस्वी च श्रोत्रियो वेदपारगः
एते वै पादुकैर्य्यान्ति शेषान्दराडेन ताडयेत् ६३
जन्मप्रभृतिसंस्कारे चूडान्ते भोजनं नवम्
असपिराडेन भोक्तव्यं चूडस्यान्ते विशेषतः ६४
याचकान्नं नवश्राद्धमपि सूतकभोजनम्
नारीप्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत् ६५
अन्यदत्ता तु या कन्या पुनरन्यस्य दीयते
तस्याश्चान्नं न भोक्तव्यं पुनर्भूःसा प्रगीयते ६६
पूर्वश्च स्त्रावितोयश्च गर्भोयश्चाप्यसंस्कृतः
द्वितीये गर्भसंस्कारस्तेन शुद्धिर्विधीयते ६७
राजाद्यैर्द्दशभिर्मासैर्यावत्तिष्ठति गुर्विणी
तावद्रक्षा विधातव्या पुनरन्योविधीयते ६८
भर्तृशासनमुल्लङ्घ्य या च स्त्री विप्रवर्त्तते
तस्याश्चैव न भोक्तव्यं विज्ञेया कामचारिणी ६९
अनपत्या तु या नारी नाश्नीयात्तद्गृहेऽपि वै
अथ भुङ्क्ते तु यो मोहात् पूयसं नरकं व्रजेत् ७०
स्त्रियाधनन्तु ये मोहादुपजीवन्ति बान्धवाः
स्त्रिया यानानि वासांसि ते पापा यान्त्यधोगतिम् ७१
राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्च्चसम्
सूतकेषु च यो भुङ्क्ते स भुङ्क्ते पृथिवी मलम् ७२
इत्यङ्गिरसा महर्षिणा प्रणीतं धर्मशास्त्रं समाप्तम्
समाप्ताचेयं आङ्गिरसस्मृतिः ।

Reference: *Smṛti Sandarbha*, Vol. I, (Delhi: Nag, 1981), pp. 591ff.

Branch 30A: Smṛiti (02) Vyāsa Smṛiti
Structure: Four Chapters.
Beginning:

अथ वेदव्यासस्मृतिः श्रीगणेशाय नमः प्रथमोऽध्यायः
अथ धर्माचरणादेशप्रयुक्तवर्णषोडशसंस्कारवर्णनम्
वाराणस्यां सुखासीनं वेदव्यासं तपोनिधिम्
पप्रच्छुर्मुनयोऽभ्येत्य धर्मान् वर्णव्यवस्थितान् १
स पृष्टः स्मृतिमान् स्मृत्वा स्मृतिं वेदार्थगर्भिताम्
उवाचाथ प्रसन्नात्मा मुनयः श्रूयतामिति २
यत्र यत्र स्वभावेन कृष्णसारो मृगः सदा
चरते तत्र वेदोक्तो धर्मो भवितु मर्हति ३
शुरिस्मृतिपुराणानां विरोधो यत्र दृश्यते
तत्र श्रौतं प्रमाणन्तु तयोर्द्वैधे स्मृतिर्वरा ४
ब्राह्मणःक्षत्रियोवैश्यस्त्रयो वर्णा द्विजातयः
श्रुतिस्मृतिपुराणोक्तधर्मयोग्यास्तु नेतरे ५
शूद्रोवर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ६
विप्रवद्विप्रविन्नासु क्षत्रविन्नासु विप्रवत्
जातकर्माणि कुर्वीत ततः शूद्रासु शूद्रवत् ७
वैश्यासु विप्रक्षत्राभ्यां ततः शूद्रासु शूद्रवत्
अधमादुत्तमायान्तु जातः शूद्राधमः स्मृतः ८
ब्राह्मण्यां शूद्रजनितश्चाण्डालो धर्मवर्जितः
कुमारीसम्भवस्त्वेकः सगोत्रायां द्वितीयकः ९
ब्राह्मण्यां शूद्रजनितश्चाण्डालस्त्रिविधः स्मृतः
वर्द्धकी नापितो गोप आशापः कुम्भकारकः १०
वणिक्किरातकायस्थमालाकारकुटुम्बिनः
एते चान्ये च वहवः शूद्रा भिन्नः स्वकर्मभिः
चर्मकारो भटो भिल्लो रजकः पुष्करो नटः
वरटोमेदचण्डालदासस्वपचकोलकाः ११

Branch 30A: Smṛiti (02) Vyāsa Smṛiti

Ending:

यद्येकपङ्क्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदि वार्थहेतोः
वेदेषु दृष्टं ऋषिभिश्च गीतम् तद्ब्रह्महत्यां मुनयो वदन्ति ६२
ऊषरे वापितं वीजं भिन्नभाण्डेषु गोदुहम्
हुतं भस्मनि हव्यञ्च मूर्खे दानमशाश्वतम् ६३
मृतसूतकपुष्टाङ्गो द्विजः शूद्रान्नभोजने
अहमेवं न जानामि कां योनिं स गमिष्यति ६४
शूद्रान्नेनोदरस्थेन यदि कश्चिन्म्रियेत यः
स भवेत्च्छूकरो नूनं तस्य वा जायते कुलम् ६५
गृध्रो द्वादश जन्मानि सप्त जन्मानि शूकरः
श्वा चैव सप्त जन्मानि इत्येवं मनुरब्रवीत्
अमृतं ब्राह्मणान्नेन दारिद्रं क्षत्रियस्य च ६६
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नान्नरकं ब्रजेत्
यश्च भुङ्क्तेऽथ शूद्रान्नं मासमेकं निरन्तरम् ६७
इह जन्मनि शूद्रत्वं मृतः श्वा चैव जायते
यस्य शूद्रा पचेन्नित्यं शूद्रो वा गृहमेधिनी ६८
वर्जितः पितृदेवैस्तु रौरवं याति स द्विजः
भाण्डसङ्करसङ्कीर्णा नानासङ्करसङ्कराः ६९
योनिसङ्करसङ्कीर्णा निरयं यान्ति मानवाः
पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिन्दकः ७०
आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः ७१
इदं व्यासमतं नित्यमध्येतव्यं प्रयत्नतः
एतदुक्ताचारवतः पतनं नव विद्यते ७२

इति श्रीवेदव्यासीये धर्मशास्त्रे गृहस्थाश्रमप्रशंसादिवर्णनो नाम
चतुर्थोऽध्यायः समाप्ता चेयं व्यासस्मृतिः

Reference: *Smṛti Sandarbha* III, p. 1631.

## Branch 30A: Smṛiti (03) Āpastamba Smṛiti

Structure: Ten Chapters.

Beginning:

आपस्तम्बस्मृतिः । श्रीगणेशाय नमः । अथ प्रथमोऽध्यायः ।
अथ गोरोधनादिविषयेऽगोहत्यायां च प्रायश्चित्तवर्णनम् ।
आपस्तम्बं प्रवक्ष्यामि प्रायश्चित्तविनिर्णयम् ।
दूषितानां हितार्थाय वर्णानामनुपूर्वशः १
परेषां परिवादेषु निवृत्तमृषिसत्तमम् ।
विविक्तदेश आसीनमात्मविद्यापरायणम् २
अनन्यमनसं शान्तं सत्वस्थं योगवित्तमम् ।
आपस्तम्बमृषिं सर्वे समेत्य मुनयोऽब्रुवन् ३
भगवन् मानवाः सर्वेऽसन्मार्गेऽपिस्थिता यदा
चरेयुर्धर्मकार्याणां तेषां ब्रूहि विनिष्कृतिम् ४
यतोऽवश्यं गृहस्थेन गवादिपरिपालनम्
कृषिकर्मादि चापत्सु द्विजामन्त्रणमेव च ५
देयञ्चानाथकेऽवश्यं विप्रादीनाञ्च भेषजम्
बालानां स्तन्यपानादिकार्यञ्च परिपालनम् ६
एवं कृते कथञ्चित् स्यात्प्रमादो यद्यकामतः
गवादीनां ततोऽस्माकं भगवन् ब्रूहि निष्कृतिम् ७
एवमुक्तः क्षणं ध्यात्वा प्रणिपातादधोमुखः
दृष्ट्वा ऋषीनुवाचेदमापस्तम्बः सुनिश्चितम् ८
बालानां स्तन्यपानादिकार्ये दोषो न विद्यते
विपत्तावपि विप्राणामामन्त्रणचिकित्सने ९
गवादीनां प्रवक्ष्यामि प्रायश्चित्तं रुजादिषु
केचिदाहुर्न दोषोऽत्र देहधारणभेषजे १०
औषद्यं लवणञ्चैव स्नेहपुष्ट्यन्नभोजनम्
प्राणिनां प्राणवृत्त्यर्थः प्रायश्चित्तं न विद्यते ११
अतिरिक्तं न दातव्यं काले स्वल्प्लन्तु दापयेत्
अतिरिक्ते विपन्नानां कृच्छ्रमेव विधीयते १२

Branch 30A: Smṛiti (03) Āpastamba Smṛiti

Ending:

न शक्तिशास्त्राभिरतस्य मोक्षो नचैव रम्यावसथप्रियस्य
न भोजनाच्छादनतत्परस्य एकान्तशीलस्य दृढव्रतस्य ६
मोक्षो भवेत् प्रीतिनिवर्त्तकस्य अध्यात्मयोगैकरतस्य सम्यक्
मोक्षो भवेन्नित्यमहिंसकस्य स्वाध्याययोगागतमानसस्य ७
क्रोधयुक्तो यद्यजते यज्जुहोति यदर्च्चति
सर्वं हरति दत्तस्य आमकुम्भ इवोदकम् ८
अपमानात्तपोवृद्धिः सम्मानात्तपसः क्षयः
अर्चितः पूजतो विप्रो दुग्धा गौरिव सीदति ९
आप्यायते यथा धेनुस्तृणैरमृतसम्भवैः
एवं जपश्च होमैश्च पुनराप्यायते द्विजः १०
मातृवत् परदारांश्च परद्रव्याणि लोष्ट्रवत्
आत्मवत् सवभूतानि यः पश्यति स पश्यति ११
रजकव्याधशैलूषवेणचर्मोपजीविनाम्
यो भुङ्क्ते भुक्तमेतेषां प्राजापत्यं विशोधनम् १२
अगम्यागमनं कृत्वा अभक्ष्यस्य च भक्षणम्
शुद्धिं चान्द्रायणं कृत्वा अथर्वोक्तं तथैव च १३
अग्निहोत्रं त्यजेद्यस्तु स नरोवीरहा भवेत्
तस्य शुद्धिर्विधातव्या नान्या चान्द्रायणादृते १४
विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके ।
सद्यः शुद्धिं विजानीयात्पूर्वं सङ्कल्पितं चरेत् १५
देवद्रोण्यां विवाहेषु यज्ञेषु प्रतरेषु च ।
कल्पितं सिद्धमन्नाद्यं नाशौचं मृतसूतके १६
इत्यापस्तम्बीये धर्मशास्त्रे दशमोऽध्यायः ।
समाप्ताचेयमापस्तम्बस्मृतिः ।

Reference: *Smṛti Sandarbha* III, p. 1387.

## Branch 30A: Smṛiti (04) Dakṣha Smṛiti

Structure: Seven Chapters

Beginning:

दक्षस्मृतिः । प्रथमोऽध्यायः । श्रीगणेशाय नमः । अथादौ --
आश्रमवर्णनम् ।
सर्वधर्मार्थतत्त्वज्ञ सर्ववेदविदां वरः ।
पारगः सर्व्वविद्यानां दक्षो नाम प्रजापतिः १
उत्पत्तिः प्रलयश्चैव स्थितिः संहार एव च ।
आत्मा चात्मनि तिष्ठेत आत्मा ब्रह्मण्यवस्थितः २
ब्रह्मचारी गृहस्थश्च वानप्रस्थोयतिस्तथा ।
एतेषान्तु हितार्थाय दक्षः शास्त्रमकल्पयत् ३
जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः
सहि गर्भसमो ज्ञेयोव्यक्तिमात्रप्रदर्शितः ४
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते
तस्मिन् काले न दोषोऽस्ति स यावन्नोपनीयते ५
उपनीतस्य दोषोऽस्ति क्रियमाणैर्विगर्हितैः
अप्राप्तव्यवहारोऽसौ यावत् षोडशवार्षिकः ६
स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च
ब्रह्मचारी भवेत्तावदूर्द्धं स्नातो भवेद्गृही ७
द्विबिधोब्रह्मचारी तु स्मृतः शास्त्रे मनीषिभिः
उपकुर्वाणकस्त्वाद्योद्वितीयोनैष्ठिकः स्मृतः ८
योगहाश्रममास्थाय ब्रह्मचारी भवेत् पुनः
न यतिर्न वनस्थश्च सर्व्वाश्रमविवर्ज्जितः ९
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः १०
जपे होमे तथा दाने स्वाध्याये च रतस्तु यः
नासौ तत्फलमाप्नोति कुर्वाणोऽप्याश्रमाच्च्युतः
त्रयाणामानुलोम्यं हि प्रातिलोम्यं न विद्यते ११
प्रातिलोम्येन यो याति न तस्मात् पापकृतमः

Branch 30A: Smṛiti (04) Dakṣha Smṛiti

Ending:

आश्रमे तु यतिर्यस्य मुहूर्त्तमपि विश्रमेत्
किन्तस्यान्येन धर्मेण कृतकृत्योऽभिजायते ४४
समितं यद्गृहस्थेन पापमामरणान्तिकम्
स निर्दहति तत्सर्व्वमेकरात्रोषितोयतिः ४५
योगाश्रमपरिश्रान्तं यस्तु भोजयते यतिम्
निखिलं भोजितं तेन त्रैलोक्यं सचराचरम् ४६
यस्मिन् देशे वसेद्योगी ध्यानयोगविचक्षणः
सोऽपि देशो भवेत् पूतः किंपुनस्तस्य वान्धवाः ४७
द्वैतञ्चैव तथाद्वैतं द्वैताद्वैतं तथैव च
न द्वैतम् नापि चाद्वैतमित्येतत् परमार्थिकम् ४८
नाहं नैवान्यसम्वन्धो ब्रह्मभावेन भावितः
ईदृशायामवस्थायामवाप्यं परमं पदम् ४९
द्वैतपक्षाः समाख्याता येऽद्वैते तु व्यवस्थिताः
अद्वैतिनां प्रवक्ष्यामि यथा धर्मः सुनिश्चितः ५०
तत्रात्मव्यतिरेकेण द्वितीयं यदि पश्यति
ततः शास्त्राण्यधीयन्ते श्रूयन्ते ग्रन्थसञ्चयाः ५१
दक्षशास्त्रं यथा प्रोक्तमशेषाश्रममुत्तमम्
अधीयन्ते तु ये विप्रास्ते यान्त्यमरलोकताम् ५२
इदन्तु यः पठेद्भक्त्या शृणुयादधमोऽपिवा ।
स पुत्रपौत्रपशुमान् कीर्त्तिञ्च समवाप्नुयात् ५३
श्रावयित्वा त्विदं शास्त्रं श्राद्धकालेऽपिवा द्विजः ।
अक्षयं भवति श्राद्धं पितृभ्यश्चोपजायते ५४
इति दाक्षे धर्मशास्त्रे सप्तमोऽध्यायः ।
समाप्ता चेयं दक्षस्मृतिः ।

Reference: *Smṛti Sandarbha* I, p. 569.

Branch 30: Smṛiti (05)Viṣhṇu Smṛiti Prathama Viṣhṇu Smṛiti
Structure: 113 Verses
Beginning:

विष्णुस्मृतिः । श्रीगणेशाय नमः ।
महामते महाप्राज्ञ सर्वशास्त्रविशारद ।
अक्षीणकर्म बन्धस्तु पुरुषो द्विजसत्तम १
सततं किं जपन् जप्यं विबुधः किमनुस्मरन् ।
मरणे यज्जपं जप्यं यच्च भाव मनुस्मरन् २
यच्चध्यात्वा द्विजश्रेष्ठ पुरुषो मुत्यु मागतः ।
परम्पद मवाप्नोति तन्मे वद महामुनेः ३
शौनक उवाच
इदमेव महाराज पृष्टवांस्ते पितामहः
भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ४
युधिष्ठिर उवाच
पितामह महाप्राज्ञ सर्वशास्त्र विशारद
प्रयाणकाले यच्चिन्त्यं सूरिभिस्तत्वचिन्तकैः ५
किन्नु स्मरन् कुरुश्रेष्ठ मरणे पर्युपस्थिते
प्राप्नुयात्परमां सिद्धिं श्रोतुमिच्छामि तद्वद ६
भीष्म उवाच
अद्भुतं च हितं सूक्ष्मं उक्तं प्रश्नं त्वयानघ
शृणुष्वावहितो राजन् नारदेन पुरा श्रुतम् ७
श्रीवत्साङ्कं जगद्बीज मनन्तं लोकसाक्षिणम्
पुरा नारायणं देवं नारदः परिपृष्टवान् ८
नारद उवाच
त्वमक्षरं परं ब्रह्म निर्गुणं तमसः परम्
आहुर्वेद्यं परं धाम ब्रह्मादि कमलोद्भवम् ९
भगवन् भूतभव्येश श्रद्दधानै जितेन्द्रियैः
कथं भक्तैर्विचिन्त्योऽसि योगिभिर्देहमोक्षिभिः १०
किं च जप्यं जपेन्नित्यं कल्यमुत्थाय मानवाः

Branch 30: Smṛiti (05) Viṣhṇu Smṛiti Prathama Viṣhṇu Smṛiti

Ending:

नमो नारायणायेति ये विदुर्ब्रह्म शाश्वतम्
अन्तकाले जपन्नेति तद्विष्णोः परमं पदम् १०३
आचारहीनो मुनिप्रवीर भक्त्या विहीनोऽपितु विन्दतोऽपि
संकीर्त्य नारायणशब्दमात्रं विमुक्तपापो विशतेऽच्युतां गतिम् १०४
कान्तारवनदुर्गेषु कृत्स्नेष्वापत्सु संयुगे
दस्युभिः सन्निरोधे च नामभिर्मां प्रकीर्तयेत् १०५
न दिव्यपुरुषो धीमान् येषु स्थानेषु मां स्मरेत्
चौरव्याघ्र महासर्पैः क्रूरैरपि न वाध्यते १०६
जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते १०७
नामास्ति याति शक्तिश्च पापे निर्हरणे हरेः
श्वपचोऽपि नरः कर्तुं क्षमस्तावन्न किल्बिषम् १०८
न तावत् पापमस्तीह यावन्नामहतं हरेः
अतिरेक भयादाहुः प्रायश्चित्तान्तरं बुधाः १०९
गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः
अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः ११०
न वासुदेवात्परमस्ति मङ्गलं न वासुदेवात्परमस्ति पावनम्
न वासुदेवात्परमस्ति दैवतं न वासुदेवं प्रणिपत्य सीदति १११इमां रहस्यां
परमामनुस्मृतिं ह्यधीत्य बुद्धिं लभते च नैष्ठिकम् ।
विहाय दुःखानि विमुच्य सङ्कटात्
स वीतरागो विचरेन्मही मिमाम् ११२
गङ्गायां मरणं चैव दृढा भक्तिश्च केशवे
ब्रह्मविद्याप्रबोधश्च नाल्पस्य तपसः फलम् ११३
इति विष्णुस्मृतिः स्माप्ता ।

Reference: *Smṛti Sandarbha* I, p. 389.

Branch 30A: Smṛiti (06) Yājñavalkya Smṛiti
Structure: Three Main Chapters.
Beginning:

अथ याज्ञवल्क्यस्मृतिः
प्रथम आचाराध्याय उपोद्घातप्रकरणम्
योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः १
मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन्
यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत २
पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ३
मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः
यमापस्तम्बसम्वर्ताः कात्यायनबृहस्पती ४
पराशरव्यासशङ्खलिखिता दक्षगौतमौ
शातातपो वसिष्ठश्च धर्मशास्त्रयोजकाः ५
देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम्
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ६
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियं आत्मनः
सम्यक्सम्कल्पजः कामो धर्ममूलं इदं स्मृतम् ७
इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्
अयं तु परमो धर्मो यद्योगेन आत्मदर्शनम् ८
चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा
सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः ९
२ ब्रह्मचारिप्रकरणम्
ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः १०
गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च ११
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः

Branch 30A: Smṛiti (06) Yājñavalkya Smṛiti

Ending:

यथाकथम्चित्पिगडानां चत्वारिंशच्छतद्वयम्
मासेनैवोपभुञ्जीत चान्द्रायगमथापरम् ३२४
कुर्यात्त्रिषवगस्नायी कृच्छ्रं चान्द्रायगं तथा
पवित्राणि जपेत्पिगडान्गायत्र्या चाभिमन्त्रयेत् ३२५
अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायगेन च
धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम् ३२६
कृच्छ्रकृद्धर्मकामस्तु महतीं श्रियमाप्नुयात्
यथा गुरुक्रतुफलं प्राप्नोति सुसमाहितः ३२७
श्रुत्वैतानृषयो धर्मान्याज्ञवल्क्येन भाषितान्
इदमूचुर्महात्मानं योगीन्द्रममितौजसम् ३२८
य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः
इह लोके यशः प्राप्य ते यास्यन्ति त्रिविष्टपम् ३२९
विद्यार्थी प्राप्नुयाद्विद्यां धनकामो धनं तथा
आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियम् ३३०
श्लोकत्रयमपि ह्यस्माद्यः श्राद्धे श्रावयिष्यति
पितृगां तस्य तृप्तिः स्यादक्षय्या नात्र संशयः ३३१
ब्राह्मणः पात्रतां याति क्षत्रियो विजयी भवेत्
वैश्यश्च धान्यधनवानस्य शास्त्रस्य धारणात् ३३२
य इदं श्रावयेद्विप्रान् द्विजान् पर्वसु पर्वसु ।
अश्वमेधफलं तस्य तद्भवाननुमन्यताम् ३३३
श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितम् ।
एवमस्त्विति होवाच नमस्कृत्य स्वयम्भुवे ३३४
इति याज्ञवल्क्यीये धर्मशास्त्रे प्रायश्चित्त प्रकरणं नाम तृतीयोऽध्यायः ।
इति याज्ञवल्क्यस्मृतिः समाप्ता ।

Reference: *Smṛti Sandarbha* III, p. 1235.

## Branch 30A: Smṛiti (07) Likhita Smṛiti

Structure: 96 Verses

Beginning:

अथ लिखितस्मृतिः । अथेष्टापूर्तकर्म वृषोत्सर्गफल गयापिण्डदान षोडश श्राद्धानि वर्णनम् ।
इष्टापूर्ते तु कर्तव्ये ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते स्वर्गं पूर्ते मोक्षमवाप्नुयात् १
एकाहमपि कर्तव्यं भूमिष्ठमुदकं शुभम् ।
कुलानि तारयेत्सप्त यत्र गौर्वितृषी भवेत् २
भूमिदानेन ये लोका गोदानेन च कीर्तिताः ।
ताँल्लोकान्प्राप्नुयान्मर्त्यः पादपानां प्ररोपणे ३
वापीकूपतडागानिदेवतायतनानि च
पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ४
अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम्
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ५
इष्टापूर्ते द्विजातीनां सामान्यो धर्म उच्यते
अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके ६
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ७
देवतानां पितृणां च जले दद्याज्जलाञ्जलीन्
असंस्कृतमृतानां च स्थले दद्याज्जलाञ्जलिम् ८
एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः
मुच्यते प्रेतलोकात्तु पितृलोकं स गच्छति ९
एष्टव्या वहवः पुत्रा यद्येकोऽपि गयां व्रजेत्
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् १०
वाराणस्यां प्रविष्टस्तु कदाचिन्निष्क्रमेद्यदि
हसन्ति तस्य भूतानि अन्योन्यं करताडनैः ११
गयाशिरे तु यत्किंचिन्नाम्ना पिण्डं तु निर्वपेत्
नरकस्था दिवं यान्ति स्वगस्था मोणमाप्नुयुः १२

Branch 30A: Smṛiti (07) Likhita Smṛiti

Ending:

प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनं चरेत् ८५
चरेत्सांतपनं विप्रः प्राजापत्यं तु क्षत्रियः
तदर्धं तु चरेद्वैश्यः पादं शूद्रे तु दापयेत् ८६
रजस्वला यदा स्पृष्टा श्वानसूकरवायसैः
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ८७
आजानुतः स्नानमात्रमानाभेस्तु विशेषतः
अत ऊर्ध्वं त्रिरात्रं स्यान्मदिरास्पर्शने मतम् ८८
बालश्चैव दशाहे तु पञ्चत्वं यदि गच्छति
सद्य एव विशुध्येत नाशौचं नोदकक्रिया ८९
शावसृतक उत्पन्ने सूतकं तु यदा भवेत्
शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ९०
षष्ठेन शुध्येतैकाहं पञ्चमे त्वहमेव तु
चतुर्थे सप्तरात्रं स्यात्त्रिपुरुषं दशमेऽहनि ९१
मरणारब्धमाशौचं संयोगो यस्य नाग्निभिः
आदाहात्तस्य विज्ञेयं यस्य वैतानिन्को विधिः ९२
आममासं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः
अन्त्यभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः ९३
मार्जनीरजमेष षाण्डं स्नानवस्त्रघटोदकम्
नवाम्भसि तथा चैव हन्ति पुण्यं दिवाकृतम् ९४
दिवा कपित्थच्छायायां रात्रौ दधिशमीषु च ।
धात्रीफलेषु सर्वत्र अलक्ष्मीर्वसते सदा ९५
यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्यष्टशतं जपेत् ९६
इति लिखितर्षिप्रोक्तं धर्मशास्त्रं समाप्तम् । समाप्तेयं लिखितस्मृतिः ।

Reference: *Smṛti Sandarbha* III, pp.1455 ff.

## Branch 30A: Smṛiti (08) Samvarta Smṛiti
Structure: 227 Verses
Beginning:
अथ सम्वर्त्तस्मृतिः । अथादौ ब्रह्मचर्यवर्णनम् । श्रीगणेशाय नमः ।
सम्वर्त्तमेकमासीनमात्मविद्यापरायणम् ।
ऋषयस्तु समागम्य पप्रच्छुधर्मकाङ्क्षिणः १
भगवन् श्रोतुमिच्छामः श्रेयस्कर्म द्विजोत्तम ।
यथावद्धर्ममाचक्ष्व शुभाशुभविवेचनम् २
वामदेवादयः सर्वे तमपृच्छन् महौजसम् ।
तानब्रवीन्मुनीन् सर्वान् प्रीतात्मा श्रूयतामिति ३
स्वभावाद्यत्र विचरेत् कृष्णसारः सदा मृगः
धर्म्यदेशः स विज्ञेयो द्विजानां धर्मसाधनम् ४
उपनीतः सदा विप्रो गुरोस्तु हितमाचरेत्
स्रग्गन्धमधुमांसानि ब्रह्मचारी विवर्जयेत् ५
सन्ध्यां प्रातः सनक्षत्रामुपासीत यथाविधि
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्करे ६
तिष्ठन् पूर्वां जपं कुर्य्याद्ब्रह्मचारी समाहितः
आसीनः पश्चिमां सन्ध्यां जपं कुर्य्यादतन्द्रितः ७
अग्निकार्य्यं ततः कुर्यान्मेधावी तदनन्तरम्
ततोऽधीयीत वेदन्तु वीक्षमाणो गुरोर्मुखम् ८
प्रणवं प्राक्प्रयुञ्जीत व्याहृतिस्तदनन्तरम्
गायत्रीञ्चानुपूर्वेण ततोवेदं समारभेत् ९
हस्तौ सुसंयतौ कार्य्यौ जानुभ्यामुपरिस्थितौ
गुरोरनुमतं कुर्य्यात् पठन्नान्यमतिर्भवेत् १०
सायं प्रातस्तु भिक्षेत ब्रह्मचारी सदा व्रती
निवेद्य गुरवेऽश्नीयात् प्राङ्मुखो वाग्यतः शुचि ११
सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्
नान्तरा भोजनं कुर्य्यादग्निहोत्रसमो विधिः १२
आचम्यैव तु भुञ्जीत भुक्त्वा चोपस्पृशेद्द्विजः

Branch 30A: Smṛiti (08) Samvarta Smṛiti

Ending:

गायत्र्या लक्षजप्येन सर्वपापैः प्रमुच्यते २१६
अयाज्ययाजनं कृत्वा भुक्त्वा चान्नं विगर्हितम्
गायत्र्यष्टसहस्रन्तु जप्यं कृत्वा विमुच्यते २१७
अहन्यहनि योऽधीते गायत्रीं वै द्विजोत्तमः
मासेन मुच्यते पापादुरगः कञ्चुकाद्यथा २१८
गायत्रीं यः सदा विप्रो जपते नियतः शुचिः
स याति परमं स्थानं वायुभूतः खमूर्त्तिमान् २१९
प्रणवेन तु संयुक्ता व्याहृतिः सप्त नित्यशः
गायत्रीं शिरसा सार्द्धं मनसा त्रिः पठेद्द्विजः २२०
निगृह्य चात्मनः प्राणान् प्राणायामो विधीयते
प्राणायामत्रयं कुर्य्यान्नित्यमेव समाहितः २२१
मानसं वाचिकं पापं कायेनैव तु यत्कृतम्
तत्सर्व नश्यते तूर्णं प्राणायामत्रये कृते २२२
ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा
सामानि सरहस्यानि सर्वपापैः प्रमुच्यते २२३
पावमानीं तथा कौत्सं पौरुषं सूक्तमेव च
जप्त्वा पापैः प्रमुच्येत पित्र्यञ्च मधुच्छन्दसाम् २२४
मण्डलं ब्राह्मणं रुद्रसूक्तोक्ताश्च वृहत्कथाः
वामदेव्यं वृहत्साम जप्त्वा पापैः प्रमुच्यते २२५
चान्द्रायणन्तु सर्वेषां पापानां पावनं परम् ।
कृत्वा शुद्धिमवाप्नोति परमं स्थानमेव च २२६
धर्मशास्त्रमिदं पुण्यं सम्वर्त्तेन तु भाषितम् ।
अधीत्य ब्राह्मणो गच्छेद्ब्रह्मणः सद्म शाश्वतम् २२७
इति श्रीसम्वर्त्तेनोक्तं धर्मशास्त्रं समाप्तम् ।

Reference: *Smṛti-Sandarbha* I, pp. 547ff.

## Branch 30A: Smṛiti (09) Śhaṅkha Smṛiti

Structure: 18 Chapters

Beginning:

अथ शङ्खस्मृतिः । श्रीगणेशाय नमः । प्रथमोऽध्यायः । अथ ब्राह्मणादीनां कर्मवर्णनम् ।
स्वम्भुवे नमस्कृत्य सृष्टिसंहारकारिणे ।
चातुर्वर्ण्यहितार्थाय शङ्खः शास्त्रमथाकरोत् १
यजनं याजनं दानं तथैवाध्यापनक्रियाम् ।
प्रतिग्रहञ्चाध्ययनं विप्रः कर्माणि कारयेत् २
दानमध्ययनञ्चैव यजनञ्च यथाविधि ।
क्षत्रियस्य तु वैश्यस्य कर्मेदं परिकीर्तितम् ३
क्षत्रियस्य विशेषेण प्रजानां परिपालनम्
कृपिगौ रक्षवाणिज्यं वैश्यस्य परिकीर्तितम् ४
शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि चाप्यथ
क्षमा सत्यं दनः शौचं सर्वेषामविशेषतः ५
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः
तेषां जन्म द्वितीयन्तु विज्ञेयं मौञ्जिबन्धनम् ६
आचार्यस्तु पिता प्रोक्तः सावित्री जननी तथा
ब्रह्मक्षत्रविशाञ्चैव मौञ्जिबन्धनजन्मनि ७
वृत्त्या शूद्रसमास्तावद्विज्ञेयास्ते विचक्षणैः
यावद्वेदेन जायन्ते द्विजा ज्ञेयास्ततः परम् ८
इति शाङ्खीये धर्मशास्त्रे प्रथमोऽध्यायः
अथ द्वितीयोऽध्यायः
ब्राह्मणादीनां संस्कारवर्णनम्
गर्भस्य स्फुटताज्ञाने निषेकः परिकीर्तितः
ततस्तु स्यन्दमात् कार्यं पुंसवनं विचक्षणैः १
षष्ठेऽष्टमे वा सीमन्तो जाते वै जातकर्म च
अशौचे तु व्यतिक्रान्ते नामकर्म विधीयते
नामधेयञ्च कर्तव्यं वर्णानाञ्च समाक्षरम्

Branch 30A: Smṛiti (09) Śhaṅkha Smṛiti

Ending:

द्वादशाहोपवासेन पराकः परिकीर्तितः ५
विधिनोदकसिद्धानि मासमश्नीत यत्नतः
स कृत्वा सोदकान्मासं कृच्छ्रं वारुणमुच्यते ६
बिल्वैरामलकैर्वाऽपि पद्माक्षैरथवा शुभैः
मासेन लोकेऽतिकृच्छ्रः कथ्यते बुद्धिसत्तमैः ७
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्
एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् ८
एतैस्तु त्र्यहमभ्यस्तं महासांतपनं स्मृतम्
पिण्याकं वामतक्राम्बुसक्तूनां प्रतिवासरम् ९
उपवासान्तराभ्यासात्तुलापुरुष उच्यते
गोपुरीषाशनो भुत्वा मासं नित्यं समाहितः १०
व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये
ग्रासं चन्द्रकलावृद्ध्या प्राश्नीयाद्वर्धयन्सदा ११
ह्रासयेच्च कलाहानौ व्रतं चान्द्रायणं चरेत्
मुण्डस्त्रिषवणस्नायी अधः शायी जितेन्द्रियः १२
स्त्रीशूद्रपतितानां च वर्जयेत्परिभाषणम्
पवित्राणि जपेच्छक्त्या जुहुयाच्चैव शक्तितः १३
अयं विधिः स विज्ञेयः सर्वकृच्छ्रेषु सर्वदा ।
पापात्मानस्तु पापेभ्यः कृच्छ्रैः संतारिता नराः १४
गतपापादिकं यान्ति नात्र कार्या विचारणा ।
शङ्खप्रोक्तमिदं शास्त्रं योऽधीते बुद्धिमान्नरः ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते १६
इति शाङ्खे धर्मशास्त्रेऽष्टादशोऽध्यायः ।
समाप्ताचेयं शङ्खस्मृतिः । ॐ तत्सद्ब्रह्मार्पणमस्तु ।

Reference: *Smṛti-Sandarbha* III, p. 1415.

## Branch 30A: Smṛiti (10) Bṛihaspati Smṛiti
Structure: 81 Verses

Beginning:

अथ बृहस्पतिस्मृतिः । श्रीगणेशाय नमः ।
तत्रादौससुवर्णपृथिवीदानफलमहत्ववर्णनम्
इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणम्
मघवान् वाग्विदां श्रेष्ठं पर्य्यपृच्छद् बृहस्पतिम् १
भगवन् केन दानेन सर्वतः सुखमेधते
यद्दत्तं यन्महार्घं च तन्मे ब्रूहि महातप २
एवमिन्द्रेण पृष्टोऽसौ देवदेवपुरोहितः
वाचस्पतिर्महाप्राज्ञो बृहस्पतिरुवाच ह ३
सुवर्णदानं रोदानं भूमिदानं च वासव
एतत् प्रयच्छमानस्तु सर्वपापैः प्रमुच्यते ४
सुवर्णं रजतं वस्त्रं मणिरत्नं च वासव
सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति ५
फालकृष्टां महीं दत्त्वा सबीजां शस्यशालिनीम्
यावत् सूर्य्यकरा लोकास्तावत् स्वर्गे महीयते ६
यत्किञ्चित् कुरुते पापं पुरुषो वृत्तिकर्शितः
अपि गोचर्म्ममात्रेण भूमिदानेन शुध्यति ७
दशहस्तेन दण्डेन त्रिंशद्दण्डानि वर्त्तनम्
दश तान्येव विस्तारो गोचर्मे तन्महाफलम् ८
सवृषं गोसहस्रं च यत्र तिष्ठत्यतन्द्रितम्
बालवत्सप्रसूतानां तद् गोचर्म इतिस्मृतम् ९
विप्राय दद्याच्च गुणान्विताय तपोवियुक्ताय जितेन्द्रियाय
यावन्मही तिष्ठति सागरान्ता तावत् फलं तस्य भवेदनन्तम् १०
यथा वीजानि रोहन्ति प्रकीर्णानि महीतले
एवं कामाः प्ररोहन्ति भूमिदानसमार्जिताः ११
यथाप्सु पतितः सद्य स्तैलविन्दुः प्रसर्पति
एवं भूमिकृतं दानं सश्ये सश्ये प्ररोहति १२

Branch 30A: Smṛiti (10) Bṛihaspati Smṛiti

Ending:

तं न तारयते यस्तु तमाहुर्ब्रह्मघातकम् ६९
उपस्थिते विवाहे च यज्ञे दाने च वासव
मोहाच्चरति विघ्नं यः स मृतो जायते क्रिमिः ७०
धनं फलति दानेन जीवितं जीवरक्षणात्
रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ७१
फलमूलाशनात् पूज्यं स्वर्गं सत्येन लभ्यते
प्रायोपवेशनाद्राज्यं सर्वत्र सुखमश्नुते ७२
गवाढ्यःशक्रदीक्षायाः स्वर्गगामी तृणाशनः
स्त्रिय स्त्रिषवणस्नायी वायुं पीत्वा क्रतुं लभेत् ७३
नित्यस्नायी भवेदर्कः सन्ध्ये द्वे च जपन् द्विजः
न तत्साधयते राज्यं नाकपृष्ठमनाशके ७४
अग्निप्रवेशे नियतं ब्रह्मलोके महीयते
रत्नानां प्रतिसंहारे पशून् पुत्रांश्च विन्दति ७५
नाके चिरं स वसते उपवासी च यो भवेत्
सततं चैकशायी यः स लभेदीप्सितां गतिम् ७६
वीरासनम् वीरशय्यां वीरस्थानमुपाश्रितः
अक्षय्यास्तस्य लोकाः स्युः सर्वकामगमास्तथा ७७
उपवासञ्च दीक्षाञ्च अभिषेकञ्च वासव
कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते ७८
अधीत्य सर्ववेदान् वै सद्यो दुःखात् प्रमुच्यते ७९
पावनं चरते धर्मं स्वर्गे लोके महीयते ८०
बृहस्पति मतं पुण्यं ये पठन्ति द्विजातयः
चत्वारि तेषां वर्धन्ते आयुर्विद्या यशो बलम् ८१

इति बृहस्पतिप्रणीतं धर्म्मशास्त्रं सम्पूर्णम्

Reference: *Smṛti-Sandarbha* III, p. 1610.

## Branch 30A: Smṛiti (11) Atri Smṛiti
Structure: 5 Chapters
Beginning:
अथ अत्रिस्मृतिः । श्रीगणेशाय नमः ।
अज्ञानतिमिरान्धस्य वृतेनानेन केशव
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव १
हुताग्निहोत्रमासीन मत्रिं श्रुतवतां वरम्
उपगम्य च पृच्छन्ति ऋषयः शंसितव्रताः २
भगवन् केन दानेन जपेन नियमेन च
शुध्यन्ते पातकैर्युक्तास्तं ब्रवीमि महामुने ३
अपिख्यापितदोषाणां पापानां महतां तथा
सर्वेषां चोपपातानां शुद्धिं वक्ष्यामि तत्वतः ४
प्राणायामैः पवित्रैश्च दानैर्होमैर्जपैस्तथा
शुद्धिकामाः प्रमुच्यन्ते पावकेभ्यो न संशयः ५
प्राणायामान् पवित्रांश्च व्याहृतीः प्रणवन्तथा
पवित्रपाणिरासीनोऽध्यभ्यस्यब्रह्म नैत्यिकम् ६
आवर्त्तयेत्सदायुक्तः प्राणायामान् पुनः पुनः
आकेशाग्रादानखान्तात्तपस्तप्यत उत्तमम् ७
त्वक्चर्ममांसरुधिरमेदोमज्जास्थिभिः कृताः
तथेन्द्रियकृता दोषाः दह्यन्ते प्राणनिग्रहात् ॥
निरोधाज्जायते वायुर्वायोरग्निर्हि जायते
तापेनापो हि जायन्ते ततोऽन्तः शुध्यते त्रिभिः ८
तथा चर्म तथानङ्गा दोषा अभ्यर्ति धर्मतः
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ९
प्राणायामैर्दहेत् दोषाद्धारणाभिश्च किल्विषम्
प्रत्याहारेण विषयान्ध्यानेनानैश्वरान् गुणान् १०
न च तीव्रेण तपसा न स्वाध्यायैर्नचेज्यया
मतिंगन्तुं सुराः शक्ता योगात्संप्राप्नुवन्तियाम्
योगात्सम्प्राप्यते ज्ञानं योगाद्धर्मस्य लक्षणम्

Branch 30A: Smṛiti (11) Atri Smṛiti

Ending:

अमुक्तयो रस्तगयो रद्यादृष्ट्वा परेऽहनि
यस्य स्वजन्मनक्षत्रे गृह्येते शशिभास्करौ ७१
व्याधिः प्रवाहे मृत्युश्च दारिद्र्यञ्च महद्भयम्
तस्माद्दानं च होमञ्च देवताभ्यर्चनं जपम् ७२
कुर्यात्तस्मिन् दिने युक्ते तस्य शान्तिर्भविष्यति
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ७३
यो नरः स्नाति तत्तीर्थे समुद्रे सेतुबन्धने
उपोष्य रजनी मेकां राहुग्रस्ते दिवाकरे ७४
सप्तजन्मकृतं पापंतत्क्षणादेव नश्यति
सोमेऽप्येवं सूर्यतुल्यं तस्मात् सर्वं समाचरेत् ७५

इति आत्रेयस्मृतौ पञ्चमोऽध्यायः

इष्ट्वा क्रतुशतैरेवं देवराजो महाद्युतिः
स्वगुरुं वाग्मिनां श्रेष्ठं पर्यपृच्छद्बृहस्पतिम् १
भगवन् केन दानेन स्वर्गतः सुखमेधते
यदक्षयं महाभाग त्वं ब्रूहि वदताम्बर २
एवं पृष्टः स इन्द्रेण देवदेवपुरोहितः
वाचस्पतिर्महातेजो वृहस्पतिरुवाच ह ३
हिरण्यदानं गोदानं भूमिदानञ्च वासव
एतत्प्रयच्छमानोऽपि स्वर्गतः सुखमेधते ४
सुवर्णं रजतं वस्त्रं मणिरत्नं वसूनि च ।
सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति ५
फलाकृष्टां महीं दद्यात् सवीजां सस्यमालिनीम् ।
यावत्सूर्यकरा लोके तावत्सर्गे महीयते ५
इति आत्रेयस्मृतौ धर्मशास्त्रं सम्पूर्णम् । शुभमस्तु

Reference: *Smṛti-Sandarbha* III, pp.336ff.

## Branch 30A: Smṛiti (12) Kātyāyana Smṛiti

Structure: 3 Prapāṭhakas, subdivided into 29 Khaṇḍas.

Beginning:

कात्यायनस्मृतिः श्रीसामवेदाय नमः
प्रथमः खण्डः अथाचाराध्यायः
तत्रादौ यज्ञोपवीतकर्मप्रकरणवर्णनम्
अथातो गोभिलोक्तानामन्येषां चैव कर्मणाम्
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् १
त्रिवृदूर्द्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम्
त्रिवृत्तच्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते २
पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम्
तद्धार्यमुपवीतं स्यान्नातोलम्बं नचोच्छ्रितम् ३
सदोपवीतिना भाव्यं सदा बद्धशिखेन च
विशिखो व्युपवातश्च यत्करोति न तत्कृतम् ४
त्रिःप्राश्यापो द्विरुन्मृज्य मुखमेतान्युपस्पृशेत्
आस्यनामाक्षिकर्णांश्च नाभिवक्षःशिरोंऽशकान् ५
संहताभिस्त्र्यङ्गुलिभिरास्यमेवमुपस्पृशेत्
अङ्गुष्ठेन प्रदेशिन्या घ्राणं चैवमुपस्पृशेत्
अङ्गुष्ठानामिकाभ्याञ्च चक्षुः श्रोत्रं पुनः पुनः ६
कनिष्ठाङ्गुष्ठयोर्न्नाभिं हृदयं तु तलेन वै
सर्वाभिस्तु शिरः पश्चाद्बाह चाग्रेण संस्पृशेत् ७
यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ८
यत्रदिङ्नियमो न स्याज्जपहोमादिकर्मसु
तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्रीसौम्यापराजिताः ९
तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः
तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता १०
गौरी पद्मा शची मेधा सावित्री विजया जया
देवसेना स्वधा स्वाहा मातरो लोकमातरः ११

Branch 30A: Smṛiti (12) Kātyāyana Smṛiti

Ending:

गयादौ पिण्डमात्रस्य दीयमानत्वदर्शनात् ९
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः
ब्राह्मणस्य परीक्षायां महायत्नप्रदर्शनात् १०
आमश्राद्धविधानस्य विना पिण्डैः क्रियाविधिः
तदालभ्याप्यनध्यायविधानश्रवणादपि ११
विद्वन्मतमुपादाय ममाप्येतद्धृदि स्थितम्
प्राधान्यमुभयोर्यस्मात्तस्मादेष समुच्चयः १२
प्राचीनावीतिना कार्यं पित्र्येषु प्रोक्षणं पशोः
दक्षिणोद्वासनान्तञ्च चरोर्निर्वपणादिकम् १३
सन्नपश्वावदानानां प्रधानार्थो न हीतरः
प्रधानं हवनञ्चैव शेषं प्रकृतिवद्भवेत् १४
द्वीपमुन्नतमाख्यातं शादा चैवेष्टका स्मृता
कीलिनं सजलं प्रोक्तं दूरखातोदको मरुः १५
द्वारगवाक्षः सन्दर्भैः कर्द्दमभित्यन्तकोण वा
वेधैश्चानष्टं वास्तुघोरं विद्वन्मनाक्रान्तमार्ग्गैश्च १६
वशङ्गमाबिति ब्रीहीञ्छेषश्चेति यवांस्तथा
असावित्यत्र नामोक्त्वा जुहुयात्क्षिप्रहोमवत् १७
साक्षतं सुमनोयुक्तमुदकं दधिसंयुतम्
अर्घ्यं दधिमधुभ्याञ्च मधुपर्को विधीयते १८
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ
कांस्यापिधानं कांस्यस्थं मधुपर्क्कं समर्पयेत् १९

इति कात्यायनविरचिते कर्मप्रदीपे तृतीयः प्रपाठकः
इत्येकोनत्रिंशः खण्डः
समाप्ता चेयं कात्यायनस्मृतिरितिलेख्यंनास्त्यत्र
तस्मादयंग्रन्थः समाप्तोनवेत्यत्रसंदेहः

Reference:

*Smṛti Sandarbha*, Vol. III, (Delhi: Nag, 1981), pp. 1335ff.

## Branch 30A: Smṛiti (13) Parāśhara Smṛiti

Structure: 12 Chapters

Beginning:

श्रीमन्महर्षि पराशरप्रणीता पराशरस्मृतिः । प्रथमोऽध्यायः ।
श्रीगणेशायनमः ।
अथातो हिमशैलाग्रे देवदारु वनालये
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा १
मानुषाणां हितं धर्मं वर्तमाने कलौ युगे
शौचाचारं यथावच्च वदसत्यवती सुतः २
तच्छ्रुत्वर्षिवाक्यं तु सशिष्योऽङ्ग्यर्कसन्निभः
प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ३
न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्यहम्
अस्मत्पितैवप्रष्टव्येति व्यासः सुतोऽब्रवीत् ४
ततस्तर्षयः सर्वे धर्मतत्त्वार्थकाङ्क्षिणः
ऋषिं व्यासं पुरस्कृत्यगता बदरिकाश्रमम् ५
नाना पुष्पलताकीर्णं फलवृष्कैरलंकृतम्
नदी प्रस्रवणोपेतं पुण्यतीर्थोपशोभितं च ६
मृगपक्षिनिनादाढ्यं देवतायतनावृतम्
यक्षगन्धर्वसिद्धैश्च नृत्यगीतैरलंकृतम् ७
तस्मिन्नृषिसभा मध्ये शक्तिपुत्रं पराशरम्
सुखासीनं महातेजा मुनिमुख्यगणावृतम् ८
कृताञ्जलिपुटो भूत्वा व्यासस्त्वृषिभिः सह
प्रदक्षिणाभिवादैश्च स्तुतिभिः समपूजयत् ९
ततः संतुष्टहृदयः पराशरमहामुनिः
आहसुस्वागतं ब्रूहीत्यासीनो मुनिपुङ्गवः १०
कुशलं सम्यगित्युक्त्वा व्यासः पृच्छत्यनन्तरम्
यदि जानासि भक्तिं मे स्नेहाद्वा भक्तवत्सल ११
धर्मकथयमे तातानुग्राह्यो ह्यहं तव
श्रुता मे मानवा धर्मा वासिष्ठा काश्यपास्तथा १२

Branch 30A: Smṛiti (13) Parāśhara Smṛiti

Ending:

यजेतवाश्वमेधेन राजा तु पृथिवीपतिः
पुनः प्रत्यागते वेश्मवासार्थमुपसर्पति ७२
सपुत्रः सहभृत्यैश्च कुर्याद्ब्राह्मणभोजनम्
गाश्चैवैकशतं दद्याच्चतुर्विध्येषु दक्षिणाम् ७३
ब्राह्मणानां प्रसादेन ब्रह्महा तु विमुच्यते
सवनस्थां स्त्रियं हत्वा ब्रह्महत्या व्रतं चरेत् ७४
मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम्
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ७५
अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम्
सुरापानं सकृत्कृत्वाग्निवर्णं सुरां पिबेत् ७६
सपावयेदथात्मानमिहलोके परत्र च
अपहृत्यसुवर्णं तु ब्राह्मणस्यततः स्वयम् ७७
गच्छेन्मुसलमादायराजाभ्याशं वधायतु
ततः शुद्धिमवाप्नोति राज्ञासौ मुक्तैव च ७८
कामतस्तु कृतं यत्स्यान्नान्यथा वधमर्हति
आसनाच्छयनाद्यानात्सम्भाषात्सहभोजनात् ७९
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि
चान्द्रायणं यावकं तु तुलापुरुषैव च ८०
गवां चैवानुगमनं सर्वपापप्रणाशनम्
एतत्पराशरं शास्त्रं श्लोकानां शतपञ्चकम् ८१
द्विनवत्यासमायुक्तं धर्मसास्त्रस्यसंग्रहः
यथाध्ययन कर्माणि धर्मशास्त्रमिदं तथा ८२
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिना ८३
इति पाराशरे धर्मशास्त्रे द्वादशोऽध्यायः । समाप्ता चेयं पराशरसंहिता ।

Reference: *Smṛti-Sandarbha* II, pp.625ff.

## Branch 30A: Smṛiti (14) Manu Smṛiti

Structure: 12 Chapters

Beginning:

मनुस्मृतिः । प्रथमोऽध्यायः
मनुमेकाग्रमासीनमभिगम्य महर्षयः
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् १
भगवन्सर्ववर्णानां यथावदनुपूर्वशः
अन्तरप्रभवानां च धर्मान्नो वक्तुमर्हसि २
त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः
अचिन्त्यस्याप्रमेयस्य कार्य तत्त्वार्थवित्प्रभो ३
स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः
प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्श्रूयतामिति ४
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ५
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम्
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ६
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ७
सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः
अप एव ससर्जादौ तासु वीर्यमवासृजत् ८
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्
तस्मिञ् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ९
आपो नरा इति प्रोक्तापो वै नरसूनवः
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः १०
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकं
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते ११
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा १२
ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे

Branch 30A: Smṛiti (14) Manu Smṛiti

Ending:

तद्वोऽभिहितं सर्वं निःश्रेयसकरं परम्
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम् ११६
एवं स भगवान्देवो लोकानां हितकाम्यया
धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान् ११७
सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः
सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः ११८
आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ११९
खं संनिवेशयेत्खेषु चेष्टनस्पर्शनेऽनिलम्
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु १२०
मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् १२१
प्रशासितारं सर्वेषामणीयांसमणोरपि
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् १२२
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् १२३
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् १२४
एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् १२५
इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् १२६

समाप्तं मानवं धर्मशास्त्रम्

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां मनुस्मृत्यां द्वादशोऽध्यायः

Reference: *Smṛti-Sandarbha* I, pp.1ff.

## Branch 30A: Smṛiti (15) Auśhanasa Saṃhitā

Structure: 51 Verses

Beginning:

अथ औशनस संहिता । श्रीगणेशाय नमः ।
अथानुलोमप्रतिलोमजात्यन्तराणां निरूपणवर्णनम् ।
अतः परं प्रवक्ष्यामि जातिवृत्तिविधानकम् ।
अनुलोमविधानञ्च प्रतिलोमविधिं तथा १
सान्तरालकसंयुक्तं सर्वं संक्षिप्य चोच्यते ।
नृपाद्ब्राह्मणकन्यायां विवाहेषु समन्वयात् २
जातः सूतोऽत्र निर्दिष्टः प्रतिलोमविधिर्द्विजः ।
वेदानहस्तथा चैषां धर्माणामनुबोधकः ३
सूताद्विप्र प्रसूतायां सूतो वेणुक उच्यते
नृपायामेव तस्यैव जातो यश्चर्मकारकः ४
ब्राह्मण्यां क्षत्रियाच्चौर्याद्रथकारः प्रजायते
वृत्तञ्च शूद्रवृत्तस्य द्विजत्वं प्रतिषिध्यते ५
यानानां ये च वोढारस्तेषाञ्च परिचारकाः
शूद्रवृत्त्या तु जीवन्ति न क्षात्रं धर्ममाचरेत् ६
ब्राह्मण्यां वैश्यसंसर्गाज्जातोमागध उच्यते
वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः ७
प्रशंसावृत्तिको जीवेद्वैश्यप्रेष्यकरस्तथा
ब्राह्मण्यां शूद्रसंसर्गाज्जातश्चाण्डाल उच्यते ८
सीसमाभरणं तस्य कार्ष्णायसमथापि वा
वध्रीं कण्ठे समावध्य झल्लरीं कक्षतोऽपि वा ९
मल्लाक्पकर्षणं ग्रामे पूर्वाह्णे परिशुद्धिकम्
नापराह्णे प्रविष्टोऽपि वहिर्ग्रामाच्च नैर्ऋते १०
पिण्डीभूता भवन्त्यत्र नोचेद् बध्या विशेषतः
चाण्डालाद्वैश्यकन्यायां जातः श्वप च उच्यते ११
श्वमांसभक्षणं तेषां श्वान एव च तद्बलम्
नृपायां वैश्यसंसर्गादायोगव इति स्मृतः १२

Branch 30A: Smṛiti (15) Auśhanasa Saṃhitā

Ending:

शूद्रस्य विप्रसंसर्गाज्जात उग्र इति स्मृतः
नृपस्य दण्डधारः स्याद्दण्डं दण्ड्येषु सञ्चरेत् ४१
तस्यैव चौरसंवृस्या जातः शुण्डिक उच्यते
जातदुष्टान् समारोप्य शुण्डाकर्मणि योजयेत् ४२
शूद्रायां वैश्यसंसर्गाद्विधिना सूचकः स्मृतः
सूचकाद्विप्रकन्यायां जातस्तक्षक उच्यते ४३
शिल्पकर्माणि चान्यानि प्रासादलक्षणं तथा
नृपायामेव तस्यैव जातो यो मत्स्यबाधकः ४४
शूद्रायां वैश्यतश्चौर्यात् कटकार इति स्मृतः
वशिष्ठशापात्त्रेतायां केचित् पारशवास्तथा ४५
वैखानसेन केचित्तु केचिद्भागवतेन च
वेदशास्त्राबलम्वास्ते भविष्यन्ति कलौ युगे ४६
कटकारास्ततः पश्चान्नारायणगणाः स्मृताः
शाखा वैखानसेनोक्ता तन्त्रमार्गविधिक्रियाः ४७
निषेकाद्याः श्मशानान्ताः क्रियाः पूजाङ्गसूचिकाः
पञ्चरात्रेण वा प्राप्तं प्रोक्तं धर्मं समाचरेत् ४८
शूद्रादेव तु शूद्रायां जातः शूद्र इति स्मृतः
द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः ४९
सच्छूद्रं तन्नां विजानीयादसच्छूद्रस्ततोऽन्यथा
चौर्यात्काकवचो ज्ञेयश्चाश्वानां तृणवाहकः ५०
एतत्संक्षेपतः प्रोक्तं जातिवृत्तिविभागशः
जात्यन्तराणि दृश्यन्ते संकल्पादित एव तु ५१
इत्यौशनसं धर्मशास्त्रं समाप्तम्
शुक्र संहिता समाप्ता

Reference: *Smṛti-Sandarbha* III, pp.1544ff.

Branch 30A: Smṛiti (16) Vṛddha Hārīta Smṛiti
Structure: 8 Chapters.
Beginning:
अथ वृद्धहारीतस्मृतिः । श्रीगणेशाय नमः । प्रथमोऽध्यायः ।
अथ पञ्चसंस्कारप्रतिपादनवर्णनम् ।
अम्बरीषस्तु तं गत्वा हारीतस्याश्रमं नृपः ।
ववन्दे तं महात्मानं बालार्कसदृशप्रभम् १
संपृष्टः कुशलस्तेन पूजितः परमासने ।
उपविष्टस्ततो विप्रमुवाच नृपनन्दनः २
भगवन् सर्वधर्म्मज्ञ तत्ववेदविदाम्वर ।
पृच्छामि त्वां महाभाग परमं धर्ममव्ययम् ३
ब्रूहि वर्णाश्रमाणान्तु नित्यनैमित्तिकक्रियाः
कर्तव्या मुनिशार्दूल नारीणाञ्च नृपस्य च ४
स्वरूपं जीवपरयोः कथं मोक्षपथस्य च
तत्प्राप्ते साधनं ब्रह्मन् वक्तुमर्हसि सुव्रत ५
एवमुक्तस्तु विप्रर्षिस्तेन राजर्षिणा तदा
उवाच परमप्रीत्या नमस्कृत्य जनार्दनम् ६
हारीत उवाच
शृणु राजन् प्रवक्ष्यामि सर्वं वेदोपवृंहितम्
यदुक्तं ब्रह्मणा पूर्वं पृच्छतो मम भूपते ७
तद्ब्रवीमि परं धर्मं शृणुष्वैकाग्रमानसः
सर्वेषामेव देवानामनादिः पुरुषोत्तमः ८
ईश्वरस्तु स एवान्ये जगतो विभुरव्ययः
नारायणो वासुदेवो विष्णुर्ब्रह्मात्मनो हरिः ९
स्रष्टा धाता विधाता च स एव परमेश्वरः
हिरण्यगर्भः सविता गुणधृङ् निर्गुणोऽव्ययः १०
परमात्मा परं ब्रह्म परं ज्योतिः परात्परः
इन्द्रः प्रजापतिः सूर्यः शिवो वह्निः सनातनः ११
सर्व्वात्मकः सर्वसुहृत् सर्वभृद्भूतभावनः

Branch 30A: Smṛiti (16) Vṛddha Hārīta Smṛiti

Ending:

तदेव हि मया राजन् वैशिष्येण तवेरितम्
विशिष्टं परमं धर्मशास्त्रं वैष्णवमुत्तमम् ३४३
य इदं शृणुयाद्भक्त्या कथयेद्वा समाहितः
पारमैकान्त्य संसिद्धिं प्राप्नोत्येव न संशयः ३४४
सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम्
यस्त्विदं शृणुयाद्भक्त्या नित्यं विष्णोश्च सन्निधौ ३४५
अश्वमेधसहस्रस्य फलं प्राप्नोत्यसंशयः
हारीतमेतच्छास्त्रन्तु परमां धर्म्मसंहिताम् ३४६
आलोक्य पूजयन् विष्णुं पारमैकान्त्यमश्नुते
एतच्छ्रुत्वाम्बरीषस्तु हारीतोक्तिं नृपोत्तमः ३४६
ववन्दे परया भक्त्या तमृषिं वैष्णवोत्तमः
त्वमेव परमोधर्म्मस्त्वमेव परमं तपः ३४७
त्वदङ्घ्रियुगलं प्राप्य सर्वसिद्धिमवाप्नुयाम्
महामुनिमिति स्तुत्वा राजर्षिः स महातपाः ३४७
प्राप्तवान् परमैकान्त्यं तत्प्रसादात्सुसिद्धिदम्
वैशिष्ट्यं पारमैकान्त्यमेतच्छास्त्रं ममाव्ययम् ३४८
भारद्वाजादयः सर्वे नृपाश्च जनकादयः
योगिनः सनकाद्याश्च नारदाद्याः सुरर्षयः ३४९
वसिष्ठाद्या वैष्णवाश्च विश्वक्सेनादयः सुराः ।
एतच्छास्त्रानुसारेण पूजयामासुरच्युतम् ३५०
परमं वैदिकं शास्त्रमेतद्वैष्णवमुत्तमम् ।
ज्ञात्वैव परमैकान्ती पूजयेद्विष्णुमीश्वरम् ३५१
इति वृद्धहारीतस्मृतौ विशिष्टधर्म्मशास्त्रे वृत्यधिकारो नाम अष्टमोऽध्यायः
। समाप्ताचेयं वृद्धहारीतस्मृतिः

Reference: *Smṛti-Sandarbha* Vol. II, pp.994ff.

## Branch 30A: Smṛiti (17) Gautama Smṛiti
Structure: 22 Chapters
Beginning:

गौतम स्मृतिः श्रीगणेशाय नमः प्रथमोऽध्यायः अथाचारवर्णनम्
वेदो धर्ममूलं तद्विदाञ्च स्मृतिशीले दृष्टो धर्मव्यतिक्रमः साहसञ्च महतां न तु दृष्टोऽर्थोवरदौर्बल्यात्तुल्यबलविरोधे विकल्पः । उपनयनं ब्राह्मणस्याष्टमे नवमे पञ्चमे वा काम्यं गर्भादिः सङ्ख्यावर्षाणां तद्द्वितीयं जन्म । तद्यस्मात्स आचार्यो वेदानुवचनाच्च । एकादशद्वादशयोः क्षत्रियवैश्ययोः । आषोडशाद्ब्राह्मणस्यापतिता सावित्री द्वाविंशतेरा-जन्यस्य ह्यधिकाया वैश्यस्य । मौञ्जीज्यामौर्वीसौत्र्यो मेखलाः क्रमेण कृष्णरुरुवस्ताजिनानि वासांसि शाणक्षौमचीरकुतपाः सर्वेषां कार्पासञ्चाविकृतम् । काषायमप्येके । वार्क्षं ब्राह्मणस्य माञ्जिष्ठहारिद्रे इतरयोः वैल्वपालाशौ ब्राह्मणस्य दण्डावश्वत्थपैलवौ शेषे यज्ञिया वा सर्वेषामपीरिता यूपचक्राः सवल्कला मूर्द्धललाटनासाग्रप्रमाणाः । मुण्डजटिलशिखाजटाश्च । द्रव्यहस्त उच्छिष्टोऽनिधायाचामेद्द्रव्यशुद्धिः परिमार्जन प्रदाहतक्षणनिर्णेजनानि तैजसमार्त्तिकदायवतान्तवानां तैजसवदुपलमणिशङ्खशुक्तीनां दारुवदस्थिभूम्योरावपनञ्च भूमेश्चैलव-द्रज्जुविदलचर्मणामुत्सर्गोवात्यन्तोपहतानाम् । प्राङ्मुखउदङ्मुखोवा शौ-चमारभेत् । शुचौ देशआसीनो दक्षिणं बाहुं जान्वन्तरा कृत्वा यज्ञोपवीत्यामणिन्धनात् पाणी प्रक्षाल्यवाग्यतोहृदयंस्पृशंस्त्रिश्चतुर्वाप-आचा-मेद्भिः प्रमृज्यात्पादौ चाभ्युक्षेत्खानि चोपस्पृशेच्छीर्षण्यानि मूर्द्धानि च दद्यात् । सुप्त्वा भुक्त्वा क्षुत्वा च पुनः । दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्षणात् । प्राक्च्युतेरित्येके । च्युतेरास्रावविद्यान्निगिरन्नेव तच्छुचिः । न मुख्याविप्रुष उच्छिष्टं कुर्वन्ति ताश्चेदङ्गे निपतन्ति । लेपगन्धापकर्षणे शौचममेध्यस्य । तदद्भिः पूर्वं मृदा च मूत्रपुरीष-रेतोविस्त्रंसनाभ्यवहारसंयोगेषु च यत्र चाम्नायोविदध्यात् । पाणिना सव्यमुपसंगृह्याङ्गुष्ठमधीहि भोइत्यामन्त्रयेत गुरुः । तत्र चक्षुर्मनः पाणोपस्पर्शनं दर्भैः प्राणायामास्त्रयः पञ्चदशमात्राः प्राक्कूलेष्वासनञ्च ॐपूर्वा व्याहृतयः पञ्चसप्तान्ताः । गुरोः पादोपसंग्रहणं प्रातर्ब्रह्मानुवचनेचा-

Branch 30A: Smṛiti (17) Gautama Smṛiti

Ending:

वृषभोऽधिकोज्येष्ठस्य वृषभषोडशा ज्यैष्ठिनेयस्य समं वा ज्यैष्ठिनेयेन यवीयसां प्रतिमातृ वा स्ववर्गे भाग विशेषः । पितोत्सृजेत् पुत्रिका मनपत्योऽग्निं प्रजापतिञ्चेष्ट्वास्मदर्थमपत्यमिति संवाद्याभिसन्धिमा-त्रात्पुत्रिकेप्येकेषां तत्संशयान्नोपयेच्छेदभ्रातृकाम् । पिण्डगोत्रऋषि-सम्बन्धा ऋक्थं भजेरन् स्त्रीचानपत्यस्य बीजं वा लिप्सेत देवरवत्यन्यतोजातमभागम् । स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च भगिनीशुल्कं सोदर्याणामध्वं मातुः पूर्वञ्चैके । संसृष्टविभागः प्रेतानां ज्येष्ठस्य संसृष्टिनि प्रेते असंसृष्टी ऋक्थभाक् विभक्तजः पित्र्यमेव । स्वयमर्जितं वैद्योऽवैद्येभ्यः कामं भजेरन् । पुत्रा औरसक्षेत्रजदत्तकृत्रि-मगूढोत्पन्नापविद्धा ऋक्थभाजः कानीनसहोढपौनर्भवपुत्रिकापुत्रस्व-यन्दत्तक्रीता गोत्रभाजश्चतुर्थांशभागिनश्चौरसाद्यभावे ब्राह्मणस्य राजन्यापुत्रो ज्येष्ठोगुणसम्पन्नस्तुल्यांशभाक् ज्येष्ठांशहीनमन्यत् राजन्या वैश्या-पुत्रसमवाये स यथा ब्राह्मणीपुत्रेण क्षत्रियाच्चेत् शूद्रापुत्रोऽप्यनपत्यस्य शुश्रूषुश्चेल्लभेत वृत्तिमूलमन्तेवासविधिना सवर्णापुत्रोऽप्यन्यायवृत्तो न लभेतैकेषां श्रोत्रिया ब्राह्मणस्यान पत्यस्य ऋक्थं भजेरन् राजेतरेषां जडक्लीवौ भर्त्तव्यावपत्यं जडस्य भागार्हं शूद्रापुत्रवत्प्रति-लोमासूदकयोगक्षेमकृतान्नेष्वविभागः स्त्रीषु च संयुक्तास्वनाज्ञाते दशावरैः शिष्टैरूहवद्भिरलुब्धैः प्रशस्तं कार्यम् । चत्वारश्चतुर्णां पारगा वेदानां प्रागुत्तमास्त्रय आश्रमिणः पृथग्धर्मविदस्त्रय एतान् दशावरान् परिषदित्याचक्षते असम्भवे त्वेतेषामश्रोत्रियो वेदविच्छिष्टोविप्रतिपत्तौ यदाह यतोऽयमप्रभवो भूतानां हिंसानुग्रहयोगेषु धर्मिणां विशेषेण स्वर्गं लोकं धर्मविदाप्नोति ज्ञानाभिनिवेशाभ्यामिति धर्मो धर्मः

इति गौतमीये धर्मशास्त्रे एकोनत्रिंशत्तमोऽध्यायः

समाप्ता चेयं गौतमस्मृतिः

Reference: *Smṛti-Sandarbha* Vol. IV, pp.1879 ff.

## Branch 30A: Smṛiti (18) Yama Smṛiti

Structure: 78 Verses.

Beginning:

अथ यमस्मृतिः । श्रीगणेशायनमः । अथ प्रायश्चित्तवर्णनम् ।
अथातो ह्यस्य धर्मस्य प्रायश्चित्ताभिधायकम् ।
चतुर्णामपि वर्णानां धर्मशास्त्रं प्रवर्त्तते १
जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानशनच्युताः ।
विषप्रपतनप्रायशस्त्रघातच्युताश्च ये २
सर्वे ते प्रत्यवसिताः सर्वलोकवहिष्कृताः ।
चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन वा ३
उभयावसिताः पाक्पा येऽग्राम्यशरणच्युताः
इन्दुद्वयेन शुध्यन्ति दत्त्वा धेनुं तथा वृषम् ४
गोब्राह्मणहनं दग्धा मृतमुद्बन्धनेन च
पाशं तस्यैव छित्त्वा तु तप्तकृच्छ्रं समाचरेत् ५
कृमिभिर्व्रणसंभूतैर्मक्षिकाश्चोपधातितः
कृच्छ्रार्द्धं संप्रकुर्वीत शक्त्या दद्यात्तु दक्षिणाम् ६
ब्राह्मणस्य मलद्वारे पूयशोणितसम्भवे
कृमिभुक्तव्रणे मौञ्जीहोमेन स विशुध्यति ७
यः क्षत्रियस्तथा वैश्यः शूद्रश्चाप्यनुलोमजः
ज्ञात्वा भुङ्क्ते विशेषेण चरेच्चान्द्रायणं व्रतम् ८
कुक्कुटाण्डप्रमाणन्तु ग्रासञ्च परिकल्पयेत्
अन्यथाहारदोषेण न स तत्र विशुध्यति ९
एकैकं वर्द्धयेच्छुक्ले कृष्णपक्षे च ह्रासयेत्
अमावास्यां न भुञ्जीत एष चान्द्रायणोविधिः १०
सुरान्यमद्यपानेन गोमांसभक्षणे कृते
तप्तकृच्छ्रञ्चरेद्विप्रस्यत्पापस्तु प्रणश्यति ११
प्रायश्चित्ते ह्युपक्रान्ते कर्ता यदि विपद्यते
पूतस्तदहरेवापि इहलोके परत्र च १२
यावदेकः पृथक् द्रव्यः प्रायश्चित्तेन शुध्यति

Branch 30A: Smṛiti (18) Yama Smṛiti

Ending:

रोधने बन्धने चैव स्थापिते पुष्कले तथा
काष्ठे वनस्पतौ रोधसङ्कटे रज्जुवस्त्रयोः ६७
एतत्ते कथितं सर्वं प्रमादस्थानमुत्तमम्
यत्र यत्र मृता गावः प्रायश्चित्तं समाचरेत् ६८
दारुणा घातने कृच्छ्रं पाषाणैर्द्विगुणं भवेत्
अर्द्धकृच्छ्रन्तु खाते स्यात् पादकृच्छ्रन्तु पादपे ६९
शस्त्रघाते त्रिकृच्छ्राणि यष्टिघाते द्वयं चरेत् ७०
कृच्छ्रेण वस्त्रघातेऽपि गोघ्नश्चेति विशुध्यति
योवर्त्तयति गोमध्ये नदीकान्तारमन्तिके ७१
रोमाणि प्रथमे पादे द्वितीये श्मश्रु वापयेत्
तृतीये तु शिखा धार्या चतुर्थे सशिखं वपेत् ७२
न स्त्रीणां वपनं कुर्यात् न च सा गामनुव्रजेत्
न च रात्रौ वसेद्गोष्ठे न कुर्याद्वैदिकीं श्रुतिम् ७३
सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्
एवमेव तु नारीणां शिरसो वपनं स्मृतम् ७४
मृतकेन तु जातेन उभयोः सूतकं भवेत्
पातकेन तु लिप्तेन नास्य सूतकिता भवेत् ७५
चत्वारि खलु कर्माणि सन्ध्याकाले विवर्जयेत्
आहारं मैथुनं निद्रां स्वाध्यायञ्च चतुर्थकम् ७६
आहाराज्जायते व्याधिः क्रूरगर्भश्च मैथुने ।
निद्रा श्रियो निवर्त्तन्ते स्वाध्याये मरणं ध्रुवम् ७७
अज्ञानात्तु द्विजश्रेष्ठ वर्णानां हितकाम्यया ।
मया प्रोक्तमिदं शास्त्रं सावधानोऽवधारय ७८
इति यमप्रोक्तं धर्मशास्त्रं समाप्तम् ।

Reference: *Smṛti-Sandarbha* IV, pp.2083ff.

Branch 30B: Upasmṛiti (01) Kāśhyapa Smṛiti
Structure: 55 Verses (including some prose)
Beginning:

अथ काश्यपस्मृतिः

प्रायश्चित्तवर्णनम्

अथ काश्यपीयान् गृहस्थधर्मान् व्याख्यास्यामः

आहिताग्निः स्वदारनिरतोऽचाग्न्यग्निहोत्री स्नातामृतुकालगामी देवपितृमनुष्यभूतब्रह्मयज्ञानुसेवमानः एकद्वित्रिचतुर्णां ब्राह्मणान् कुर्वाणो व्रतनियमहोमजाप्यपरो मातृपितृभक्तो दारापत्यपोषकः शेषानुभोजी उपवासी त्रैवर्णिकमेदकसूतकान्नपरिहरमाणोऽलांगलवृत्तिः । तत्र च भूम्यपोढने वृक्षच्छेदने नास्यधर्मोभवति ।

कूपसेतुतडागविप्रदेवतायतनभेदने प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य चतस्र आहुतीर्जुहुयात् ।

इदं विष्णुरिति प्रथमा मानस्तोक इति द्वितीया स्ववासा इति तृतीया दंष्ट्राभ्यामिति चतुर्थीरत्यस्रपोढयेत् तस्यैव देवतायै पूर्णाहुतिं जुहुयात् ।

अथ गोबलीवर्दमहिषधूर्याविकहिंसावाप्तौ प्रायश्चित्तकामकारतामित्येके ।

दोग्धृदमनपर्यस्तपाषघट्टनघंटाभरणभूषणयोजन तैलमंडौषधभेषज्यत्रितयमाणे व्याप्तानामकामावाप्त्यै प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य सशिरक्षुरवपनं कृत्वा प्राजापत्यं कृच्छ्रमाचरेत् । चीर्णांते गां दद्यात् तिलधेनुं जलधेनुं चेतिकाश्यपः ।

अथ मृगमहिषगंडुकवराहशरभऋक्षसिंहव्याघ्रमंडूकशूकर मत्स्यग्राहशिशुमारादीनां वधेष्वहोरात्रं । चीर्णांते गां दद्यात् । मेष स त्रिरात्रं चीर्णान्ते हिरण्यं दद्यात् ।

अथ काकवलाकहंससारसकारण्डवचक्रवाकगृध्रश्येनखंजरीटटिट्टिभोलू- कशुक सारिकामयूरकाकमद्र कलविंककपोत कपिंजलादीनां वधेष्वहोरात्रं । चीर्णान्ते तिलान्दद्यात् ।

अथातः श्वजम्बूकविडालऋषभरक्षुवासतोष्ट्र शूद्रवधे त्रिरात्रं च प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य प्राजापत्यं कृच्छ्रं चरेत् । चीर्णान्ते सव्रीहीन् दद्यात् ।

कृकलाससर्पनकुलविडालगोजावधे त्रिरात्रं चीर्णान्ते लोहं दद्यात् ।

Branch 30B: Upasmṛiti (01) Kāśhyapa Smṛiti

Ending:

सप्त पौनर्भवा कन्या वर्जनीया कुलाधमाः ५
वाचा दत्ता मनोदत्ता कृतमंगलकौतुका
उदकस्पर्शका या च या च पाणिग्रहीतिका ६
अग्न्युपायं गता या च पुनर्वाह्यस्य वादिका
इत्येताः कश्यपप्रोक्ता दहेयुः कुलमग्निवत् ७
प्ररोहत्यग्निमादाय पादपानां कुलंमहत्
न हि पुनर्भवादीनां कुलं तस्य प्ररोहति ८
पिता वा यदि वा भ्राता माता वा यदिवेतरः
नरश्च कृतपापानां गति यां याति तां शृणु ९
मनिवर्ती यथा श्येनो गच्छत्येव यमालयं
एवं च नरकं याति कन्या अमृतकारका १०
पुनः सम्पद्यते नारी गतमात्मानमात्मनि
अस्थिमात्रं त्वचं भित्वा शुक्रं तेजोबलं तथा ११
शुद्धिं न ये प्रयच्छंति दुहितरं लोभमोहिताः
तेषां तु नरके घोरे याति वै सप्तमं कुलम् १२
गमनागमनायोगात् एवं शुक्रे विधीयते
एवं ज्ञात्वा युक्तकन्यां विंदेत स तत्कुलात् १३
नस्याद्दैवे च पित्र्ये च दासीस्यादथ संचिता
क्रयक्रीता तु सा दासी न सा पत्नी विधीयते १४
अग्निष्टोमातिरात्राणां शतं शतगुणी कृतम् ।
प्राप्नोति पुरुषोदत्वा होममंत्रै रलंकृताम् १५
यस्तु सात्यमधर्मेण पिता समर्पयेत् सुताम् ।
स प्रेत्य लभते स्थानं यथा दक्ष प्रजापतिः १६
इति काश्यप प्रणीतं धर्मशास्त्रं समाप्तम् ।

Reference: *Smṛti-Sandarbha* IV, pp.2485ff.

## Branch 30B: Upasmṛiti (02) Pulastya Smṛiti

Structure: 28 Verses.

Beginning:

अथ पुलस्त्यस्मृतिः । वर्णाश्रमधर्मवर्णनम् ।
कुरुक्षेत्रे महात्मानं पुलस्त्यमृषयोऽब्रुवन् ।
तांश्च धर्मान्प्रकारांश्च नो वद स्मार्तमागमम् १
एवं पृष्टः प्रत्युवाच सर्वांस्तान् पृच्छत ऋषीन् ।
पंचधा वास्थितं धर्मं शृणुध्वं द्विजसत्तमाः २
वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम् ।
वर्णाश्रमस्तृतीयस्तु गुणनैमित्तिकस्तथा ३
वर्णमेकं समाश्रित्य योऽधिकारं प्रवर्तते
वर्णधर्मः स विज्ञयो यथोपनयनं त्रिषु ४
यस्त्वाश्रयं समाश्रित्य पदार्थः संविधीयते
उक्त आश्रमधमस्तु भिक्षापिण्डादिकं तथा ५
उभयस्य निमित्तेन यो विधिः सम्प्रवर्तते
नैमित्तिकः सविज्ञेयः प्रायश्चित्तविधिर्यथा ६
ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः
उक्त आश्रमधर्मस्तु राजधर्मस्तु पञ्चमः ७
वर्णधर्मश्चतुर्णां यः आश्रमाणां तथैव च
द्वयोः साधारणो धर्मो यश्चासौद्वयशेषभाक् ८
इज्याध्ययनदानानि यथाशास्त्रं सनातनम्
ब्रह्म क्षत्रिय वैश्यानां सामान्यो धर्म उच्यते ९
याजनाध्ययने राज्ञो भूतानाञ्चाभिरक्षणम्
पाशुपाल्यं कृषिश्चैव वैश्यस्याजीवनं स्मृतम् १०
शूद्रस्य द्विजशुश्रूषा द्विजानामनुपूर्वशः
शूद्रा च वृत्तिस्तत्सेवा कारुण्यं कर्म तथैव च ११
गुरौवासोऽग्निशुश्रूषा स्वाध्यायो व्रत धारणि
त्रिकालस्नापिता भृत्यै गुरौ प्राणांतिकी स्थितिः १२
तदभावे गुरुसुते तथा सब्रह्मचारिण

Branch 30B: Upasmṛiti (02) Pulastya Smṛiti

Ending:

वनेवासः पयोमूलनीवारकणवृत्तिता १७
प्रतिग्रहनिवृत्तिश्च त्रिःस्नानं मौनधारणम्
देवतातिथिपूजा च धर्मोऽयं वनवासिनाम् १८
सर्वारंभपरित्यागो भैक्षान्नं वृक्षमूलता
निष्परिग्रहता द्रोहः समता सर्वजन्तुषु १९
प्रियाप्रियपरिष्वङ्गः सुखदुःखाविकारिता
स बाह्याभ्यन्तराशौचं नियमो व्रतकारिता २०
सर्वेन्द्रियसमाहारो धारणाध्याननित्यता
भावशुद्धिस्तथेत्येवं परिव्राड्धर्म उच्यते २१
अहिंसा सत्यवादश्च सत्यं शौचं दया क्षमा
वर्णिनां लिङ्गिनाञ्चैव सामान्यो धर्म उच्यते २२
स्वज्ञानं हृदि सर्वेषां धर्मोऽयं वर्णिलिङ्गिनाम्
अदृष्टार्थो द्विविधः प्रोक्तो दृष्टार्थश्चद्वितीयकः २३
उभयार्थस्तृतीयश्च न्यायमूलश्चतुर्थकः
उभयाव्यवहारश्च दंडधारणमेव च २४
तुल्यार्थानां विकल्पःस्यान्नयायमूलः प्रकीर्त्तितः
वेदे तु विदितो धर्मः स्मृतौ तादृश एव तु २५
अनुवाकः श्रुतिसूक्तं कार्यार्थमिति मानवाः
तदर्थश्च प्रयासोऽयं स च सेव्यः फलार्थिना २६
उक्तः पञ्च विधो धर्मः श्रेयोऽभ्युदयहेतुकः ।
पुरुषाणां यथायोगं सच सेव्यः फलार्थिना २७
सद्यस्तु प्रौढबालायामन्यथा वत्सराच्छचिः ।
प्रदाता यां त्रिरात्रेण दत्तायां पक्षिणी भवेत् २८
इति पुलस्त्यप्रोक्तं धर्मशास्त्रं समाप्तम् ।

Reference: *Smṛti-Sandarbha* IV, pp.2134ff.

## Branch 30B: Upasmṛiti (03) Nāradīya Manu Smṛiti

Structure: 20 Divisions.

Beginning:

नारदीयमनुस्मृतिः । श्रीगणेशाय नमः । अथादौ व्यवहारदर्शनविधिः ।
मनुः प्रजापतिर्यस्मिन्काले राज्यमबुभुजत् ।
धर्मैकतानाः पुरुषास्तदासन् सत्यवादिनः १
नष्टे धर्मे मनुष्येषु व्यवहारः प्रकल्पितः ।
द्रष्टाच व्यवहाराणां राजा दण्डधरः कृतः २
लिखितं साक्षिणश्चात्र द्वौ विधी सम्प्रवर्तितौ ।
सन्दिग्धार्थविशुद्ध्यर्थं द्वयोर्विवदमानयोः ३
सोत्तरोऽनुत्तरश्चैव स विज्ञेयो द्विलक्षणः
सोत्तरोऽभ्यधिको यत्र विलेखापूर्वकः पणः ४
विवादे सोत्तरपणे द्वयोर्यस्तत्र हीयते
स पणं स्वकृतं दाप्यो विनयं च पराजये ५
सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ६
कुलानि श्रेणयश्चैव गणाश्चाधिकृतो नृपः
प्रतिष्ठा व्यवहाराणां गुर्वेभ्यस्तूत्तरोत्तरम् ७
स चतुष्पाच्चतुःस्थानश्चतुःसाधन एव च
चतुर्हितश्चतुर्व्यापी चतुष्कारी च कीर्त्यते ८
अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च
त्रियोनिर्द्व्यभियोगश्च द्विद्वारो द्विगतिस्तथा ९
धर्मश्च व्यवहारश्च चरित्रं राजशासनम्
चतुष्पाद्व्यवहारोऽयमुत्तरः पूर्वबाधकः १०
तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु
चरित्रं पुस्तकरणे राजाज्ञायां तु शासनम् ११
सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते
चतुर्णामाश्रमाणां च रक्षणात्सचतुर्हितः १२
कर्तॄनथो साक्षिणश्च सभ्यान्राजानमेव च

Branch 30B: Upasmṛiti (03) Nāradīya Manu Smṛiti

Ending:

सोपवासश्च खादेत देवब्राह्मणसंनिधौ ३८
विषं वेगक्लमापेतं सुखेन यदि जीर्यते
विशुद्धमिति तं ज्ञात्वा राजा सत्कृत्य मोक्षयेत् ३९
त्वं विष ब्रह्मणः पुत्रः सत्यधर्मरतौ स्थितः
शोधयैनं नरं पापात्सत्येनास्यामृतीभव ४०
कोशः
अतः परं प्रवक्ष्यामि कोशस्य विधिमुत्तमम् ४१
पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च
सशूकस्याव्यसनिनः कोशपानं विधीयते ४२
यद्भक्तः सोऽभियुक्तः स्यात्तद्दैवत्यं तु पाययेत्
सप्ताहाद्यस्य दृश्यते द्विसप्ताहेन वा पुनः
प्रत्यात्मिकं तु यत्किंचित् सैव तस्य विभावना ४३
द्विसप्ताहात्परं यस्य महद्वा वैकृतं भवेत्
नाभियोज्यः स विदुषां कृतकालव्यतिक्रमात् ४४
महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते
नास्तिकव्रात्यदासेषु कोशपानं विवर्जयेत् ४५
यथोक्तेन विधानेन पञ्च दिव्यानि धर्मवित् ।
ददद्राजाभिशस्तेभ्यः प्रेत्य चेह च नन्दति ४६
न विषं ब्राह्मणे दद्यान्न लोहं क्षत्रियो हरेत्
न निमज्जयाप्सु वश्यश्च शूद्रः कोशं न पाययेत् ४७
वर्षासु न विषं दद्यात् हेमन्ते नाप्सु मज्जयेत्
न लोहं हारयेद् ग्रीष्मे न कोषं पाययेन्निशि ४८
इति पञ्च दिव्यानि ।
समाप्तैषा नारदीयमनुस्मृतिः ।

Reference: *Smṛti-Sandarbha* I, pp.250ff.

# Branch 30B: Upasmṛiti (04) Viśhvamitra Smṛiti

Structure: 8 Chapters.

Beginning:

विश्वामित्रस्मृतिः । अथ प्रथमोऽध्यायः ।
नित्यनैमित्तिककर्मणांवर्णनम् ।
सहस्रदलपङ्कजे सकलशीतरश्मिप्रभे ।
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ॥
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं ।
स्मरेच्छिरसिपावनं तदविधानपूर्वं गुरुम् १
आह्निकम् ।
चतुःपञ्चघटीमानं मुहूर्तं ब्रह्मसंज्ञितम् ।
पञ्चपञ्चघटी ज्ञेया उषःकाल इतीष्यते २
ऋतुबाणघटीमानमरुणोदयसंज्ञितम् ।
उषः पञ्चघटीमानं प्रातःकाल इति स्मृतः ३
एवं ज्ञात्वां प्रभाते तु नित्यक्रम समाचरेत्
नित्यनैमित्तिके काम्ये कृते काले तु सत्फलम् ४
ब्राह्मे मुहूर्त उत्थाय कृत्वा शौचं समाहितः
स्नानं कुर्यादुषःकाले आत्मार्थमरुणोदये ५
प्रातःकाल जपं कुर्यान्नित्यनैमित्तिकं विदुः
रश्मिमन्तं समालोक्य उपस्थानं समाचरेत् ६
सन्ध्यायां मुख्यकालातिक्रमे दोषः
कालातीतं न कर्तव्यं कर्तव्यं कालसंयुतम्
तस्मात्सर्वप्रयत्नेन काले कर्म समाचरेत् ७
उक्तकाले तु यत्कर्म प्रमादादकृतं यदि ८
त्रिसहस्रजपं कुर्यात्प्रायश्चित्तं विधीयते
तथा प्रोक्तं प्राणायामद्वयत्रिकम् ९
अथवा जपमात्रेण कालातीतेन दोषभाक्
त्रिसहस्रं सहस्रं वा त्रिशतं शतमेव वा १०
अनुलोमविलोमाभ्यां जप्त्वादपाप क्षयो भवेत्

Branch 30B: Upasmṛiti (04) Viśhvamitra Smṛiti

Ending:

गोत्रपान्नं भवत्येव वृथा श्राद्धं न संशयः
नित्यश्राद्धे गयाश्राद्धे तीर्थश्राद्धे तथैव च ७४
वैश्वदेवं हुनेदादौ ततः श्राद्धं समाचरेत्
स्वाहाकारेण हुत्वादौ स्वधाकारेण वै ततः ७५
एवं होमत्रयं कृत्वा ततः श्राद्धं समाचरेत्
वैश्वदेवविषयेः
हविष्यमन्तं घृतसङ्कुलं च वह्नौ समांशं जुहुयात्त्रियामम्
द्वयोत्तरं त्रिजतियुग्मसंज्ञं ओंकारमादौ प्रतिमन्त्रयुक्तम् ७६
रसयुक्तं हविष्यं स्याद्धृतयुक्तं तथोदनम्
ब्राह्मणो वैश्वदेवार्थं कुर्यान्नित्यमतन्द्रितः ७७
अन्यस्य चेद्रसं त्यक्त्वा वैश्वदेवं करोति यः
देवेभ्यश्शापमाप्नोति दरिद्रो भवति ध्रुवम् ७८
सुपक्वं रससंयुक्तं राजान्नं घृतसंयुतम्
तद्धविष्यमिति ज्ञातं सुप्रीतास्त्रिदशादशः ७९
पर्वद्वये समायोगे
श्राद्धान्ते वैश्वदेवाय पाकं कृत्वाप्रयत्नतः ८०
हुत्वा दत्वा च भुक्त्वा च द्विजश्चान्द्रायणं चरेत्
देवानां च ऋषीणां च पितृणां च विशेषतः ८१
पर्यायेण प्रदातव्यं श्राद्धकाले हविर्द्विजैः ।
देवर्षिपितृतुष्ट्यर्थमेकपाको विधीयते ८२
पृथक्पाको न कर्तव्यः कृतश्चेत्पतितो भवेत् ।
अकृत्वान्नं तु नैवेद्यं यः कुर्यात्क्रिमिसङ्कुलम् ८३
होमं कृत्वा प्रयत्नेन वैश्वदेवं प्रकल्पयेत् ।
इति विश्वामित्रस्मृतौ वैश्वदेव प्रकरणंनामाष्टमोऽध्यायः समाप्तम् ।

Reference: *Smṛti-Sandarbha* V, pp.2645ff.

## Branch 30B: Upasmṛiti (05) Devala Smṛiti

Structure: 90 Verses.

Beginning:

अथ देवलस्मृतिः । श्रीगणेशाय नमः । अथ प्रायश्चित्तवर्णनम् ।
सिन्धुतीरे सुखासीनं देवलं मुनिसत्तमम् ।
समेत्य मुनयः सर्वे इदं वचनमब्रुवन् १
भगवन्म्लेच्छनीता हि कथं शुद्धिमवाप्नुयुः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवानुपूर्वशः २
कथं स्नानं कथं शौचं प्रायश्चित्तं कथं भवेत् ।
किमाचारा भवेयुस्ते तदाचक्ष्व सविस्तरम् ३
देवल उवाच
त्रिशङ्कुं वर्जयेद्देशं सर्वं द्वादशयोजनम्
उत्तरेण महानद्या दक्षिणेन तु कीकटम् ४
प्रायश्चित्तं प्रवक्ष्यामि विस्तरेण महर्षयः ५
मृतसूते तु दासीनां पत्नीनां चानुलोमिनाम्
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनिकम् ६
अपेयं येन संपीतमभक्ष्यं चापि भक्षितम्
म्लेच्छैर्नीतेन विप्रेण अगम्यागमनं कृतम् ७
तस्य शुद्धिं प्रवक्ष्यामि यावदेकं तु वत्सरम्
चान्द्रायणं तु विप्रस्य सपरा कं प्रकीर्तितम् ८
पराकमेकं क्षत्रस्य पादकृच्छ्रेण संयुतम्
पराकार्धं तु वैश्यस्य शूद्रस्य दिनपञ्चकम् ९
नखलोमविहीनानां प्रायश्चित्तं प्रदापयेत्
चतुर्णामपि वर्णानामन्यथाऽशुद्धिरस्ति हि १०
प्रायश्चित्तविहीनं तु यदा तेषां कलेवरम्
कर्तव्यस्तत्र संस्कारो मेखलादण्डवर्जितः ११
म्लेच्छैर्नीतेन शूद्रैर्वा हारिते दण्डमेखले
संस्कारप्रमुखं तस्य सर्वं कार्यं यथाविधि १२
संस्कारान्ते च विप्राणां दानं धेनुश्च दक्षिणा

Branch 30B: Upasmṛiti (05) Devala Smṛiti

Ending:

पञ्चगव्यं च गोक्षीरं दधि मूत्रं घृतं पयः
प्राश्यापरेऽह्न्युपवसेत्कृच्छ्रं सांतपनं चरेत् ८१
पृथक्सांतपनं द्रव्यैः षडहः सोपवासकः
सप्ताहेन तु कृच्छ्रोऽयं महासांतपनः स्मृतम् ८२
पर्णोदुम्बरराजीवविल्वपत्रकुशोदकैः
प्रत्येकं प्रत्यहं पीतैः पूर्णकृच्छ्र उदाहृतः ८३
तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्
एकरात्रोपवासश्च तप्तकृच्छ्रस्तु पावनः ८४
एकभक्तेन नक्तेन तथैवायाचितेन तु
उपवासेन चैकेन पादकृच्छ्र उदाहृतः ८५
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्
द्वादशाहोपवासेन पराकः परिकीर्तितः ८६
पिण्याकशाकतक्राम्बुसक्तूनां प्रतिवासरम्
एकरात्रोपवासश्च कृच्छ्रः सौम्यः प्रकीर्तितः ८७
एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्
तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः ८८
तिथि वृद्ध्या चरेत्पिण्डाञ्छुक्ले शिख्यण्डसंमितान् ।
एकैकं ह्रासयेत्पिण्डान्कृच्छ्रचान्द्रायणं चरेत् ८९
यथाकथंचित्पिण्डानां चत्वारिंशच्छतद्वयम् ।
इति देवल कृतं धर्मशास्त्रं प्रकीर्तितम् ९०
समाप्तेयं देवलस्मृतिः ।

Reference: *Smṛti-Sandarbha* III, pp.1655ff.

## Branch 30B: Upasmṛiti (06)    Mārkaṇḍeya Smṛiti

Structure: 4000 Verses

Beginning:

अथ मार्कण्डेयस्मृतिः । तत्रादौ वर्णाश्रमधर्म वर्णनम्
मार्कण्डेयं ब्रह्मकल्पदर्शिनमेत्य ते
महात्मानः शौनकाद्याः सर्वज्ञमृषयोऽब्रुवन् १
भगवंस्त्वं बहुब्रह्मकल्पदर्शी विशेषवित्
अतस्त्वं सर्वदेवर्षिः योगियज्वाधिको मतः २
सर्ववर्णाश्रमाचारधर्माधर्मप्रवर्तकान् ।
जानासि कृतसंवादस्तैरत्यन्तं महात्मभिः ३
अनेकब्रह्मकल्पानां संप्रदायपरार्थगः ।
पुनर्वेदार्थतत्वज्ञः क्रियाकल्पविशेषवित् ४
इतिहासपुराणज्ञः स्मृतितत्त्वरहस्यगः
आपत्कालैककर्तव्यमर्त्यधर्मविभागवित् ५
दरिद्रसंपत्समयसदसत्कार्यनिर्णये
परिच्छेत्ता विशेषेण मुख्यामुख्यादितत्ववित् ६
तस्मात्त्वामधुना सर्वे संघीभूयाच्चिराद्वयम्
समालोच्यविधानेननिश्चित्य च पुनः पुनः ७
पृच्छामः सर्वधर्मांश्च कर्तव्यान्मोक्षसाधनान्
सर्ववर्णाश्रमकृते निःशेषयुगसंमतान् ८
अतस्त्वं कृपयास्मासु तान् सम्यग्वक्तुमर्हसि
इत्येवं स कृतप्रश्नः शौनकाद्यैर्महर्षिभिः ९
मार्कण्डेयो महाभागः सर्वदर्शी कृपामयः
तर्हि शृणुध्वमित्युक्त्वा स्मितपूर्वं वचोऽब्रवीत् १०
ब्रह्मादयोऽपि निखिलाः किंचिज्ज्ञा एव केवलम्
परं तु तत्र सर्वेषां रक्षोमर्त्या मृतान्धसाम् ११
तारतम्यं तस्य चैषां तद्भिन्नानां च सन्ततम्
अस्त्येव परमं तेन गुरुर्नोऽयं पितामहः १२
सर्वज्ञस्तु एवैको भगवान् भूतभावनः

Branch 30B: Upasmṛiti (06) Mārkaṇḍeya Smṛiti

Ending:

सगुणं शास्त्रविहितं तेन मुक्तिं प्रपद्यते
अनन्तास्तद्गुणाः सन्तु ते त्वसाध्याः स्मृताः सदा ॥
अनुष्ठातुर्मतश्चेमे मुख्याः केचन तान् ब्रुवे
स्वस्वपत्नीज्ञातिबन्धुकृतान्नेन कृतं यदि ॥
पित्रोः श्राद्धं समीचीनकृतं साद्गुण्यमृच्छति
अकृतं चेत्तथा तत्तु -- पुरोक्तवत् ॥
तदन्यथा चेत्पतितः सद्य एव भवेद्ध्रुवम्
स्वशब्देनाखिलाः ह्प्रोक्ताः कर्तारो भ्रातरः स्वयम् ॥
पत्नीशब्देन तत्पत्न्यो निखिलाः प्रतिपादिताः
ज्ञातिशब्देन जननी पित--- का --- का स्मृताः
पितृव्यपत्नी तद्धर्मभागिन्यश्चापि कीर्तिताः ॥
बन्धुशब्देन भगिनी पितृष्वसृसुतादिकाः
कन्या सं पितृश्राद्धं भिन्नभावेषु सर्वथा
न कुर्यादेव धर्मेण यथा तथा ह
--- प्रदानं तत्र कीर्तितम् ॥
द्वितीयमयं तेन तुल्यं ब्राह्मण भोजनम्
तृतीयं च तथा कर्म पिण्डदानं ततः परम् ।
एतत्त्रयं श्राद्धशब्दशब्दितं पुनरेककम् ॥
तादृशे कर्मणि पुनः --- तत्पात्रे हुतशेषान्नपातनम् ।
तत्तुल्यं तत्प्रोच्चरणं च तथा तत्स्पार्शनी कृतिः ।
संप्रदानं भोक्तृहस्ते तदापोशनपा ॥
-----श्राद्धं परेऽहनि ।
कर्तृहस्ताकृते तस्मिन् आपोशनजले यदि ॥
इति श्रीमार्कण्डेयस्मृतौ श्राद्धाख्यं प्रकरणं समाप्तम् । शुभम्भूयात् ।

Reference: *Smṛti-Sandarbha* VI, p. 1 ff.

## Branch 30B: Upasmṛiti (07) Ṛiśhyaśhṛiṅga Smṛiti

Structure: Two divisions, a total of 104 Chapters.

Beginning:

ऋृश्यशृंगसंहिता । श्री गणपतये नमः । श्री साम्बशिवाय नमः ।
वागीशाद्याः सुमनसस्सर्वार्थानामुपक्रमे
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् १
श्री जानकीश पादाब्जदृढभक्तं जितेन्द्रियम्
विभण्डक सुतं शान्ताभर्तारं तपसां निधिम् २
सिद्धाश्रमे समासीनमृश्यशृङ्गमकल्मषम्
उद्दालक उदङ्कश्च मौद्गल्यां गाळवस्तथा ३
गौतमस्यसुतः साक्षाच्छतानन्दो महातपाः
तीर्थयात्राप्रसङ्गेन सिद्धाश्रममुपागताः ४
तत्र सिद्धाश्रमे पुण्यतीर्थे स्नात्वा तपस्विनः
ऋृश्यशृङ्गं तपोराशिमपश्यन् वीतकल्मषाः ५
योगारूढं महात्मानं ज्वलन्तं तपसा मुनिम्
दृष्ट्वा प्रणेमुस्साष्टाङ्गं कृताञ्जलिपुटाद्विजाः ६
तान्दृष्ट्वा योगिवर्योऽसौ शान्ताभर्तामहातपाः
पृष्ट्वा कुशलमव्यग्रमासनेषूप वेशयत् ७
मौद्गल्योद्दालकोदङ्कशतानन्दा दयोद्विजाः
आसीना आसनेष्वेते विभण्डकसुतं विभुम् ८
धर्मजिज्ञासया वाक्यमिदं प्रोचुस्तपोधनाः
ऋृषय ऊचुः
विभन्डकसुत स्वामिन् सर्वज्ञ तपसांनिधे ९
अस्माभिर्यत्र यत्तप्तं सर्वं सफलमद्यमे
धर्मलोकं गता अद्य पितरो नः पितामहाः १०
अद्यास्माभिर्महाभाग्यं लब्धं त्वत्पाददर्शनात्
अथधन्याः कृतार्थाः स्म व्रतानि सफलानिनः ११
त्वत्पदाम्भोरुहद्वन्द्वदर्शनं पुण्यराशिभिः
बहुजन्मार्जितैर्लभ्यं नान्यथा तपसां निधे १२

Branch 30B: Upasmṛiti (07) Ṛśhyaśhṛīṅga Smṛiti

Ending:

देशिकं शास्त्रवक्तारमसम्पूज्य विमूढधीः ३२
क्रियाहानिमवाप्नोति कार्यसिद्धिं न विन्दति
यः पूजयति वक्तारं शास्त्रस्यास्य महात्मनाः
शाश्वतं यदवाप्नोति पुनरावृत्तिवर्जितम् ३३
कुटुम्बवृद्धिं धनधान्यवृद्धिं सौभाग्यवृद्धिं च शुभानि नित्यम्
अवाप्य शास्त्रश्रवणेन पश्चात् परं पदं याति रमाधिवासम् ३४
ऋष्यशृङ्ग उवाच
इत्युक्तं गिरिजादेव्यै शिवेन परमात्मना
चित्कलामनुमाहात्म्यमारभ्यैतद्रहस्यकम् ३५
पूर्वं नारायणेनोक्तमुत्तरं शङ्करेरितम्
तन्त्रं दाशरथीयाख्यं वेदसारार्थ संग्रहम् ३६
अत्रैकमपि वाऽध्यायमर्थज्ञान पुरस्सरम्
पठेद्यः शृणुयाद्वापि विमुक्तः पापराशिभिः ३७
प्रयाति परमं धाम सनातनमनुत्तमम्
ऋष्यशृङ्गमुखाम्भोजात् श्रुत्वैतत्परमर्षयः ३८
मत्वाऽऽत्मानं परं ब्रह्म रामं नारायणं विभुम् ।
ऋष्यशृङ्गं समाभाष्य ज्ञात्वा धर्मरहस्यकम् ३९
कृतकृत्यास्ततो जग्मुः स्वाश्रमान्मुदिताननाः ।
इदं तन्त्रं महद्गुप्तं तारक ब्रह्मरूपिणा ।
जानकी पतिना प्रोक्तं जगदानन्दहेतुकम् ४०
इति श्रीमदनुत्तर ब्रह्मतत्वरहस्ये दाशरथीये तन्त्रे वेदसारार्थसंग्रहे
सौभाग्यविद्योदये राजराजविद्या माहात्म्ये उत्तरभागे शास्त्ररहस्यकथनं नाम
पञ्चचत्वारिंशोऽध्यायः समाप्तः ॥
श्रीगोविन्दाय नमः । श्रीरामचन्द्राय नमः ।

Reference: Rāmānuja Tātāchārya, *Ṛishyasringa Samhita, Edited with Introduction*, 2 vols., (Thanjavur: Sarasvati Mahal Library, 1983).

## Branch 30B: Upasmṛiti (08) Āśhvalāyana Smṛiti

Structure: 24 Chapters.

Beginning:

अथ लघ्वाश्वलायनस्मृतिः ।
श्रीगणेशाय नमः ।
प्रथमोऽध्यायः ।
तत्र प्रथममाचारप्रकरणवर्णनम् ।
आश्वलायनमाचार्यं नत्वाऽपृच्छन्मुनीश्वराः
द्विजधर्मान्विदास्माकं स्वर्गप्राप्तिकरान्मुने
इति तद्वचनं श्रुत्वा स धर्मान्मुनिरब्रवीत् १
धर्मान्वः पुरतो वक्ष्ये ध्यात्वाऽहं भो मुनीश्वराः
लोकस्य च हितार्थाय ब्रह्ममार्गरतस्य च २
स्नानं सन्ध्या जपो होमः स्वाध्यायाभ्यसनं तथा
माध्याह्निकी क्रिया पञ्चयज्ञाद्यतिथिपूजनम् ३
दानशिष्टप्रतिग्राहौ पोष्यवर्गैः सहाशनम्
सत्कथाश्रवणं सायंसंध्याहोमादिकं च हि ४
शयनं च यथाकाले धर्मपत्न्या सह गृही
ब्रह्मचारी स्वधर्मस्थो गुरुसेवापरो वसेत् ५
यजनं याजनं चैव वेदस्याध्ययनं च हि
अध्यापनं तथा दानं प्रतिग्रहमिहोच्यते ६
एतानि ब्राह्मणः कुर्यात्षट्कर्माणि दिने दिने
अतः प्रातः समुत्थाय चिन्तयेदात्मनो हितम् ७
निर्गुणं निरहंकारं नारायणमनामयम्
सगुणं च श्रिया युक्तं देवं देवीं सरस्वतीम् ८
यथाविधि ततः कुर्यादुत्सर्गं मलमूत्रयोः
ब्रह्मचारी गृहस्थश्च शौचमद्भिर्मृदाऽऽचरेत् ९
एका लिङ्गे करे तिस्रः करयोर्मृद्द्वयं गुदे
पञ्च वामे दश प्रोक्ताः करे सप्ताथ हस्तयोः १०
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः

Branch 30B: Upasmṛiti (08) Āśhvalāyana Smṛiti

Ending:

पितृमानेव भुञ्जीयाच्छ्राद्धमिन्दुक्षये द्विजः
तृप्ताः स्युः पितरस्तेन दाता स्वर्गमवाप्नुयात् २१
श्राद्धकर्ता न भुञ्जीयात्परश्राद्धे विधुक्षये
भुङ्क्ते चेत्पितरो यान्ति दाता भोक्ताऽप्यधोगतिम् २२
दर्शेष्टिका व्यतीपातो वैधृतिश्च महालयः
युगाश्च मनवः श्राद्धकालाः संक्रान्तयस्तथा २३
गजच्छायोपरागश्च षष्ठी या कपिला तथा
अर्धोदयादयश्चैव श्राद्धकालाः स्मृता बुधैः २४
संभूते च नवे धान्ये श्रोत्रियो गृहमागते
आचार्याः केचिदिच्छन्ति श्राद्धं तीर्थं च सर्वदा २५
श्राड्धकालेषु सर्वेषु कुर्याच्छ्राद्धं च शक्तितः
विशेषतो मृताहे तु पित्रोश्चैव विधीयते २६
मोहान्न कुरुते श्राद्धं मातापित्रोर्मृतेहऽनि
निराशाः पितरो यान्ति दुर्गतिं चापि वै सुतः २७
अज्ञानाद्वा प्रमादाद्वा यो मृताहमतिक्रमेत्
स याति नरकं घोरं यावदाभूतसंप्लवम् २८
अतिक्रमं मृताहस्य दोषः स्यात्सूतकं विना
न कुर्याच्छ्राद्धमाशौचे प्रवदन्ति महर्षयः २९
आचरेद्विधिवच्छ्राद्धं मातापितोर्मृतेऽहनि
पितरस्तेन तृप्यन्ति गच्छन्ति पदमुत्तमम् ३०
सदाचारपरो विप्रः कृपालुः श्राद्धकृत्तथा
आत्मनिष्ठोऽर्थलोकेषु तारयेत्तरति स्वयम् ३१
इत्याश्वलायनधर्मशास्त्रे श्राद्धोपयोगिप्रकरणम्
समाप्तेयं लघ्वाश्वलायनस्मृतिः ।

Reference: *Smṛti-Sandarbha* III, pp.1683ff.

Branch 30B: Upasmṛiti (9) Narāyaṇa Smṛiti
Structure: 9 Chapters.
Beginning:
नारायणस्मृतिः । प्रथमोऽध्यायः । नारायणदुर्वाससोःसम्वादः ।
एकदा नैमिषारण्ये ब्रह्मर्षिगणसेविते ।
नारायणो महायोगी दूर्वाससमपृच्छत १
भगवन् मुनिशार्दूल सर्वधर्मभृतांवर ।
काले कलियुगे पुण्यधर्मे लुप्ते भुवस्स्थले २
सर्वपापप्रशमनी प्रायश्चित्तविधिः कथम् ।
पापाः कतिविधाः प्रोक्ता विस्तरेण वदस्व मे ३
दुर्वासा उवाच
नारायण महायोगिन् शृणु विस्तरतो मम
कृते युगे चतुष्पादो धर्मो वर्द्धति वर्द्धति ४
त्रेतायुगे तु सम्प्राप्ते पादहीनो भवेद्वृषः
द्वापरे समनुप्राप्ते द्विपादाभ्यां वृषस्थितः ५
ततः कलियुगे प्राप्ते पादेनैकेन तिष्ठति
ततः कृतो युगःश्रेष्ठो मध्यमस्तदनन्तरम् ६
अधमो द्वापरयुगः कलिस्स्यादधमाधमः
कृते कृते युगे पापे तद्देशं संपरित्यजेत् ७
त्रेतायां ग्राममात्रं तु द्वापरे कुलमुसृजेत्
कलौ युगे विशेषेण कर्त्तारं तु परित्यजेत् ८
कृतत्रेताद्वापरे तु मरणान्तादिनिष्कृतिः
कलौ युगे तु सम्प्राप्ते मरणान्ता न निष्कृतिः ९
पापा नवविधाः प्रोक्ताः सावधानतया शृणु
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः १०
य एतैस्सह संयोगी महापातकिनस्त्विमे
अतिदेशादमीषां यदातिदेशिकमुच्यते ११
एतत्प्रकाशपापानां रहस्यानाम् तथैव च
गोवधादिकमेनोयदुपातकमुच्यते १२

Branch 30B: Upasmṛiti (9) Narāyaṇa Smṛiti

Ending:

तात ते कथयाम्यद्य शृणु वात्सल्यगौरवात् २
अत्यन्तार्त्तो यदि ब्रह्मन् अधनः कलिवर्ज्यकृत्
शरणं यदि संप्राप्तः प्रायश्चित्तमिदं वदेत् ३
सशिखं वपनं कृत्वा नित्यकर्मपरायणः
पुण्यतीर्थे ह्रदे वाऽपि पुष्करिण्यामथाऽपिवा ४
आकण्ठजलसम्मग्नः प्राङ्मुखस्त्वघमर्षणम्
शिरस्यञ्जलिमाधाय जप्त्वा स्नानं समाचरेत् ५
पुनर्जप्त्वा पुनस्स्नात्वा पुनजपमथाचरेत्
एवं मध्याह्नपर्यन्तं प्राङ्मुखस्स्नानमाचरेत् ६
माध्याह्निकं ततः कृत्वा समाराध्येष्टदेवताम्
ततः प्रत्यङ्मुखो भूत्वा पूर्ववत्स्नानमाचरेत् ७
सायाह्ने समनुप्राप्ते तटमुत्तीर्य वाग्यतः
न संमृजेच्छरीराणि वाससा वाऽपिपाणिना ८
फलाष्टकप्रमाणेन तण्डुलेनहतिः पचेत्
गोमूत्रे विनिवेद्यैव हरये परमात्मने ९
तदेव भुक्त्वा साहाह्ने स्वपेद्वै दक्षिणाशिरः
एवं षण्मासकृद्विप्रः पूर्ववत् च्छुद्धिमाप्नुयात् १०
ततो गङ्गाजले स्नात्वा सेतुदर्शनमेव वा
कृत्वा ततः पुनः कर्म कृत्वा शुद्धिमवाप्नुयात् ११
स्वकर्मपरकर्मार्हो भवेदेव न संशयः
एवं सम्यक् समादिष्टं श्रुत्वा नारायणो मुनिः १२
विच्छिन्नसंशयो भूत्वा परमानन्दनिर्भरः
मेरुपृष्ठमुपागम्य तपश्चर्तुं ययौ मुनिः १३
इति श्रीनारायणस्मृतौ कलौवर्ज्यकर्मप्रायश्चित्तवर्णनं नाम नवमोऽध्यायः ।

Reference: *Smṛti-Sandarbha* V, pp.2770ff.

## Branch 30B: Upasmṛiti (10) Bhāradvāja Smṛiti
Structure: 19 Chapters.

Beginning:

भारद्वाजस्मृतिः । प्रथमोऽध्यायः ।
भारद्वाजम्प्रति भृग्वादिमुनीनां सन्ध्यादिप्रमुखकर्मविषये प्रश्नः ।
हेमाद्रिशिखरे रम्ये सुखासीनं महाजनम्
भरद्वाजं मुनिश्रेष्ठं सर्वविद्यातपोनिधिम् १
पुरायकृतिं पुरायशीलं ब्रह्मनिष्ठं जितेन्द्रियम्
तमासाद्य मुनिश्रेष्ठः भृग्वाद्या मुनिपुङ्गवाः २
भृगुरत्रिर्वशिष्ठश्च शारिडल्यो रोहितः क्रतुः
हरितो गौतमो गर्गः शङ्खः कालातपोऽङ्गिराः ३
मार्करडेयश्च मारडव्यः कपिलो नारदः शुकः
जमदग्निर्याज्ञवल्क्यो विश्वामित्रः पराशरः ४
एते वाऽन्येऽपि मुनयो धर्मज्ञा धर्मतत्पराः
सर्वोपचारैः सम्पूज्य वचनञ्चेदमब्रुवन् ५
भगवन्सर्वधर्मज्ञ सर्ववेदार्थपारग
सर्वशास्त्रार्थतत्त्वज्ञ सर्वसत्कर्मकोविद ६
सन्ध्यादि प्रमुखाः सर्वा नित्यनैमित्तिकाः क्रियाः
यास्ता द्विजादिभिः कार्या कथन्नो वक्तुमर्हसि ७
इति वृष्टो भरद्वाजस्तैर्महामुनिभिर्मुनिः
तान्प्रत्युवाच धर्मात्मा सन्तुष्टहृदयो भृशम् ८
पृष्टा युष्माभिरधुना याः क्रियास्ता महर्षिभिः
यथा क्रमेरा कथ्यन्ते सन्ध्याप्रणतिपूर्विकाः ९
नित्यानुष्ठानरहितैर्द्विजैरधिकृतागमाः
यज्ञाः क्रतुश्च विधिवन्न भवन्ति फलप्रदाः १०
तस्मात्सर्वप्रयत्नेन शुचिर्भूत्वा द्विजोत्तमः
अनुष्ठानम्प्रकुर्वीत प्रत्यहं शास्त्रचोदितम् ११
धर्मशास्त्रेषु सर्वेषु समस्तेष्वागमेषु च
सारमुद्धृत्य वक्ष्यामि शृणुध्वमृषयोऽनघाः १२

Branch 30B: Upasmṛiti (10) Bhāradvāja Smṛiti

Ending:

व्याहृतीनामथैतस्मिन्पुरश्चर्याविधिं पुरः
शक्त्यर्थमन्यथाशक्तिर्न पुरश्चरणं विना ३९
तस्मात्पुरश्चरेद्धीमान् अथ कर्म समाचरेत्
कर्माणीष्टानि सिध्यंति सत्यं तस्याग्रजन्मनः ४०
त्रिस्नानं ब्रह्मचर्यं च वसुधाशयनं चरेत्
जपेद्द्वादशसाहस्रं उपवासत्रयं द्विजः ४१
अशक्तोयस्त्वहोरात्रं वोपोष्याभिहितं जपेत्
अपुरश्चरणं ह्येतदिष्टानर्थान्यथाऽऽचरेत् ४२
ब्रह्मवर्चसकामश्चेत्सहस्रं ब्रह्मभूरुहाम्
सरधाक्तौरदध्यक्ताः समिधो जुहुयाल्लभेत् ४३
तेजस्कामस्तथाऽऽज्येन धान्यकामस्तु शालिभिः
क्षीरेण पशुकामस्तु पुत्रकामो वदेन्धनैः ४४
शांतिकामःशमीकाष्ठैः अर्थकामोर्कतर्पणैः
रक्षोविनाशनार्थीचल्लाजैरपिति वैरपि ४५
दुःस्वप्नपापनाशार्थी पापी सद्यो विनश्यति
प्रक्षिप्याभिभ्रातृकामः पुत्रार्थी पिप्पलेन्धनैः ४६
अपामार्गैरैश्वर्यकामः श्रीकामी यः पलाशकैः
सुधर्मा प्रियकामस्तु सर्वद्रव्याण्यनुक्रमात् ४७
सहस्रसंख्यया होमः ततइष्टं प्रयच्छति ।
तस्माद्विप्रपुरश्चर्यासम्यग् कृत्वार्थहावयेत् ४८
किमप्यसाध्यमेताभिः व्याहृतीभिर्न जातुचित् ।
तस्मादेताः समाश्रित्य साधयेत्सकलं द्विजः ४९
इति श्रीभारद्वाजस्मृतौ व्याहृतिविधानं नाम ऊनविंशोऽध्यायः ।
ॐ तत्सद् ब्रह्मार्पणमस्तु ।

Reference: *Smṛti-Sandarbha* V, pp.3085ff.

## Branch 30B: Upasmṛiti (11) Lohita Smṛiti

Structure: 721 Verses.

Beginning:

लोहितस्मृतिः । विवाहाग्नौस्मार्तकर्मविधानवर्णनम् ।
लोहितं सर्ववेदान्ततत्त्वज्ञं न्यायवित्तमाः
सामान्यज्ञानसंजातसंशयास्सर्व वस्तुषु १
विशेषं परिपप्रच्छुः भार्यापुत्रधनादिषु
स्मार्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहंगृही २
इत्यत्र विद्यमानोऽग्नि शब्दोऽयं संशयास्पदम्
प्रधानलाजहोमाग्निः विवाहाग्निरितिस्मृतः ३
सोऽयं नित्यत्वधार्यत्वविहितो हि यतो मतः
विवाहपचनाग्निश्चेत्प्रकृतेन समञ्जसः ४
तस्योत्तरत्र कार्येषु विनियोगैकशून्यतः
प्रधानहोमाग्नौ तत्र पुनस्संशय ऐककः ५
आद्याग्नौ वा द्वितीयाग्नौ तृतीयाद्यनलेऽपि वा
अथ वा स्याच्चतुर्थाग्नौ पञ्चमाग्नौ न चेत्तथा ६
सर्वत्रैवाविशेषेण कुर्वीत प्रत्यहं गृहीः
एवं पुनस्तथा पश्चात्द्वित्रियाद्यनलेषु वा ७
केन द्रव्येण भूयश्च कथं मन्त्राश्च के पुनः
इत्येवं संशये जाते निश्चयं वच्मि वोऽद्य तु ८
बहुभार्यस्यौपासनादौ विशेषः
ब्रह्मचर्यनिवृत्तिस्सा यस्यास्समुदपद्यत
धर्मपत्नी सैव लोके कथिता तत्समा च सा ९
भर्तुरर्धशरीरा च सर्वधर्मसमाश्रया
तद्विवाहसमुद्भूतो वह्निर्निखिलकर्मणाम् १०
मन्त्रपूतो वेदजन्यः सर्वयागैकसाधकः
स एव हि प्रधानाग्निः ब्राह्मणस्यमहात्मनः ११
द्वितीयाद्यग्नयः शिष्टाः दुर्बलास्तत्समान तु
न ते वैदिककृत्यस्य तूष्णीका एव केवलम् १२

Branch 30B: Upasmṛiti (11) Lohita Smṛiti

Ending:

विद्याविहीनं पिशुनं पामरं पापचेतसम् ७१०
यत्नेन राजा निश्चित्य कालेन महता शनैः
जनवाक्येन महतां चर्यया भाषणे न च ७११
पूर्वोक्तान् शिक्षयेत्सम्यक् सत्पथे विनिवेशयेत्
तस्योपायांश्च वक्ष्यामि स्पष्टाय विशदाय च ७१२
स्वामिना स्वामिनं कार्यकाले तमिन्समागते
विवदन्तं समत्वेन सद्यस्सम्यक्प्रताडयेत् ७१३
अज्ञं सभायां विदुषा समत्वेनैव निर्भयम्
विवदन्तं धराधीशः सन्ताड्योद्वासयेद्बहिः ७१४
अश्रोत्रियं श्रोत्रियेण विवदन्तं सभास्वति
तूष्णीं विनैव मर्यादां दमं कुर्यात्तु हुङ्कृतेः ७१५
ग्रामे राष्ट्रे च सर्वत्र प्राधान्येन चिरात्सितान्
महात्मनो महाभागान् दुष्टान् केचन सङ्घशः ७१६
मिलित्वा तत्क्रिया पौर्वापर्यमर्यादया कृताः
यत्नादन्यथयन्तो वै नास्माकं सम्मतिः परा ७१७
इयमित्येव ये दुष्टा तान्सद्योनिर्दयं नृपः
एकदा भीषयेच्चेत्तु दण्डसङ्ग्रहणात्परम् ७१८
अनया निखिलाश्चापि सद्यश्शान्ता भवन्ति हि
अनयानामभावे तु लोकोऽयं सुखमश्नुते ७१९
लोको यदा सुखी राजा तदा सर्वान्मनोरथान्
अवशादेव लभते नात्र कार्या विचारणा ७२०
इतीदं कथितं शास्त्रं लोहितेन महात्मना
हितय सर्वलोकानां सारमुद्धृत्य शास्त्रतः ७२१
श्रीलोहितस्मृतिः समाप्ता

Reference: *Smṛti-Sandarbha* V, pp.2701ff.

## Branch 30B: Upasmṛiti (12) Vyāghrapāda Smṛiti

Structure: 396 Verses.

Beginning:

व्याघ्रपादस्मृतिः । तत्रादौ स्मृतिमहत्त्ववर्णनम् ।
ऋषिमेकान्तमासीनं व्याघ्रं मतिमतां वरम्
पप्रच्छुर्मुनयः सर्वे धर्मशास्त्रकथानकम् १
हुताग्निहोत्रं विधिवत् व्याघ्रं वेदविदां वरम्
सर्वशास्त्रविधिं ज्ञात्वा ऋषिभिश्चनमस्कृतम् २
नमस्कृत्य च ते सर्वे इदं वचनमब्रुवन्
हितार्थं सर्वलोकानां भगवन् कथयस्व नः ३
वेदतत्त्वार्थतत्त्वज्ञा यन्मां पृच्छथ संशये
ते सर्वे संप्रवक्ष्यामि यथादृष्टं यथाश्रुतम् ४
सर्वतीर्थान्युपस्पृश्य सर्वान्वेदान्प्रणम्य च
जप्त्वा तु सवसूक्तानि सवशास्त्रानुसारतः ५
सर्वपापहरं दिव्यं सर्वसंशयनाशनम्
चतुर्णामपि वर्णानां व्याघ्रः शास्त्रमकल्पयत् ६
ये च पापकृतोलोके ये चान्ये धर्मदूषकाः
सर्वपापैः प्रमुच्यन्ते श्रुत्वेदं शास्त्रमुत्तमम् ७
तस्मादिदं वेदविद्भिरध्येतव्यं प्रयत्नतः
शिष्येभ्यश्च प्रवक्तव्यं सवृत्तेभ्यश्चसर्वतः ८
आचारं चैव सर्वेषां कार्याणां च विनिर्णयम्
यथाक्रमं यथायोग्य वक्तुमर्हस्यशेषतः ९
भगवन् सर्ववर्णानां यथावदनुपूर्वशः
अन्तरं च प्रभावानां धर्मान्नो वक्तुमर्हसि १०
युगेयुगे च सामर्थ्यं विशेषं मुनिभाषितम्
व्याघ्रेण च यथाप्रोक्तं प्रायश्चित्तं प्रदीप्यते ११
युगेयुगे च ये धर्मास्तेषु तेषु च ये द्विजाः
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः १२
अकृते वैश्वदेवे तु ये भुंजन्ति द्विजातयः

Branch 30B: Upasmṛiti (12) Vyāghrapāda Smṛiti

Ending:

नद्यां तु विद्यमानायां न स्नायादन्यवारिषु ३८५
अस्नातमातुरस्नाने स तीर्थं तु श्रृतोदकम्
स्नात्वा तु वाससी धौते अक्लिन्ने परिधाय च ३८६
प्रक्षाल्योरुमृताचाद्भिर्हस्तौ प्रक्षालयेत्ततः
काषायं कृष्णवस्त्रं च मलिनं केशदूषितम् ३८७
जीर्ण नीलं संधितं च पारक्यं मैथुने धृतम्
अच्छिन्नाग्रमुपवस्त्रं कुत्सितं धमतो विदुः ३८८
यज्ञं दानं जपो होमं स्वाध्यायं पितृतपर्णम्
नैकवस्त्रो द्विजः कुर्याद्भोजनं तु सुरार्चनम् ३८९
तत्सर्वमसुरेन्द्राणां ब्रह्मा भागमकल्पयत्
ततः सन्ध्यामुपासीत शुद्धचित्तोजितेन्द्रियः
मुहूर्तादग्निहोत्राणि नयंति परमां गतिम् ३९०
अत्रस्वर्गश्चमोक्षश्च यो यथा गन्तुमिच्छति
यदिच्छसि महासिद्धिं तीर्थराजाभिषेचनम् ३९१
विप्रपादविनिर्मुक्तं तोयं शिरसि धारय
दक्षिणां स ब्रह्मसूत्रं स्तेयेमे दक्षिणामुखः ३९२
कुशास्तान् द्विगुणी कुर्वन् जानुसव्यं निधाय च
मार्जनं तर्पणं श्राद्धं न कुर्याद्वारिधारया ३९३
करोति यदि मूढात्मा तत्सर्वं निष्फलं भवेत् ३९४
विद्वान्स्वयं तु यो ब्रूयात् स धर्मः परमः स्मृतः
अच्छिद्रमितितद्वाक्यं वदंति क्षितिदेवताः ३९५
प्रणम्यशिरसाग्राह्यमग्निष्टोमफलैः सह
व्याघ्रपादेन चाख्यातं धर्मशास्त्रोत्तमोत्तमम् ३९६
इति व्याघ्रपादप्रणीतं धर्मशास्त्रं समाप्तम्

Reference: *Smṛti-Sandarbha* IV, pp.2491ff.

## Branch 30B: Upasmṛiti (13) Dālbhya Smṛiti

Structure: 167 Verses.

Beginning:

दाल्भ्यस्मृतिः । दाल्भ्यम्प्रतिॠृषीणां धर्मविषयकः प्रश्नः ।
कृताभिषेकं दाल्भ्यं स्वे आश्रमे समुपस्थितम् ।
परिपृच्छन्ति तत्वज्ञं ॠषयो वेदपारगाः १
धर्माधर्मविवेकं च शुद्धिर्जातमृतस्य च ।
आयुष्यानि च तीर्थानि मासशुद्धिस्तथैव च २
श्राद्धकालं च ब्रह्मघ्नगोघ्नचण्डालसंकरम् ।
रसानां परिवेत्ता च कथयस्व यथायथम् ३
स्मृतिसारं प्रवक्ष्यामि यथा शङ्खेन भाषितम्
इष्टापूर्वविधिश्चैव प्रायश्चित्तविधिस्तथा ४
इष्टापूर्तौ तु कर्तव्यौ ब्राह्मणेन प्रयत्नतः
इष्टेन लभते मोक्षं पूर्ते स्वर्गोऽभिधीयते ५
एकाहमपि कौन्तेय भूमिस्थमुदकं कुरु
कुलानि तारयेत्सप्त यत्र गौर्वितृषा भवेत् ६
भूमिदानेन ये लोका गोदानेन च कीर्तिताः
तान् लोकान् प्राप्नुयान्मर्त्यः पादपानां प्ररोहणे ७
वापीकूपतडागानि देवतायतनानि च
पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ८
अग्निहोत्रं तपः सत्यं देवानां प्रतिपालनम्
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ९
इष्टापूर्तौ द्विजातीनां सामान्यौ धर्मसाधकौ
अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके १०
यावदस्थीनि गंगायां तिष्ठन्ति पुरुषस्य च
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ११
देवानां च पितृणां च जले दद्याज्जलाञ्जलीन्
असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलीन् १२
केशकीटकशंबूकमस्थिकंटकमेव च

Branch 30B: Upasmṛiti (13) Dālbhya Smṛiti

Ending:

अपां शतघटोद्धारः पंचगव्येन शुध्यति १५६
दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः १५७
परिवित्तिः परिवेत्ता या या च परिविंदति
सर्वे ते नरकं यान्ति दातृयाजकपंचमाः १५८
पितृव्यपुत्राः सापत्नाः परनारीसुताश्च ये
दाराग्निहोत्रधर्मेण न दोषः परिवेदने १५९
ज्येष्ठो भ्राता यदातिष्ठेदाधानं नैव कारयेत्
अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा १६०
आममांसं घृतं क्षौद्रं स्नेहाश्च पत्रसंभवाः
म्लेच्छभाण्डगता ये वै आत्मभाण्डगताः शुचिः १६१
पत्रचूर्णेषु यत्तोयं गोरसेषु च संस्थितम्
न दूष्यं तद्भवेद्वारि इत्येवं मनुरब्रवीत् १६२
संग्रामे अट्टमार्गे च यात्रादेवगृहेषु च
महोत्साहे महोत्पाते स्पृष्टास्पृष्टिर्न दुःष्यति १६३
दिवाकपिच्छछायायां रात्रौ दधिशमीषु च
धात्रीफलेषु सप्तम्यामलक्ष्मीर्वसते सदा १६४
शूर्पवातो नखाद्बिन्दुः केशवस्त्रघटोदकम्
मार्जनीरेणुसहितं हन्ति पुण्यं पुराकृतम् १६५
यत्र यत्र च संकीर्णं पश्येदात्मनमात्मना ।
तत्र तत्र तिलैर्होमो गायत्र्या वर्तनं यथा १६६
इदं दाल्भ्यकृतं शास्त्रं श्रावयिष्यति यो द्विजान् ।
सवपापविशुद्धात्मा पुण्यलोकमवाप्नुयात् १६७
इति श्रीदाल्भ्यप्रोक्तं धर्मशास्त्रं समाप्तम् । शुभम्भूयात् ।

Reference: *Smṛti-Sandarbha* V, pp.2933ff.

## Branch 30B: Upasmṛiti (14) Prajāpati Smṛiti

Structure: 198 Verses.

Beginning:

अथ प्रजापतिस्मृतिः । श्रीगणेशाय नमः ।
अथ ब्रह्माणं प्रति रुचेः प्रश्नः श्राद्धकालाभिधानञ्च
पितुर्वाक्यार्थकारी च रुचिः प्रम्लोचया सह ।
नमस्योवाच देवेशं ब्रह्माणं जगतः पतिम् १
ब्रह्मन्विधे विरिञ्चेति धातः शंभो प्रजापते ।
त्वत्प्रसादादिमं धर्मं जग्राह पितृवाक्यतः २
अनया सह तीर्थेषु मया श्राद्धान्यनेकशः ।
कृतानि पितृदुष्ट्यर्थं धनाथं पुत्रकाम्यया ३
स्मृतयश्च पुराणानि त्वया दृष्टान्यनेकशः
दृष्टस्त्वनेकधा धातः श्राद्धकल्पः सविस्तरः ४
तथाऽप्यसंशयापन्नं क्रियमाणविधिं वद
येन विज्ञानमात्रेण न मुह्येऽहं कदाचन ५
चतुर्णामपि वेदानां शाखाः सन्ति सहस्रशः
अज्ञानादल्पशास्त्रार्था मोहयन्ति पदे पदे ६
कस्मिन्काले च कर्तव्यं कर्ता श्राद्धस्य कीदृशः
द्रव्यं देशः पाककर्ता कदा विप्रान्निमन्त्रयेत् ७
ब्राह्मणाः कीदृशास्तत्र नियमास्तत्र कीदृशाः
श्राद्धोपहारपात्राणि भक्ष्यं तत्कालदेवता ८
ततः श्राद्धेषु के मन्त्राः पदार्थादिक्रमः कथम्
आसनावाहनान्यर्घोऽग्नौ होमः पात्रालम्भनम् ९
विप्रभोज्यं पिण्डदानं क्षमापनविधिक्रमम्
वैश्वदेवं भृत्यभोज्यं वद सायंतनं विधिम् १०
ब्रह्मोवाच
पितरस्तव तुष्टा वै रुचे शृणु महामते
मालिन्यां रौच्यनामा वै त्वत्तः पुत्रो भविष्यति ११
नदीं तर्तुमनाः पारं पराचारस्य वित्ति कम्

Branch 30B: Upasmṛiti (14) Prajāpati Smṛiti

Ending:

आब्रह्मस्तम्बपर्यन्तं पूर्वजाः सन्ति ये कुले
तृप्ता भवन्ति ते सर्वे पुत्रहस्तेन नान्यथा १८७
अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च
येन केनाप्युपायेन पुत्रमुत्पादयेत्सुधीः १८८
सैकोद्दिष्टं दैवहीनं यतः पुत्रो न विद्यते
आयान्ति पुत्रिणः पूर्वे देवर्षिपितृवेष्टिताः १८९
दर्शे द्वे पार्वणे कार्ये मातुर्मातामहस्य च
क्षयाहे च पितुर्मातुः पार्णवं पार्वणं कृतम् १९०
अम्बष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम्
पित्रादौ मातृमध्यस्थं ततो मातामहान्तिकम् १९१
अन्वष्टक्ये पितृभ्यश्च ततस्त्रीभ्यश्च दैवतम्
ताभ्यस्त्वदैवतं वृद्धौ तेभ्यश्चापि सदैवतः १९२
मातरः प्रथमं पूज्याः पितरश्च ततः परम्
मातामहश्च तदनु वृद्धिश्राद्धे त्वयं क्रमः १९३
पार्वणानि मयोक्तानि विपरीतानि तानि ते
अथर्वणास्तर्पयन्ति तद्वेदोक्तमतं यथा १९४
अतिथिं श्राद्धरक्षार्थमते विष्णुस्वरूपिणम्
निवेशये विष्णुसमं ब्राह्मणं वेदपारगम् १९५
कव्यवाहादयो येऽमी विद्यन्ते ये च पूर्वजाः
सर्वेषामेव वर्णानां श्राद्धे तृप्यन्ति देवताः १९६
साक्षाद्विष्णुर्धर्मराजः श्राद्धदेवश्च कथ्यते ।
विश्वे देवाः पितृतिथिः सर्वं विष्णुरिति स्मृतम् १९७
पूर्वजास्तुष्टिनायान्ति दाता भोक्ता न संशयः १९८
इति प्रजापतिस्मृतिः समाप्ता । ॐ तत्सत् ।

Reference: *Smṛti-Sandarbha* III, pp.1664ff.

## Branch 30B: Upasmṛiti (15) Śhātātapa Smṛiti

Structure: 6 Chapters.

Beginning:

अथ शातातपस्मृतिः । श्रीगणेशायनमः । अथाऽकृतप्रायश्चित्तवर्णनम् ।
प्रथमोऽध्यायः ।
प्रायश्चित्तविहीनानां महापातकिनां नृणाम् ।
नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् १
प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचितम् ।
प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः २
महापातकजं चिह्नं सप्तजन्मनि जायते ।
उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् ३
दुष्कर्मजा नृणां रोगा यान्ति चोपक्रमैः शमम्
जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमोभवेत् ४
पूर्वजन्मकृतं पापं नरकस्य परिक्षये
बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः ५
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा
मूत्रकृच्छ्राश्मरीकासा अतीसारभगन्दरौ ६
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम्
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः ७
जलोदरं यकृत् प्लीहा शूलरोगव्रणानि च
श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः
रक्तार्वुद विसर्पाद्या उपपापोद्भवा गदाः ८
दण्डापतानकश्चित्रवपुः कम्पविचर्चिकाः
वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः ९
अर्शआद्या नृणां रोगा अतिपापाद्भवन्ति हि
अन्ये च बहवो रोगा जायन्ते वर्णसङ्कराः १०
उच्यन्ते च निदानानि प्रायश्चित्तानि वै क्रमात्
महापापेषु सर्वं स्यात्तदर्द्धमुपपातके ११
दद्यात् पापेषु षष्ठांशं कल्प्यं व्याधिबलाबलम्

Branch 30B: Upasmṛiti (15) Śhātātapa Smṛiti

Ending:

अश्मना निहते दद्यात् सवत्सां गां पयस्विनीम्
विषेण च मृते दद्यान्मेदिनीं क्षेत्रसंयुताम् ३८
उद्बन्धनमृते चापि प्रदद्याद्गां पयस्विनीम्
मृते जलेन वरुणं हैमं दद्यात्त्रिनिष्ककम् ३९
वृक्षं वृक्षहते दद्यात् सौवर्णं स्वर्णसंयुतम्
अतीसारमृते लक्षं सावित्र्याः संयतोजयेत् ४०
साकिन्यादिमृते चैवं जपेद्रुद्रं यथोचितम्
विद्युत्पातेन निहते बिद्यादानं समाचरेत् ४१
अस्पर्शे च मृते कार्य्यं वेदपारायणं तथा
सच्छास्त्रपुस्तकं दद्याद्वान्तमाश्रित्य संस्थिते ४२
पातित्येन मृते कुर्य्यात् प्राजापत्यानि षोडश
मृते चापत्यरहिते कृच्छ्राणां नवतिञ्चरेत् ४३
निष्कत्रयमितस्वर्णं दद्यादश्वं हयाहते
कपिना निहते दद्यात् कपिं कनकनिर्मितम् ४४
विसूचिकामृते स्वादु भोजयेच्च शतं द्विजान्
तिलधेनुः प्रदातव्या कण्ठेऽन्नकवले मृते ४५
केशरोगमृते चापि अष्टौ कृच्छ्रान् समाचरेत् ।
एवं कृते विधानेन विदध्यादौर्द्ध्वदैहिकम् ।
ततः प्रेततत्वनिर्मुक्ताः पितरस्तर्पितास्तथा ४६
दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसम्पदः ।
इतिशातातपप्रोक्तोविपाकः कर्मणामयम् ।
शिष्याय शरभङ्गाय विनयात् परिपृच्छयते ४७
इति शातातपीये कर्मविपाके अगतिप्रायश्चित्तं नाम षष्ठोऽध्यायः ।
समाप्ता चेयं शातातपस्मृतिः ।

Reference: *Smṛti-Sandarbha* I, pp.598ff.

## Branch 30B: Upasmṛiti (16) Vādhūla Smṛiti

Structure: 233 Verses.

Beginning:

वाधूलस्मृतिः
वाधूलमुनिमासीनमभिगम्य महर्षयः
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् १
भगवन् ब्राह्मणादीनामाचारं वद तत्त्वतः
तच्छ्रुत्वा मुनिशार्दूलस्तानृषीन् प्राह धर्मवित् २
ब्राह्मान्मुहूर्तादारभ्य त्रिकाले विहितं तथा
नित्यनैमित्तिकं चैव प्रवक्ष्यामि यथामति ३
ब्राह्मे मुहूर्ते सम्प्राप्ते त्यक्तनिद्रः प्रसन्नधीः
प्रक्षाल्य पादावाचम्य हरिसङ्कीर्तनं चरेत् ४
ब्राह्मे मुहूर्ते निद्रां च कुरुते सर्वदा तु यः
अशुचिं तं विजानीयादनर्हः सर्वकर्मसु ५
नक्षत्रज्योतिरारभ्य सूर्यस्योदयनं प्रति
प्रातःसन्ध्येति तां प्राहुः श्रुतयो मुनिसत्तमाः ६
प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि
सादित्यां पश्चिमां सन्ध्यामर्धास्तमितभास्कराम् ७
दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद् दक्षिणामुखः ८
अवगुण्ठितसर्वाङ्गस्तृणैराच्छाद्य मेदिनीम्
घ्राणास्ये वाससाच्छाद्य मलमूत्रं त्यजेद् बुधः ९
अप्रावृतशिरो यस्तु विण्मूत्रं सृजति द्विजः
तच्छिरः शतधा भूयादिति देवाः शपन्ति तम् १०
उत्थाय वामहस्तेन गृहीत्वा चोर्ध्वमेहनम्
शौचदेशमथाभ्येत्य कुर्याच्छौचं मृदम्बुभिः ११
अरत्निमात्रमुत्सृज्य कुर्याच्छौचमनुद्धृते
पश्चात्तच्छोधयेत्तीर्थमन्यथा न शुचिर्भवेत् १२
विट्छौचं प्रथमं कुर्यान्मूत्रशौचं ततः परम्

Branch 30B: Upasmṛiti (16) Vādhūla Smṛiti

Ending:

मासिके पक्षमेकं स्यादाब्दिके च तदर्धकम्
एकोद्दिष्टे वत्सरं स्यात् षाण्मासं तु सपिण्डने २२१
महालयं त्रिरात्रं स्याच्छ्राद्धे त्वाकालिकं भवेत् २२२
श्राद्धान्तं तिलहोमं च दूरयात्रां प्रतिग्रहम्
सिन्धुस्नानं गयाश्राद्धं वपनं शवधारणम् २२३
पर्वतारोहणं चैव गर्भकर्ता तु वर्जयेत् २२४
गर्भकर्ता तु यो विप्रः षण्मासाभ्यन्तरे यदि
श्राद्धान्नादीनि कुर्वाणो क्षिप्रमेव विनश्यति २२५
मध्यन्दिने दृढाङ्गो यः स्नानं त्यक्त्वाऽर्चयेद्धरिम्
वैश्वदेवं च यः कुर्यात्स गुल्मव्याधिपीडितः २२६
पितरस्तत्र मोदन्ते गायन्ते च पितामहाः
प्रपितामहाश्च नृत्यन्ते श्रोत्रिये गृहमागते २२७
देशान्तरे दुरन्नानां प्रायश्चित्तद्वयं स्मृतम्
समुद्रगानदीस्नानं शिष्टागारेषु भोजनम् २२८
अनाचारस्य विप्रस्य पतितान्नं यतेस्तथा
शूद्रान्नं विधवान्नं च श्वमांससदृशं भवेत् २२९
यो मोहादथवाऽऽलस्यादकृत्वा केशवार्चनम्
भुङ्क्ते स याति नरकं श्वानयोनिषु जायते २३०
अनृतं मद्यगन्धं च दिवास्वापं च मैथुनम्
पुनाति वृषलस्यान्नं सायं सन्ध्या बहिःकृता २३१
स्नानं सन्ध्यां जपं होमं स्वाध्यायं पितृतर्पणम्
देवताराधनं चैव वैश्वदेवं यथाविधि २३२
न कुर्याद्यदि मोहेन चण्डालो नात्र संशयः २३३
वाधूलस्मृतिः समाप्तम्

Reference: Chaubey, Braj Bihari, *Vādhūla Smṛiti, Critically Edited with Hindi Translation, Detailed Introduction and Several Indexes*, (Hoshiarpur: Katyayan Vaidik Sahitya Prakashan, 2000).

## Branch 30B: Upasmṛiti (17) Gobhila Smṛiti

Structure: Three Prapāṭhakas, and a total of 29 Khaṇḍas (chapters)

Beginning:

अथ कात्यायनस्मृतिः । श्रीसामवेदाय नमः । प्रथमः खण्डः ।
अथाचाराध्यायः । तत्रादौ यज्ञोपवीतकर्मप्रकरणवर्णनम् ।
अथातो गोभिलोक्तानामन्येषां चैव कर्मणाम्
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् १
त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम्
त्रिवृत्तच्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते २
पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कतिम्
तद्धार्यमुपवीतं स्यान्नातोलम्बं न चोच्छ्रितम् ३
सदोपवीतिना भाव्यं सदा बद्धशिखेन च
विशिखो व्युपवीतश्च यत् करोति न तत् कृतम् ४
त्रिः प्राश्यापो द्विरुन्मृज्य मुखमेतान्युपस्पृशेत्
आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोंसकान् ५
अङ्गुष्ठेन प्रदेशिन्या घ्राणं चैवमुपस्पृशेत्
अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रं पुनःपुनः ६
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं तु तलेन वै
सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् ७
यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ८
यत्र दिङ्निनयमो न स्याज्जपहोमादिकर्मसु
तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्रीसौम्यापराजिताः ९
तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः
तदासीनेन कर्तव्यं न प्रह्वेण न तिष्ठता १०
गौरी पद्मा शची मेधा सावित्री विजया जया
देवसेना स्वधा स्वाहा मातरो लोकमातरः ११
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश १२

Branch 30B: Upasmṛiti (17) Gobhila Smṛiti

Ending:

प्राधान्यं पिण्डदानस्य केचिदाहुर्मनीषिणः
गयादौ पिण्डमात्रस्य दीयमानत्वदर्शनात् ९
भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः
ब्राह्मणस्य परीक्षायां महायत्नप्रदर्शनात् १०
आमश्राद्धविधानस्य विना पिण्डैः क्रियाविधिः
तदालभ्याप्यनध्यायविधानश्रवणादपि ११
विद्वन्मतमुपादाय ममाप्येतद्धृदि स्थितम्
प्राधान्यमुभयोर्यस्मात्तस्मादेष समुच्चयः १२
प्राचीनावीतिना कार्य्यं पित्र्येषु प्रोक्षणं पशोः
दक्षिणोद्वासनान्तञ्च चरोर्निर्वपणादिकम् १३
सन्नपश्वावदानानां प्रधानार्थो न हीतरः
प्रधानं हवनञ्चैव शेषं प्रकृतिवद्भवेत् १४
द्वीपमुन्नतमाख्यातं शादा चैवेष्टका स्मृता
कीलिनं सजलं प्रोक्तं दूरखातोदको मरुः १५
द्वारगवाक्षः सन्दर्भैः कर्द्दमभित्त्यन्तकोण वा
वेधैश्वानष्टं वास्तुघोरं विद्वन्मनाक्रान्तमार्यैश्च १६
वशङ्गमाविति व्रीहीञ्छंषश्चेति यवांस्तथा
असावित्यत्र नामोक्त्वा जुहुयात् क्षिप्रहोमवत् १७
साक्षतं सुमनोयुक्तमुदकं दधिसंयुतम्
अर्घ्यं दधिमधुभ्याञ्च मधुपर्को विधीयते १८
कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जलौ
कांस्यापिधानं कांस्यस्थं मधुपर्कं समर्पयेत् १९
इति कात्यायनविरचिते कर्म्मप्रदीपे तृतीयः प्रपाठकः
समाप्ता चेयं कात्यायनसंहिताः

Reference: Schrader, Friedrich, *Der Karmapradīpa*, Diss., Halle, 1889.
Bhattacharya, "Kātyāyana Smṛiti" in *Dharmaśhāstrasaṃgrahaḥ*, (Calcutta, 1876), pp. 630 ff.
*Smṛti-Sandarbha* III, pp.1335ff.

## Branch 31: Ṛik Veda Prātiśhākhya

Structure: Three Chapters, containing six *paṭalas* each

Beginning:

अथ ऋग्वेदप्रातिशाख्यम्  अथ प्रथमं पटलम्

अष्टौ समानाक्षराण्यादितस् ततश् चत्वारि सन्ध्यक्षराण्युत्तराणि
एते स्वरा इपरो दीर्घवत्प्लुतोऽनुस्वारो व्यञ्जनं वा स्वरो वा १
सर्वः शेषो व्यञ्जनान्येव तेषामाद्या स्पर्शाः पञ्च ते पञ्चवर्गाः
चतस्रोऽन्तस्थास्तत उत्तरेऽष्टा ऊष्माणोऽन्त्याः सप्त तेषामघोषाः २
वर्गे वर्गे च प्रथमावघोषौ युग्मौ सोष्माणाव नुनासिकोऽन्त्यः
तस्मादन्यमवसाने तृतीयं गार्ग्य स्पर्शं प्रथमं शाकटायनः ३
ओजा ह्रस्वाः सप्तमान्ताः स्वराणाम् अन्ये दीर्घा उभये त्वक्षराणि
गुरूणि दीर्घाणि यथेतरेषां संयोगानुस्वारपराणि यानि ४
अनुस्वारो व्यञ्जनं चाक्षराङ्गं स्वरान्तरे व्यञ्जनान्युत्तरस्य
पूर्वस्यानुस्वारविसर्जनीयौ संयोगादिर्वा च परक्रमे द्वे ५ १
मात्रा ह्रस्वम् तावदवग्रहान्तरं द्वे दीर्घ स्तिस्रः प्लुतः उच्यते स्वरः
अधः स्विदासी३दुपरि स्विदासी३दर्थे प्लुतिर्भीरिव विन्दतीँ३त्रिः ६
स्वरभक्तिः पूर्वभागक्षराङ्गं द्राघीयसी सार्धमात्रेतरे च
अर्धोनान्या रक्तसंज्ञोऽनुनासिकः संयोगस्तु व्यञ्जनसंनिपातः ७
कण्ठ्योऽकारः प्रथमपञ्चमौ च द्वा ऊष्मणां केचिदेता उरस्यौ
ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः ८
तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः
मूर्धन्यौ षकारटकारवर्गौ दन्तमूलीयस्तु तकारवर्गः ९
सकाररेफलकाराश्च रेफं बर्स्व्यमेके शष ओष्ठ्योऽपवाद्य
नासिक्यान् नासिक्ययमानुस्वारान् इति स्थानान्यत्र यमोपदेशः १० २
जिह्वामूलं तालु चाचार्य आह स्थानं डकारस्य तु वेदमित्रः
द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः ११
ळहकारतामेति स एव चास्य ढकारः सन्नुष्मणा संप्रयुक्तः
इळा साळ्हा चात्र निदर्शनानि वीड्वङ्ग इत्येतदवग्रहेण १२

Branch 31: Ṛik Veda Prātiśhākhya

Ending:

त्रिभिस्तु पूर्वं तत उत्तरं स्याद् द्विशस्त्रिशो वा यदि वा समस्तम्
द्वाभ्यां पुनः सप्तपदावसानं द्वाभ्यां च मध्येऽष्टपदासु विद्यात् २४
अग्निमीळे दृतेरिव गायन्त्येतमधीन्न्विति
अयं चक्रं नकिष्टं च नकिर्देवा मिनीमसि २५ ५
विश्वान्देवान्हवामहे स क्षपो निष्कं सुषुम
नहि वां प्रो षु स हि शर्धस् ता ऋचोऽत्र निदर्शनम् २६
द्वाभ्यां पादेन द्वाभ्यां तु तव त्यत्पञ्चपदाष्टिः
अव्यूहेनातिशक्वरी तृतीयः षोळशाक्षरः २७
चतुर्भिस्तत एकेनाग्ने तमद्येति च
चतुर्भिस्तु परं द्वाभ्यां तव स्वादिष्ठा तच्छंयोः २८
भरद्वाजाय तच्छक्षुरधीद् वृक्षा द्वतेरिव
एतासु न व्यवस्यन्त्येके द्वादशकादिषु २९
प्रश्नस्तृचः पङ्क्तिषु तु द्वृचो वा द्वे द्वे च पङ्क्तेरधिकाक्षरेषु
एका च सूक्तं समयास्त्वगणयाः परावराध्यर्धा द्विपदे यथैका ३०
सूक्तस्य शेषोऽल्पतरो यदि स्यात् पूर्वं स गच्छेद्यदि तु द्वृचो वा
ते षष्टिरध्याय उपाधिका वा सूक्तेऽसमाप्ते यदि ते समाप्ताः ३१ ६
सर्वाणि भूतानि मनो गतिश्च स्पर्शाश्च गन्धाश्च रसाश्च सर्वे
शब्दाश्च रूपाणि च सर्वमेतत् त्रिष्टुब्जगत्यौ समुपैति भक्त्या ३२
गुर्वक्षराणां गुरुवृत्ति सर्वं गुर्वक्षरं त्रैष्टुभमेव विद्यात्
लघ्वक्षराणां लघुवृत्ति सर्वं लघ्वक्षरं जागतमेव विद्यात् ३३
यश्छन्दसां वेद विशेषमेतं भूतानि च त्रैष्टुभजागतानि
सर्वाणि रूपाणि च भक्तितो यः स्वर्गं जयत्येभिरथामृतत्वम् ३४
स्वर्गं जयत्येभिरथामृतत्वम् ७ इति ऋग्वेदप्रातिशाख्येऽष्टादशं पटलम्
इति तृतीयोऽध्यायः इति ऋग्वेदप्रातिशाख्यं समाप्तम्

Reference: Verma, Virendrakumar, *Ṛgveda-Prātiśākhya of Śaunaka along with Uvvaṭabhāṣya*, (Delhi: Chaukhamba Sanskrit Pratishthan, 1986).

## Branch 32: Śhukla-Yajur-Veda Prātiśhākhya

Structure: 8 Chapters.

Beginning:

अथ शुक्लयजुःप्रातिशाख्यम्    प्रथमोऽध्यायः

स्वरसंस्कारयोश्छन्दसि नियमः १ लौकिकानामर्थपूर्वकत्वात् २ न सम-
त्वात् ३ स्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः ४ यत्तन्न ५ वायुः खात् ६
शब्दस्तत् ७ सङ्करोप ८ स सङ्घातादीन् वाक् ९ त्रीणि स्थानानि १० द्वे
करणे ११ शरीरात् १२ शरीरम् १३ शरीरे १४ तेषां समूहात् स
उदयँस्त्रैकाल्यम् १५ ओंकारः स्वाध्यायादौ १६ ओंकाराथकारौ १७
ओंकारं वेदेषु १८ अथकारं भाष्येषु १९ प्रयतः २० शुचौ २१ इष्टम् २२
ऋतुं प्राप्य २३ योजनान्न परम् २४ भोजनं मधुरं स्निग्धम् २५
वर्णदोषविवेकार्थम् २६ तिङ्कृत्तद्धितचतुष्टयसमासाः शब्दमयम् २७ तां
वाचमोंकारं पृच्छामः २८ अथ शिक्षा विहिताः २९ सवनक्रमेणोरः-
कण्ठभ्रूमध्यानि ३० आयाममार्दवाभिघाताः ३१ उच्चनीचविशेषः ३२
अथाख्याः समाम्नायाधिकाः प्राग्रिफितात् ३३ उपदिष्टा वर्णाः ३४
अन्त्याद्वर्णात् पूर्व उपधा ३५ निर्देश इतिना ३६ कारेण च ३७
अव्यवहितेन व्यञ्जनस्य ३८ र एफेन च ३९ स्वरैपि ४० नानुस्वार-
यमविसर्जनीयजिह्वामूलीयोपध्मानीयाः ४१ दन्त्यस्य मूर्द्धन्यापत्तिर्नतिः ४२
समानस्थानकरणास्यप्रयत्नः सवर्णः ४३ सिमादितोऽष्टौ स्वराणाम् ४४
सन्ध्यक्षरं परम् ४५ अकण्टचो भावी ४६ व्यञ्जनं कादि ४७ अनन्तरं
संयोगः ४८ स्पर्शेष्वेव संख्या ४९ द्वौ द्वौ प्रथमौ जित् ५० ऊष्माणश्च
हवर्जम् ५१ मुच्च ५२ धि शेषः ५३ द्वितीयचतुर्थाः सोष्माणः ५४
अमात्रस्वरो ह्रस्वः ५५ मात्रा च ५६ द्विस्तावान् दीर्घः ५७ प्लुतस्त्रिः
५८ व्यञ्जनमर्धमात्रा ५९ तदर्धमणु ६० परमाण्वर्धाणुमात्रा ६१ स्थाने
६२ हस्तग्रहणे दीर्घप्लुतौ प्रतीयात् ६३ प्रथमग्रहणे वर्गम् ६४ ऋᳵक्कौ
जिह्वामूले ६५ इचशेयास्तालौ ६६ षटौ मूर्धनि ६७ रो दन्तमूले ६८
लृलसिता दन्ते ६९ उवोᳶप्पा ओष्ठे ७० अहविसर्जनीयाः कण्ठे ७१
सवर्णवच्च ७२ ऐकारौकारयोः कण्ठ्या पूर्वा मात्रा ताल्वोष्ठयोरुत्तरा ७३
यमानुस्वारनासिक्यानां नासिके ७४ मुखनासिकाकरणोऽनुनासिकः ७५

Branch 32: Śhukla-Yajur-Veda Prātiśhākhya

Ending:

ज्ञाने ३७ पौरुष्यम् ३८ स्वर्ग्यम् ३९ यशस्यम् ४० आयुष्यम् ४१
अथापि भवति ४२
वेदस्यलध्ययनाद् धर्मः संप्रदानात्तथा श्रुतेः ।
वर्णशोऽक्षरशो ज्ञानाद्विभक्तिपदशोऽपि च ४३
त्रयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः ।
द्विचत्वारिंशद् व्यञ्जनान्येतावान्वर्णसंग्रहः ४४
तस्मिन् ळळ्हजिह्वामूलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम् ४५
लृकारो दीर्घः प्लुताश्चोक्तवर्जम् ४६ अथ वर्णदेवताः ४७ आग्नेयाः कण्ठ्याः ४८ नैर्ऋृत्या जिह्वामूलीयाः ४९ सौम्यास्तालव्याः ५० रौद्रा दन्त्याः ५१ ओष्ठ्या आश्विनाः ५२ वायव्या मूर्धन्याः ५३ शेषा वैश्वदेवाः ५४ तत्समुदायोऽक्षरम् ५५ वर्णो वा ५६ अक्षरसमुदायः पदम् ५७ अक्षरं वा ५८ तच्चतुर्धा ५९ नामाख्यातोपसर्गनिपाताः ६० तत्र प्रतिविशेषः ६१
क्रियावाचकमाख्यातमुपसर्गो विशेषकृत ।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ६२
चतुर्दश निपाता येऽनुदात्तास्तेऽपि सञ्चिताः ।
निहन्यते खल्वाख्यानमुपसर्गाणां चतुष्टये ६३
अथ पदगोत्रानि ६४
भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते ।
वासिष्ट उपसर्गस्तु निपातः काश्यपः स्मृतः ६५
अथ पददेवताः ६६
सर्वं तु सौम्यमाख्यातं नाम वायव्यमिष्यते
आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ६७
इत्याह स्वरसंस्कारप्रतिष्ठापयिता भगवान् कात्यायनः ६८
वृद्धं वृद्धिः ६९ ४

Reference: Rastogi, Shrimati Indu, *The Śuklayajuh-Prātiśākhya of Kātyāyana, critically edited from original manuscripts*, (Varanasi: Chowkhamba Sanskrit Series Office, 1967).

## Branch 33: Atharva Veda Prātiśhākhya
Structure: Eleven Pādas in Three Prapāṭhakas
Beginning:

अथर्वप्रातिशाख्यम्

अथातो न्यायाध्ययनस्य पार्षदं वर्तयिष्यामः १ पदानां संहितां विद्यात् २ पदविधिरिति ३ द्विरुदात्तं बृहस्पत्यादीनाम् ४ प्रत्यञ्चां द्वे उपोत्तमे ५ अवर्णमध्य आकार एकादेशे विशेषः ६ अवर्णान्ताच्च ७ इकारादौ च ८ एकारादौ च ९ कृदन्ते द्व्युपसर्गे १० गतिपूर्वो यदा धातुः ११ उपसर्गपूर्वमाख्यातम् १२ वचने वचने पूर्वम् १३ एकेन द्वे १४ द्विनतिकानि वा १५ परकारणानि १६ परयोगीनि १७ अर्थपादादिषूदात्तमाख्यातमामन्त्रितं पदम् १८ व्याघ्रादीन्यनुदात्तानि पादादीनामपोदितम् १९ वाक्यविपर्यये पदलोपेषु पादादिवत्स्वरः २० चयोगादनिघातः २१ वायोगादनिघातः २२ आमन्त्रितादाद्युदात्तात् २३ लुप्तकरणान्यकरणानि वा २४ अन्ययोगादनिघातः २५ नहीत्यनेन युक्तानि २६ यदित्येनेन समस्तेन २७ वचनात्परेण च सर्वत्र युक्तं वापवादो वा लुप्तं वा तत्पदं येन योगः २८

इति प्रथमः पादः

द्विषो बहुवचनम् २९ आमन्त्रितं दैवं दैवीरिति सर्वत्र ३० अर्धस्यासमविभागे ३१ नपुंसकम् तस्येदमिति वा जातिरन्तोदात्तम् ३२ द्वितीयोदात्तानि ३३ अकारात्प्रतिषेधात्परमुदात्तमजरादीनामिति ३४ अकारान्तो ब्रह्मा ब्रह्मण इत्यस्मिन्नर्थे ३५ नपुंसकमाद्युदात्तं ब्रह्म ३६ अन्तोदात्तानि ३७ काव्येति संज्ञायामग्रन्थे ३८ दक्षिणा तद्धितान्तम् ३९ आशामाशिषि ४० अर्वाचीनमिति प्रत्ययान्तरं वा ४१ महो देवस्य महतो देवस्येति ४२ तवर्णलोपोऽन्तोदात्तत्वं च ४३

इति द्वितीयः पादः

पूर्वपदप्रकृतिस्वरस्तस्यापवादः ४४ अनुदात्तानि ४५ आख्यातानि नामसदृशानि ४६ कमिति निपातः ४७ यथेति निपातः ४८ आख्यातान्युपसर्गसदृशानि ४९ आमन्त्रितानि स्वरविशिष्टानि ५०

Branch 33: Atharva Veda Prātiśhākhya

Ending:

त्वष्ट्रेव रूपमिति तृतीयान्तम् ४८ अपरुध्म इति धमौ ४९ कल्मलिः कुल्मलमिति लमौ ५० सत्ते द्वितकारम् ५१ आर्द्रहस्ता समङ्त इति रेफङकारादिः संयोगः ५२ तिर्यमिति तिरौ ५३ ऋभ्वाणं मातरिभ्वरीति भवौ ५४ अन्तवद्धा समन्ते प्र यद्धन्दिष्ठो जिह्वां नि तृन्धीति नकारादिः ५५

इति द्वितीयः पादः

नकारस्य विसर्जनीयः ५६ नकारस्य रेफः ५७ ह्रस्वोपधस्य तवर्गे प्रकृत्या ५८ दीर्घोपधः सप्तधातु विसर्जनीयस्य ५९ यथापरु समासे सकारः कपयोः ६० पञ्चम्याः परौ ६१ विसर्जनीयस्य सकारः ६२ षत्वस्यापवादः ६३ अनुपसर्गात्षकारः ६४ पूर्वपदात् ६५ उपसर्गस्योत्तरपदे दीर्घः ६६ अनिङ्गयेषूत्तरपदे दीर्घ इङ्गयेषु च ६७ अभ्यासस्य दीर्घः छन्दसि ६८ अश्वादीनां मतौ ६९ सर्वलिङ्गवचनेषु च ७० प्रथमस्य ७१ द्वितीयस्य ७२ सात्रासाहादीनामुत्तरपदाद्यस्य ७३ नामेत्यस्य ह्रस्वान्तमसमासे ७४ निपाताव्ययाना-मुत्तरपदाद्यस्य ७५

इति तृतीयः पादः

अञ्चतौ लुप्तप्रत्यये नेङ्गयते ७६ देवताद्वन्द्वे दीर्घाद्भिर्भ्यांभ्यःस्सु ७७ समस्तमेकाक्षरं वृद्ध्या ७८ एकाक्षरमवर्णान्तम् ७९ स्वरलिङ्ग-स्वरविभक्तिवचनविशेषेषु ८० वर्णलिङ्गस्वरविभक्तिवाक्यव्यत्यय-श्छन्दसि ८१ वर्णलोपागमह्रस्वदीर्घप्लुतात्मनेभाषापरस्मैभाषा अपि-यन्त्यपियन्ति ८२

इति चतुर्थः पादः इति तृतीयः प्रपाठकश्च

आथर्वणे संहितालक्षणग्रन्थे प्रातिशाख्यमूलसूत्रं समाप्तम्

Reference: Surya Kanta, ed., *Atharva-Prātiśākhya*, with an introduction, English translation, notes and indices, (New Delhi: Meharchand Lachhmandas, 1999).

## Branch 34: Atharva Veda Prātiśhākhya Chaturadhyāyī

Structure: Four Chapters and a total of 434 *Sūtras*

Beginning:

अथर्ववेदप्रातिशाख्य शौनकीया चतुराध्यायीका

ॐ नमः सरस्वत्यै नमः ॐ नमो ब्रह्मवेदाय अथर्वाङ्गिरसः

चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानां सन्ध्यपद्यौ गुणौ प्रातिज्ञम् १
एवमिहेति च विभाषाप्राप्तं सामान्ये २ पदान्त्यः पद्यः ३ अन्लृकारः स्वरः
पद्यः ४ लकारविसर्जनीयौ च ५ स्पर्शाः प्रथमोत्तमाः ६ न चवर्गः ७
प्रथमान्तानि तृतीयान्तानीति शौनकस्य प्रतिज्ञानं न वृत्तिः ८ अधिस्पर्शं च
९ द्वितीयचतुर्थाः सोष्माणः १० उत्तमा अनुनासिकाः ११ श्वासोऽघोषेष्व-
नुप्रदानः १२ नादो घोषवत्स्वरेषु १३ समानयमेऽक्षरमुच्चैरुदात्तम् १४
नीचैरनुदात्तम् १५ आक्षिप्तं स्वरितम् १६ स्वरितस्यादितो मात्रार्धमुदात्तम्
१७ मुखे विशेषाः करणस्य १८ कण्ठ्यानामधरकण्ठः १९ जिह्वामूली-
यानां हनुमूलम् २० तालव्यानां मध्यजिह्वम् २१ मूर्धन्यानां जिह्वाग्रं
प्रतिवेष्टितम् २२ षकारस्य द्रोणिका २३ दन्त्यानां जिह्वाग्रं प्रस्तीर्णम् २४
ओष्ठ्यानामधरौष्ठम् २५ नासिक्यानां नासिका २६ अनुनासिकानां
मुखनासिकम् २७ रेफस्य दन्तमूलानि २८ स्पृष्टं स्पर्शानां करणम् २९
ईषत्स्पृष्टमन्तःस्थानाम् ३० ऊष्मणां विवृतं च ३१ स्वराणां च ३२ एके
स्पृष्टम् ३३ एकारौकारयोर्विवृततमम् ३४ ततोऽप्याकारस्य ३५ संवृतो-
ऽकारः ३६ संस्पृष्टरेफमृवर्णम् ३७ दीर्घप्लुतयोः पूर्वा मात्रा ३८
सलकारम् लृवर्णम् ३९ संध्यक्षराणि संस्पृष्टवर्णान्येकवर्णवद्वृत्तिः ४०
नैकारौकारयोः स्थानविधौ ४१ विसर्जनीयोऽभिनिष्टानः ४२ व्यञ्जन-
विधारणमभिनिधानः पीडितः सन्नतरो हीनश्वासनादः ४३ स्पर्शस्य स्पर्शे-
ऽभिनिधानः ४४ पदान्तावग्रहयोश्च ४५ लकारस्योष्मसु ४६ ङणनानां
हकारे ४७ आस्थापितं च ४८ अतोऽन्यत्संयुक्तम् ४९ पूर्वरूपस्य मात्रार्धं
समानकरणं परम् ५० ह्रस्वं लघुसंयोगे ५१ गुर्वन्यत् ५२ अनुनासिकं च
५३ पदान्ते च ५४ परस्य स्वरस्य व्यञ्जनानि ५५ संयोगादि पूर्वस्य ५६
पद्यं च ५७ रेफहकारक्रमजं च ५८ एकमात्रो ह्रस्वः ५९ व्यञ्जनानि च
६० द्विमात्रो दीर्घः ६१ त्रिमात्रः प्लुतः ६२ षट्पुरसोरुकारोऽन्त्यस्य

Branch 34: Atharva Veda Prātiśhākhya Chaturadhyāyī

Ending:

आशा दिशि ७१ प्रकृतिदर्शनं समापत्तिः ७३ षत्वणत्वोपाचा-
रदीर्घटुत्वलोपान्पदानां चर्चापरिहारयोः समापत्तिः ७४ पूर्वपदनिमित्तानां च
७५ इंग्यानाम् ७६ अन्येनापि पर्वणा ७७ क्रमे परेण विगृह्यात् ७८
दीर्घस्य विरामे ७९ चतूरात्रोऽवग्रह एव ८० पदान्तविकृतानाम् ८१
अभ्यासविनतानां च ८२ स्त्रैषूयं नार्षदेन दुष्टरं त्रैष्टुभं त्रैहायणाज्ञास्पत्यम् ८३
अभ्यासस्य परोक्षायाम् ८४ वावृधानप्रभृतीनां च ८५ कृपिरुपिरिषीणा-
मनह्वानाम् ८६ जीहीडाहम् ८७ साह्याम ८८ दीदायत् ८९ नारका-
दीनाम् ९० च्यावयतेः कारितान्तस्य ९१ यावयतेराख्याते ९२ वनिय-
मिश्रथिग्लापि ९३ नाष्टनः ९४ हिनोतेः ९५ बोधप्रतीबोधौ केसर-
प्राबन्धाया अभ्यघायन्ति पनिष्पदातिष्ठिपं दाधार जागार मीमायेति ९६
प्रपणः पणतेरेव ९७ इदमूष्वादिषु पदत्वात् ९८ ब्रह्मणवत्यादीनाम् ९९
दीर्घायुत्वादीनां च १०० वेदाध्ययनं धर्मः १०१ प्रेत्य ज्योतिष्टं कामय-
मानस्य १०२ याज्ञिकैर्यथासमाम्नातम् १०३ यज्ञततिर्न पृथग्वेदेभ्यः १०४
यज्ञे पुनर्लोकाः प्रतिष्ठिताः १०५ पञ्चजना लोकेषु १०६ पदाध्ययनमन्ता-
दिशब्दस्वरार्थज्ञानार्थम् १०७ क्रमाध्ययनं संहितापददार्ढ्यार्थम् १०८
स्वरोपजनश्चादृष्टः पदेषु संहितायां च १०९ द्वे पदे क्रमपदम् ११० तस्यान्तेन
परस्य प्रसंधानम् १११ नान्तगतं परेण ११२ त्रीणि पदान्यपृक्तमध्यानि ११३
एकादेशस्वरसंधिदीर्घविनामाः प्रयोजनम् ११४ आकारौकारादि पुनः ११५
उकारः परिहार्य एव ११६ प्रगृह्यावगृह्यसमापाद्यान्तगतानां द्विर्वचनं परिहार
इतिमध्ये ११७ द्वाभ्यामुकारः ११८ अनुनासिकदीर्घत्वं प्रयोजनम् ११९
प्लुतश्चाप्लुतवत् १२० अनुनासिकः पूर्वश्च शुद्धः १२१ यथाशास्त्रं प्रसंधानम्
१२२ प्रगृह्यावगृह्यचर्चायां क्रमवदुत्तरस्मिन्नवग्रहः १२३ समापाद्यानामन्ते
संहितावद्वचनम् १२४ तस्य पुनरास्थापितं नाम १२५ स एकपदः परिहार्यश्च
१२६ इति शौनकीये चतुराध्यायिके चतुर्थः पादः

Reference: Whitney, W.D., *The Atharva-veda Prātiśākhya*,
or Śaunakīya Caturadhyāyika, (Varanasi: Chowkhamba Sanskrit Series Office, 1962).

## Branch 35: Kṛiṣhṇa-Yajur-Veda Prātiśhākhya

Structure: 24 Chapters.

Beginning:

तैत्तिरीयप्रातिशाख्य

अथ वर्णसमाम्नायः १ अथ नवादितः समानाक्षराणि २ द्वेद्वे सवर्णे ह्रस्वदीर्घे ३ न प्लुतपूर्वम् ४ षोडशादितः स्वराः ५ शेषो व्यञ्जनानि ६ आद्याः पञ्चविँशति स्पर्शाः ७ पराश्चतस्रोऽन्तस्थाः ८ परे षडूष्माणः ९ स्पर्शानामानुपूर्व्येण पञ्चपञ्च वर्गाः १० प्रथमद्वितीयतृतीयचतुर्थोत्तमाः ११ ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः १२ न हकारः १३ व्यञ्जनशेषो घोषवान् १४ आप्रावोपाभ्यधिप्रतिपरिविनीत्युपसर्गाः १५ वर्णः कारोत्तरो वर्णाख्या १६ अकारव्यवेतो व्यञ्जनानाम् १७ न विसर्जनीय-जिह्वामूलीयोपध्मानीयानुस्वारनासिक्यानाम् १८ एफस्तु रस्य १९ ह्रस्वो वर्णोत्तिरस्त्रयाणाम् २० अकारो व्यञ्जनानाम् २१ ग्रहणस्य २२ अःकार आगमविकारिलोपिनाम् २३ ग्रहणं वा २४ आसन्नँ संदेहे २५ अनेकस्यापि २६ प्रथमो वर्गोत्तरो वर्गाख्या २७ अं विकारस्य २८ पूर्व इति पूर्वः २९ पर इत्युत्तरः ३० ऋकारल्कारौ ह्रस्वौ ३१ अकारश्च ३२ तेन च समानकालस्वरः ३३ अनुस्वारश्च ३४ द्विस्तावान्दीर्घः ३५ त्रिः प्लुतः ३६ ह्रस्वार्धकालं व्यञ्जनम् ३७ उच्चैरुदात्तः ३८ नीचैरनुदात्तः ३९ समाहारः स्वरितः ४० तस्यादिरुच्चैस्तरामुदात्तादन्तरे यावदर्धँ ह्रस्वस्य ४१ उदात्तसमः शेषः ४२ सव्यञ्जनोऽपि ४३ अनन्तरो वा नीचैस्तराम् ४४ अनुदात्तसमो वा ४५ आदिरस्योदात्तसमः शेषोऽनुदात्तसम इत्याचार्याः ४६ सर्वः प्रवण इत्येके ४७ नानापदवदिंग्यमसंख्याने ४८ तस्य पूर्वपद-मवग्रहः ४९ पदग्रहणेषु पदं गम्येत ५० अपि विकृतम् ५१ अप्यकारादि ५२ अन्कारादि च ५३ एकवर्णः पदमपृक्तः ५४ आद्यन्तवच्च ५५ वर्णस्य विकारलोपौ ५६ विनाशो लोपः ५७ अन्वादेशोऽन्त्यस्य ५८ उपबन्धस्तु देशाय नित्यम् ५९ नानापदीयं च निमित्तं प्रग्रहस्त्रादिषु ६० यथोक्तं पुनरुक्तं त्रिपदप्रभृति त्रिपदप्रभृति ६१ इति प्रथमोऽध्यायः

अथ शब्दोत्पत्तिः १ वायुशरीरसमीरणात्कण्ठोरसोः संधाने २ तस्य प्राति-श्रुत्कानि भवन्त्युरः कण्ठः शिरो मुखं नासिके इति ३ संवृते कण्ठे नादः

Branch 35: Kṛiṣhṇa-Yajur-Veda Prātiśhākhya

Ending:

अननुस्वारसंयुक्तमेतल्लघु निषोधतै तल्लघु निबोधत १५

इति द्वाविंशोऽध्यायः

अथ वर्णविशेषोत्पत्तिः १

अनुप्रदानात्सँसर्गात्स्थानात्करणविन्ययात्

जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमाद् इति २

वर्णपृक्तः शब्दो वाच उत्पत्तिः ३ सप्त वाच स्थानानि भवन्ति ४ उपाँशु-ध्वाननिमदोपब्दिमन्मन्द्रमध्यमताराणि ५ करणवदशब्दममनःप्रयोगमुपाँशु ६ अक्षरव्यञ्जनानामनुपलब्धिर्ध्वानः ७ उपलब्धिर्निमदः ८ सशब्द-मुपब्दिमत् ९ उरसि मन्द्रं कण्ठे मध्यमँ शिरसि तारम् १० मन्द्रादिषु त्रिषु स्थानेषु सप्तसप्त यमाः ११ कृष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्याः १२ तेषां दीप्तिजोपलब्धिः १३ द्वितीयप्रथमकृष्टास्त्रय आह्वारकस्वराः १४ मन्द्रा-दयो द्वितीयान्ताश्चत्वारस्तैत्तिरीयकाः १५ द्वितीयान्मन्द्रस्तैत्तिरीयाणां तृतीय-चतुर्थावनन्तरं तच्चतुर्यममित्याचक्षते १६ तस्मिन्द्वियमान्तरा वृत्तिः १७ तामुपदेक्ष्यामः १८ तच्चतुर्यममित्युक्तम् १९

क्रमिवक्रमसंपन्नामद्रुतामविलम्बिताम्

नीचोच्चस्वारसंपन्नां वदेद्धृतवतीँ समां वदेद्धृतवतीँ समामिति २०

इति त्रयोविंशोऽध्यायः

अथ चतस्रः सँहिताः १ पदसँहिताक्षरसँहिता वर्णसँहिताङ्गसँहिता चेति २ नानापदसंधानसंयोगः पदसँहितेत्यभिधीयते ३ यथास्वमक्षरसँहितादी-नामप्येवम् ४ गुरुत्वं लघुता साम्यँ ह्रस्वदीर्घप्लुतानि च । लोपा-गमविकाराश्च प्रकृतिर्विक्रमः क्रमः स्वरितोदात्तनीचत्वँ श्वासो नादोऽङ्गमेव च । एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता ५ पदक्रमविशेषज्ञो वर्णक्रम-विचक्षणः । स्वरमामात्राविभागज्ञो गछेदाचार्यसँसदं गछेदाचार्यसँसदमिति ६

इति चतुर्विंशोऽध्यायः

Reference: Whitney, William D., *The Taittirīya-Prātiśākhya with its commentary the Tribhāṣyaratna: Text, Translation and Notes*, (Delhi: Motilal Banarsidass, 1973).

## Branch 36: Sāma Veda Prātiśhākhya (Puṣhpa Sūtram)

Structure: Ten Prapāṭhakas

Beginning:

सामप्रातिशाख्यम्

पुष्पर्षिप्रणीतम्

उच्चमही पुना रवजये आत्वौशनं कयादेव्यं तंवो धसं तरोलेयॅं स्वादिहितं पवस्वेन्द्रमच्छ सफष्कले पुरःश्यावागवेऽभिप्रिकावॅं स्वासु ज्ञीय मेह्यू-साकं वयं भरमधार्मेधं पान्तॅं हव्यं प्रवः शाक्त्यं वयङ्काग्वे प्रथमः १

इन्द्राकत्त्वमयन्दासौर्ध्वसद्मनमातूपारमभित्वार्षभमिदङ्गारमिदं घृतश्चुन्निधन-मात्वे तिथं योगे मेधमिन्द्रसुतेकौत्समाश्वन्द्रोणासुतासोमैकर्चौ प्र सो जयंतृचेप्रसोहितमयासफमात्त्वारॅंहर्यप्रसुन्वागौरीगौतममेकर्चावृषा यौक्ताद्यं पुनायास्यमैडे द्वितीयः २

एतास्वेव त्रिणिधनं वृषाशोशिष्ठमभिप्रव श्यैतं त्वामिदाछन्दसं यस्तेष्मतम्प-वस्वमच्छपूषासुशंकुसुज्ञानरीवितान्येकर्चाः पूषा तृचेक्रौञ्चं वृषा याममेवाम-हीविश्वादॅंष्ट्रम्पूर्वमुच्चात्तुष्टम्भमभिसोमद्रुतमेप्रहिन्वाष्कारान्तनतिस्त्रः संक्रो-शोघत्वाष्टम्भभन्तरणिरवन्तिस्त्रः ष्ठौहे तृतीयः ३

असोसखावाचः शैक्त एकर्चौ सुतावितन्त्वाष्ट्री अन्ते स्वासु हिष्ठी-यवर्णरश्चयानि दत्तसाकामन्तवदॅंष्ट्रोत्तराभिशवेस्वःपृष्ठञ्चपुनासत्राविश्वाः शोकंयोरापृश्न्यौर्णोत्तरॅं स्वासुत्वॅं हि हत्कमातीषा सोमः पुरोनानदं वा-त्सप्रॅं सोमः १३ सैन्धुत्त्वितमग्निं वश्चतुर्थः ४

प्रियमिमंवितंजुषस्वार्षाशाकलवार्शे उष्वाणमानवानूपवाम्राग्नेयानियत्सो-शवन्तानि व्यॅंशुर्दुपम्रप्राणा वनक्रोशेजसावितपार्थेस्पत्यमिन्दराते सञ्जय-मिन्द्रामित्रमसामहामित्रमिन्द्रावृधीयक्रौञ्चे पञ्चमः ५

एतास्वेववयंमृज्यौद्दणोरन्ध्रेस्वारैडेजजिद्रुरुणसामगोष्ठमुत्यॅंहवद्देव्यॅंरे-वन्तीयम्परिस्वावैदन्वतानितृतीयाद्यचतुर्थानि ससुतंवो दीर्घकार्णे सोमा-गौरीमधुश्चुन्निधने तथाक्रौञ्चे वाङ्गिनधनमैडेश्नौष्टमयापवाग्नेगूर्दः प्रवोर्चोपा-द्वॅंशपुत्रे षष्ठः ६

वृषातनिपर्णौडकूलीयानिपुणाकरावतरगौङ्गवयास्यानिस्वासुप्रवदभिनिधनं वैखानसानि यस्ते मौत्त्वमेषस्य शार्करंप्लवः सखापुरीवितकार्त्तेज्यत्त्वाहविषं

Branch 36: Sāma Veda Prātiśhākhya (Puṣhpa Sūtram)

Ending:

अथोहगीतीनां प्रस्तावोद्देशः स्तोभः पुरस्तादंतर्वा प्रस्तोतुरंतेवा विधाद्य उद्गातुस्तकारावर्षभपावमानजनित्राणां हुवादिर्वासिष्ठे पद्योनादेशे द्व्यक्षरो- वासंकृतिदार्ढच्युतयोश्चतुरक्षरोवासुरूपाजिगैडसाकमश्वानां सदेवतोवारा- जनशाक्वरर्षभयो द्विपात्सं जयना नदगौश्रृंगरात्रिदैवोदासानां कावश्रौ- तकक्षार्षभत्र्यंतायास्यैडौक्ष्णोरंध्रेडसौपर्णमोत्क्षमार्गीयंवजराबोधीययद्वाहिष्ठी- योत्सेधवाम्रस्वारसामराजपौरुमीढपूर्ववारवंतीयवार्त्रतुरयशववैरूपह्नस्वाबृह दोपशामहादिवाकीर्त्यानां वातः कृष्टाद्वृष्णो द्विर्वावारवंतीयआत्मनिचमहा- दिवाकीर्त्ये यांतोदाशस्यत्त्यभासशांम दगायत्र्यासितानां जारांतोवींकवसिष्ट- प्रियपञ्चाणां वारांतोवैश्वामित्रे हाउकारांतः संतनिजमदग्न्याभीवर्तकार्तय- शाकारांत त्वाष्ट्रीसाम्नां जाराग्निंदूतोपक्रमाणांतएवाविभाग्यानाम् १०

यौक्ताश्वैडयास्यत्रैशोकक्रोशश्नौष्टोद्व ँशपुत्रदैर्घतमससिमानांनिषेधवैराजानां द्व्यक्षरोऽभ्यस्तोद्व्यक्षरआनूपैटतसौहविषवैष्णवोत्तरपयोंतः स्वराणामग्निंदूता- भ्यस्तामध्यमक्रौंचस्य पादोभ्यस्तोवषडंताभ्यस्ताकूपारराजनपयसां द्वादशा- क्षराणि चरैवर्तषभे त्र्यक्षरोबृहत्के सोमसामगायत्रीक्रौंचवैरूपौदलगाय- त्र्यौशनसैंधुक्षितमैधातिथरोहितकूलीयेहवदैध्मवाहेंद्रयशः कणवबृहत्त्रैष्टुभ श्यावाश्वशौक्तवार्षाहरवाजभृत्कार्णश्रवसानांचत्वारि द्वेवांत्ययोः षट्शंकु- र्बार्हतवाजजित्स्वाररोहितकूलीयासितयौक्तस्रुवानामष्टावौरुक्षयजागतसो- मसाम्नोरेकादशोत्तरेजनित्रेद्वादशहरिश्रीयंते स्तोभउपायांतः पदनिधनेषु निधनं चतदं ग ँस्या द्विरेकवृषे त्रिर्वापदस्तोभेष्विलांदाद्येत्रिरुक्तंयथोक्तमितरे- ष्वंत्येवाद्व्यक्षरो महानाम्नीषुद्विपदासुप्रस्तावः शाक्वरप्रथमेष्वध्यासपुरीषेषु च यथोपदिष्टं वैछंदसेषुगीतंप्रास्ताविकमेवस्या द्यणवादीनामप्रस्ताव्याउत्तराः प्रस्ताव्येवासंतनिनः प्रस्ताव्येवासंतनिनः ११

इति पुष्पसूत्रे दशमः प्रपाठकः

पुष्पसूत्रं समाप्तम्

Reference: Śāstri, Lakṣmaṇa, *Puṣpasūtram, Puṣparṣipraṇītam*, (Benares: Chowkhamba Sanskrit Series Office, 1922).

`

VEDIC LITERATURE
READING CURRICULUM

Peter Franklin Freund

A Dissertation
Submitted to the Graduate School of Maharishi University of Management
in partial fulfillment of the requirements for the degree of

DOCTOR OF PHILOSOPHY

July, 2006

Dissertation Supervisor: Professor Thomas Egenes

© 2006

Peter Franklin Freund

All Rights Reserved

Graduate School
Maharishi University of Management
Fairfield, Iowa

® Transcendental Meditation, TM-Sidhi, Maharishi Transcendental Meditation, Maharishi TM, Maharishi TM-Sidhi, Maharishi Vedic Science, Vedic Science, Consciousness-Based and Maharishi University of Management are registered or common law trademarks licensed to Maharishi Vedic Education Development Corporation and used with permission.